# वीरेश्वर-प्रत्यभिज्ञानम्



श्रीवीरेश्वरशास्त्रिद्राविडाः

प्रकाशिका
राजस्थान-संस्कृत-अकादमी, जयपुरम् 1994

वीरेश्वर-प्रत्यभिज्ञानम्

प्रधान-सम्पादक:
राधाकृष्ण दीक्षित:

R. SK S. LIBRARY
Acc No......6652
Call No......

सम्पादका:
पं० श्री जगदीश शर्म महाभागा:
पं० श्री गङ्गाधर द्विवेदिन:
पं० श्री कलानाथ शास्त्रिण:

प्रकाशक:
डॉ० प्रभाकर: शास्त्री,
निदेशक:, राजस्थान संस्कृत (अकादमी) सङ्गम:, जयपुरम्

प्रकाशनम्
मार्च, १९९४

मूल्यम्
अशीति-रूप्यकाणि

मुद्रक :
राधेश्याम शर्मा
श्री शङ्कर आर्ट प्रिण्टर्स,
त्रिपोलिया बाजार,
जयपुर फोन–560533


प्राप्तिस्थानम्– दूरभाष : 318887
राजस्थान संस्कृत अकादमी [सङ्गम:]
वीरेश्वर-भवनम्, गणगौरी बाजार,
जयपुरम् (राजस्थानम्) ।

# वीरेश्वर-प्रत्यभिज्ञानम्



श्रीवीरेश्वरशास्त्रिद्राविडाः

प्रकाशिका
राजस्थान-संस्कृत-अकादमी, जयपुरम् 1994



# वीरेश्वर-प्रत्यभिज्ञानम्

[विद्वद्वर - पं० श्रीवीरेश्वरशास्त्रिद्राविड - जीवनचरित्रम्]

(पं० श्रीजगदीशशर्म-साहित्याचार्यप्रणीतम्)

## सम्पादकीयं निवेदनम्

जयपुरनगरनियोजकस्य सवाईजयसिंहस्य समयादेव नगरेऽस्मिन् भारतस्य विविधप्रान्तेभ्यः समानीय ससम्मानमत्र वासितानां संस्कृतविदुषां कवीनां च प्रभूता संख्या राजस्थानीयेतिहासस्य गौरवमयमध्यायमभिव्यनक्ति। एवंविधेषु विद्वत्सु द्राविड़भूसुराः सुधीवराः पं. श्रीवीरेश्वरशास्त्रिणो मूर्धन्य स्थानभाजः। एभिरस्मिन्नगरे विंश्याः शताब्द्याः पूर्वार्धे स्वकीयं जीवनं संस्कृतवाङ्मयस्य सेवायै समार्प्यत, जयपुरीयमहाराजकालेजे संस्कृतप्राध्यापकपदमलमक्रियत, आजीवनं संगृहीतानां बहुमूल्यग्रन्थानां समृद्धः पुस्तकालयः पर्यन्ततः सार्वजनिकसेवायै समुदसर्ज्यत (या हि संप्रति राजस्थान-संस्कृत-अकादम्याः सम्पत्तिः), निःसन्तानं स्वर्गतैश्च समग्रापि स्वकीया सम्पत्तिः समाजसेवार्थं न्यासीकृत्य प्रतिन्ययुज्यत।

एतेषां वैदुष्यस्य यशोगाथा यद्यपि तच्छिष्याणां स्मृतिष्वद्यापि जागर्ति, तथापि मा भूवन्नेते विस्मृतिपथपथिका इति विचिन्त्यैतेषां शिष्यैर्विद्वद्वरैः पं० श्रीजगदीशशर्मभिः (राष्ट्रपतिसंमानितैः जयपुरात्प्रकाशितायाः 'भारती' मासपत्रिकायाः संपादकैः) एतेषां जीवनवृत्तं "वीरेश्वरप्रत्यभिज्ञानम्" इति शीर्षकेण व्यलेखि। जीवनचरित्रमिदं स्वरमङ्गलापाठकेभ्य उपह्रियेतेति धिया क्रमिकरूपेण धारावाहिकत्वेनेदं प्रकाश्यते। अस्य भूमिका पं. वीरेश्वर-द्राविडानां सच्छिष्यैर्विद्वद्वर - पं. श्रीगङ्गाधरद्विवेदैः (राष्ट्रपतिसंमानितैः, महाराज संस्कृतकालेजस्य भूतपूर्वैः प्राचार्यैः संप्रति ब्रह्मपुरीस्थप्राच्यशोध-संस्थानस्य निदेशकैः) लिखिता सहैव प्रकाश्यते। ग्रन्थाकारेऽपीदं जीवनवृत्तं पृथक् प्रकाशयिष्यते।

**कलानाथः शास्त्री**

सम्पादकः

# वीरेश्वर-प्रत्यभिज्ञानम्

## प्रास्ताविकम्

□ म. म. पं. गंगाधरो द्विवेदी

---

**मुखबन्धः**

जयपुरमहीमहेन्द्रेण राजर्षिणा सवाईजयसिंहदेवेन प्रतिष्ठापितमिदं जयपुरं नाम नगरं विद्याकलाकेन्द्राधिष्ठानतया विश्वस्मिन् प्रसिद्धमभूत्। प्राच्यवास्तुकलामर्मज्ञैः सह परामर्शमादाय समायोजितोऽयं नगरविन्यासः स्वदेशे विदेशे च चिराय बहुप्रशंसितः समभवत्। चेतोहारि रमणीयं चेदं नगरं दर्शंदर्शं वास्तुकलासौन्दर्येणाभिभूताः नागराः प्रतिपदं प्रशंसामुखराः संजायन्ते। वस्तुतः राजप्रासादस्य गगनचुम्बिसन्निवेशः सौन्दर्यप्रतिमानभूतो दूरादेव दर्शकान् विस्मापयति। ज्योतिःशास्त्रविश्वसृजा – आचार्यवराह-मिहिरेण भारतीयराजप्रासादानां निर्माणकौशलं विवृण्वता प्रासादान्तर्वर्तिनः सभामण्डपस्य – अन्तःपुरादि तदन्तःपातिवेश्मायतनस्य च यो यादृशश्च विभागक्रमो निर्दिष्टः स एवात्र नूतनेन परिष्कारेण सह संयोज्य नयनाभि-रामतां नीतः, राज्ञो विलक्षणं बुद्धिकौशलं प्रख्यापयति। प्रासादस्य प्राङ्गणे "सरबतेति" नाम्ना प्रसिद्धं यत् सर्वतोभद्रं निर्मापितं तस्य परिवेशः वराहमिहिरोक्तवास्तुनिर्माणविधानेन सह सर्वतः संवादमादधाति।

सोऽयं राजमौलिमणिर्जयसिंहदेवः ज्योतिःशास्त्रेऽपि निपुणो रहस्यज्ञश्चासीदिति जयपुरस्थ-वेधशालया प्रत्यक्षीक्रियत एव। अस्य शासनकाले वैदिकवाङ्मयेन सह संस्कृतसाहित्याङ्गोपाङ्गानां ढुण्ढारप्रदेशे अध्ययनाध्यापनस्य प्रचारप्रसारस्य च वास्तविकः शुभारम्भः संवृत्तः। अस्य पूर्वजेषु मिर्जत्युपाधिभूषितस्य राज्ञः जयसिंहदेवस्य शासनकाले जयपुरमूलभूते - आमेरराज्येऽपि संस्कृतविदुषां कवीनां च समागमः, तेभ्यो राज्याश्रयश्च प्रदत्तोऽभूत्। येषु कतिपये कुलपतिमिश्रः, पण्डितराजो जगन्नाथः, महाकविविहारीलालप्रभृतयः ख्यातनामानोऽभूवन्। आमेराधिपतेर्मिर्जाराजाजयसिंहस्य राजसभासदस्येन पञ्चनदप्रदेशादागतेन, गोपालकविना राज्ञश्चरितमितिवृत्तं चावलम्ब्यैकं चम्पूकाव्यं निरमायि। यत्र - आमेराधिपतेः राजोचितं वर्णनं प्रस्तुतम्। इदं चम्पूकाव्यं मया टीकया सह सम्पादितम् यस्य प्रकाशनं राजस्थानसंस्कृतसंगमेनाचिरादेव भविष्यति।

सवाईजयसिंहदेवादधस्तनेषु नृपतिषु ईश्वरीसिंहप्रतापसिंहनामानौ नरेशौ विद्याकलाक्षेत्रेऽस्य नगरस्य स्मरणीयां गौरववृद्धिं कृतवन्तौ। अनयोः पश्चाद्भवेषु राजसु द्वितीयः सवाईरामसिंहदेवः राज्यसिंहासनेऽभिषिक्तः। अस्य च शासनकाले विद्यानां कलानां च क्षेत्रे - एवं - नगरस्य परिष्कारे सौन्दर्यकरणे च सर्वतोमुखी समृद्धिः समभूत्। इदमस्ति चात्र समुल्लेखयोग्यं तथ्यं यदस्य विचक्षणशिरोमणेः शासनसमये संस्कृतवाङ्मयं शाखाप्रशाखाभिरुपगूढं चरमोत्कर्षेणोन्नतिशिखरमारुरोह। यतोऽयं नरेशः भारतीयायाः मूलप्रकृतेरनुरूपां धर्मशास्त्रानुकूलां च प्राक्तनीं मर्यादामक्षुण्णां विधातुं सर्वतोभावेन कृतसंकल्पः समभूत्। अस्य शासनकाले प्रजासंरक्षणेन सह सर्वविधो विकासमार्गः महतीं वृद्धिमवाप। राजधान्यां साम्प्रतमुपलभ्यमानः यः शैक्षणिकः सांस्कृतिकः सामाजिकश्च पूर्वतनः परिवेशो दृष्टिपथमायाति तस्य मूले गुणैकपक्षपातिनोऽस्यैव राजनीतिधुरन्धरस्य राज्ञो बुद्धिकौशलं प्रशासनपाटवञ्च प्रतितिष्ठति।

एतत्समानकालिके राजस्थानीयनरेन्द्रमण्डलेऽप्ययं राजोचितेन व्यवहारेण शीर्षस्थानमुपलेभे। आचार - विचार - लोकसेवासमीक्षणे राज्ञः

राजन्यानां च अनेन सह परस्परस्य तुलनावकाशो नैव संभवति। किन्तु साररूपेण राज्ञो रामसिंहदेवस्य चरित्रमुद्दिश्य रघुकारस्येयमुक्तिरंशतः संवादिनी दृश्यते—

**"प्रजानां विनयाधानाद् रक्षणाद् भरणादपि,**
**स पिता पितरस्तासां केवलं जन्महेतवः" ।।**

(रघुवंश १ सर्ग)

प्रसङ्गमिममुपसंहरता इदमत्र सुदृढं निवेद्यते यन्नूनमस्यां विंश्यां शताब्द्यां स एष नृपतिः देववाण्याः संस्कृतभाषाया उन्नायकेषु इतिहासपुरुषेषु स्मरणीयः स्थास्यति। यत अनेन मनस्विना देवगिरां संरक्षण प्रचारप्रसारे च बहु पराक्रान्तम्। भारतस्य नानाप्रान्तेभ्यः संस्कृत - विद्यायाः पारंगताः अनेके प्रौढा विद्वांसः स्वराजधान्यामानीय बहुनादरेण सम्मानिताः प्रतिष्ठापिताश्च।

अस्यैव शासनसमये भारतप्रसिद्धस्य राजकीयसंस्कृतमहाविद्यालयस्य स्थापना संजाता। यत्र काशीतः समानीतेषु विद्वत्सु अस्मद्गुरुपरम्पराप्रविष्टाः पाणिनीयव्याकरणार्णवकर्णधाराः श्रद्धेयाः रामभजशास्त्रिणः, ये चात्र महाविद्यालयस्याध्यक्षपदमविन्दन्त। एषां सहैव समागतेषु एषां सतीर्थ्याः सम्मान्याः पं. शिवरामशास्त्रिणः ये पण्डितप्रवरचन्द्रधरगुलेरीमहोदयानां पितृपादा आसन् एवमन्येऽपि मैथिलाः बाङ्गाश्च विद्वांसः रामसिंहेन राज्ञा समाहूतास्तत्र तत्र शिक्षाक्षेत्रे धर्माधिकरणे च समायोजिताः।

## श्रद्धेयगुरुवरद्राविडवीरेश्वरशास्त्रिणां जयपुरागमनम्

अस्य राज्ञो रामसिंहदेवस्य समये ये दाक्षिणात्याः परिनिष्ठितमतयो विद्वद्धुरीणा जयपुरे समागताः समानीताश्च तेष्वस्माकं चरित्रनायकाः द्राविडवीरेश्वरशास्त्रिणोऽप्यन्यतमाः। एषां महाभागानामागमनप्रसङ्गः दैवयोगादेवात्र संभूतः। शास्त्रिणामावुत्ताः (भागिनीपतयः) मन्वाजीत्यु-पनामधेयाः पं. कामनाथशास्त्रिणो द्राविडा आसन्। एभिः सह शास्त्रि-महोदयानां ज्येष्ठाया भगिन्याः पाणिग्रहणं सम्बभूव।

स्वभगिन्याः सम्बन्धेन शास्त्रिणामिहागमनं समये समये संजातम्। अस्मिन्नेव व्यतिकरे अदृष्टवशेन कामनाथशास्त्रिणा सह नृपतेर्मनोमालिन्यं समभवत्। तदानीं बङ्गदेशीयः बाबूकान्तिचन्द्रमुखर्जीमहोदयः राजकीयं मन्त्रिपदं दध्रे।

माधवसिंहभूपतेर्महिष्या गर्भवत्याः प्रसूतिसम्पादनापदेशेन राजगुरु-कामनाथशास्त्रिसद्मनि गोपीजनवल्लभमन्दिरस्थे सुरक्षाहृद्व्यायसशृङ्खलाबद्धे केनापि कारणेन समाहूतचरो वीरेश्वरशास्त्री भगिन्या रुजाक्रान्तया स्वावासविमुक्तये निवेदितः, एतदनन्तरं शास्त्रिवर्यः गोपीजनवल्लभमन्दिरस्य नातिदूरे संस्थितं कान्तिचन्द्रामात्यनिवासं प्रपद्य सर्वं वृत्तजातं निवेदितवान्।

स्वचातुर्येण पूर्वतनं तदीयमावासादिकं यथास्थितमेव रक्षितुममात्यानु-मतिमादाय स्वभगिनीं समतोषयत्। ततश्च स्वबुद्धिकौशलेन राज्ञा सह पूर्वं संजातं मनोमालिन्यमपि दूरीकृतवान्।

कियत्कालानन्तरं दीक्षागुरोः कामनाथशास्त्रिणः परलोकप्रयाणे मन्दिर-स्थिताया भूसम्पत्तेरुत्तराधिकारस्य विवादः समुत्पन्नः। तदुपशमनाय शास्त्रिवर्याः स्वभगिन्या पुनरभ्यर्थिताः काशीतः जयपुरं समायाताः। दायादे न्यायालये स्थापितस्य वादस्य स्वकीये पक्षे समाधानमुपलभ्य स्वकीय-पक्षस्थितेन निर्णयेन संतुष्टः अस्मात् प्रकरणाद्विगतचिन्तोऽभूत्।

जयपुरे निवसता शास्त्रिमहोदयेन राज्ञः-अन्तरङ्गपरिकरेण सह राज्य-शासनाधिकारिभिः सह सुदृढः सम्पर्कः सम्पादितः।

**अध्यापनकार्यारम्भः**

एतस्मिन्नन्तरे शास्त्रिणा स्वकीयेन वैदुष्यप्रभावेण जयपुरस्थपण्डित-परिषदा सह परिचयवृद्धिमधिगम्य तैः सह समुचितं सौहार्दमलभ्यत। सम्पर्कात् यथोत्तरमस्य वैदुष्यमपि तेषामन्तः सुप्रतिष्ठितमभूत्।

एवंभूते व्यतिकरे प्रधानामात्यस्य कान्तिचन्द्रमहाभागस्य शासनपरिषदा महाराजाकालेजनाम्नि आङ्लमहाविद्यालये कस्यचन सुयोग्यस्य विदुषोऽ-

ध्यापनकर्मणि नियोगार्थमस्मिन् क्षेत्रे तत्कालमुपलब्धानां विदुषां मध्येऽध्यापकान्वेषणं कुर्वता सर्वसम्मत्या शास्त्रिमहोदय एव चयनितः। कियत् समयानन्तरं शास्त्रिमहोदयस्य संस्कृतमहाविद्यालये प्रौढाध्यापनदृष्ट्याल्पकालिकं स्थानान्तरणं शासनेन विहितम्। एकवर्षानन्तरमेवास्मिन् महाविद्यालयेऽध्यापकोपलब्ध्या शास्त्रिमहोदयः स्वकीये मूलस्थाने - आङ्लमहाविद्यालये पुनः स्थानं गृहीतवान्। तत्राध्यापकपदमधितिष्ठतानेन बी. ए. (बैचलर आफ आर्ट) एम. ए. (मास्टर आफ आर्ट) कक्षायां संस्कृतविषयाध्यापनाय शासनस्यादेशमवाप्य नूतनोत्साहेनाध्यापनकार्यं समारब्धम्।

श्रीमतां शास्त्रिणां जयपुरे समागमनानन्तरं राजकीये शिक्षाविभागे तेषां नियुक्तिः समभवत्-इत्यन्ववोचं प्राक्। आङ्लमहाविद्यालये शिक्षणकार्यं कुर्वतामेषामध्यापनसौष्ठवं प्रसृतं, तत्र विभिन्नविषयाणामनुरूपेण प्रकारेण यैभिः तथा संयोजनं विहितं येन छात्राणामध्ययनोन्मुखी प्रवृत्तिर्यथोत्तरं वृद्धिमुपगच्छन्ती तथा प्रसृता यया स्वयमाकृष्टा विद्यार्थिनस्तेषामन्तिकेऽहमहमिकयाध्येतुं प्रवृत्ताः। छात्रवर्गस्याध्ययनरुचिं समीक्ष्य शास्त्रप्रसारबुद्ध्या छात्रहितैषणया चाध्यापनस्य मानसं विधायानेन व्यापकदृष्ट्याध्यापनमङ्गीकृतम्। तदनुसृत्य विद्यालयीयछात्राणामध्यापनानन्तरं रिक्तेष्वन्तरेषु अध्ययनोत्सुकाश्छात्रास्तत्रैवागत्य पठनार्थमनुमताः। एवंविधानामध्येतॄणां भूयसी संख्या संजाता-इति सर्वेषां युगपदेककालिकी व्यवस्थानैव शक्यसंभवेति मत्वा केचन विद्यालये-आहूताः केचन पुनर्गृहे समाहूताः। एवं व्यवस्थापनेन सर्वेषां सुविधासौकर्यं स्वकीयञ्चावकाशकालं विभज्य व्यवस्थितविभाषया सर्वेऽप्यध्येतारः समयदानेनानुगृहीताः परितोषिताश्च। विरला हि एतादृशा उदारप्रकृतयो महापुरुषाः येऽध्येतॄणां कृते विद्यादानाय कृतसंकल्पाः स्वावासेऽप्यविगणय्य शारीरिकं श्रमं कर्तव्यकर्मणि निरलसाः प्रवर्तन्ते।

देशस्य स्वातन्त्र्योत्तरकालानन्तरमस्मत्पूर्वजानां प्राचीना परिपाटी सर्वथा निर्गता सांप्रतं तु सर्वत्र निर्बाधं भृतकाध्यापनं प्रचलति। गुरुगृहेऽध्ययनं तु प्रायेण सर्वथा लुप्तप्रायम्। धर्मशास्त्रकारास्तु भृतकाध्यापनं

निन्दन्ति निषेधन्ति च। परमार्थप्रधानेऽस्मिन् युगे न कोऽपि किमपि कर्णे करोति। किं क्रियताम्? इदमपरमाश्चर्यं यत् शासकीयेषु विद्यालयेष्वध्यापन-पराङ्मुखा इदानीन्तना भृतकाध्यापनायैव छात्रान् प्रेरयन्ति। अनेकविधां च विभीषिकामुत्पाद्य स्वार्थं साधयन्ति, भवतु नाम।

शास्त्रिमहोदयास्तु शिक्षाक्षेत्रे भारतीयां परम्परामनुरुध्य गुरुशिष्यभावं प्रधानीकृत्यैव शिक्षायाः पवित्रमादर्शमनुपालयन्ति स्म। यावज्जीवनं च गुरु-शिष्ययोः गरिमासंरक्षणं विधाय समाजेऽनुकरणीयं सदाचरणं शिक्षितवन्तः। तदेतदास्तां कालविलसितम्।

शास्त्रिचरणैरध्यापितेषु छात्रसमुदायेषु अनेके भारतप्रसिद्धा विद्वान्सोऽभूवन्। येषु केषांचिन्नामान्यत्र यथाज्ञानमुध्द्रियन्ते पाठकान् परिचेतुम्–

१. महामहोपाध्यायगिरिधरशर्मचतुर्वेदाः
2. राजगुरु श्रीचन्द्रदत्त शर्मा मैथिलः
3. आचार्यप्रवरः श्रीगिरिजाप्रसादद्विवेदः
४. पं. श्रीभवदत्त शास्त्री
५. नैयायिकः श्रीकन्हैयालालदाधिमथः
६, श्रीमदनलाल प्रशनवरः
७. श्रीचन्द्रधर गुलेरी
८. श्रीश्यामसुन्दर पारीकः
९. श्रीगिरिधरशर्मा नवरत्नम्
१०. श्रीयुगलकिशोरशर्माणः
११. श्रीराधेश्यामशास्त्रिसामवेदिप्रभृतयः

सर्वेषां संख्याने तु परःशताधिकाः शास्त्रिणां शिष्येष्वन्तर्भवन्ति। राज्य-सेवातोऽवकाशग्रहणानन्तरं प्रारंभे शास्त्रिणां सुखसमृद्धमपि पारिवारिकं जीवनं दैवदुर्विपाकेन पर्यन्ते क्लेशकरमेवाभूत्। सहधर्मिणीनां सन्ततीनां च

दुःखकरो वियोगः प्रायेण पञ्चाशद्वर्षासन्ने वयसि समापतितः । तेन च गृहिण्याः परलोकप्रयाणानन्तरं संसारयात्राक्रमः सर्वथा विपर्यस्तः ।

"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन" इति गीतोपदेशानुसारं प्रवृत्तिमार्गं विहाय निवृत्तिमार्ग एवानेनात्मसात्कृतः । यतो लोकोद्भवानां काम्यकर्मणां सर्वथा परिहरणमेव श्रेयसे सम्पद्यते । ततश्चैषां प्रवृत्तिः सर्वतः संन्यस्तभावाभिमुखी प्रववृते । सूतवस्त्रादिकं परिहाय साधारणेन धौतवस्त्रेण-सह दुकूलमेकमङ्गीकृत्य सर्वाण्यपि वस्त्रजातानि परिधानान्युपेक्षितानि । पादयोरुपानत्प्रयोगोऽपि परित्यक्तः ।

## मदीयं संपर्कसूत्रम् (पारिवारिकः सम्बन्धः)

अस्मत्परिवारेण सह शास्त्रिमहोदयानां पारम्परिकः सम्बन्धोऽभूत् । मत्प्रपितामहैः आगमाचार्य - पं. सरयूप्रसादद्विवेदिभिः सह शास्त्रिणां सम्पर्कः कदा कथं संजात इति वक्तुं न पार्यते । किन्तु दैनन्दिन्यां रेलयात्रा-प्रसङ्गेन तेषां सम्प्रेषणस्योल्लेखो दृश्यते । तेनैदमनुमीयते यदुभयोः स्नेहानुबन्धो नूनमासीत् ।

मत्पितामहैः म. म. पं. दुर्गाप्रसादद्विवेदिभिः सह तु शास्त्रिणां प्रगाढो मैत्रीसम्बन्धो यावज्जीवनं समपद्यत । तत्फलस्वरूपं शास्त्रसम्बन्धिनीषु चर्चासु विचाराणामादानप्रदानं सैद्धान्तिकश्च परामर्शो यथाप्रतिभानं निर्वभौ ।

शास्त्रिमहोदयाः कृष्णयजुर्वेदस्य तैत्तिरीयशाखाध्यायिन आसन् । प्रायेण दक्षिणभारते तैत्तिरीयशाखाध्यायिनां वेदविदां बाहुल्यम् । तत्र तत्र शुक्ल-यजुर्वेदीयकाण्वशाखाध्यायिनामपि समुदायः समदृश्यत । शास्त्रिमहोदयानां स्वशाखीये संहिताब्राह्मणादीनां स्वाध्यायकर्मणि भूयानभिनिवेशो बभूव । तत्प्रतिफलरूपेणानेन कृष्णयजुर्वेदस्य साङ्गोपाङ्गमध्ययनार्थं काश्यामेका स्वतन्त्रा वेदपाठशाला संस्थापिता । यस्याः प्रधानाध्यापकपदे शास्त्रिभि-र्मातुलपुत्रः पण्डितश्चन्द्रशेखरशास्त्री नियोजितः । तेन चायुषः समाप्तिपर्यन्तं

वेदाध्यापनं निर्व्यूढम्। तदानीं काशीहिन्दूविश्वविद्यालयेन सह चास्य वेदविद्यालयस्य सम्बन्धस्थापनार्थं अत्राधीतछात्राणां विश्वविद्यालये प्रवेशार्थं प्रयासः समनुष्ठितः। तदानीं काशीहिन्दूविश्वविद्यालयस्य संस्थापकाः श्रीमन्तो मदनमोहनमालवीयमहाभागा उपकुलपतिपदमविन्दन्। विश्वविद्यालयीयनियमानुरोधेन वेदविद्यालयस्थापकस्य वेदशास्त्रनिष्णाततायाः प्रमाणपत्रमपेक्षितमासीत्। तदर्थमेभिः मत्पितामहा अनुरुद्धाः। यत एते काशीस्थहिन्दूविश्वविद्यालयीयप्राच्यविद्यासंकायस्य सभास्तारा आसन्—इत्येषामेतन्मान्यतोपलब्ध्यै प्रमाणपत्रस्य प्रस्तुतीकरणमनिवार्यममन्यत। तस्मिन् प्रसंङ्गे पितामहैः देवगिरागुम्फितं ललितं सारगर्भितं चैकं प्रमाणपत्रं प्रशस्तिगर्भितं शास्त्रिमहोदयेभ्यः ससम्मानं समुपहृतम् काचसंलग्ने काष्ठप्रकोष्ठके।

यस्य महनीयः सुन्दरश्च हस्तलेखो ब्रह्मपुर्याः स्वयंभूलिङ्गस्य योगेश्वरमन्दिरस्यार्चकेन प्रश्नवरविदुषा कन्हैयालालशास्त्रिणा विहितः। तच्च शास्त्रिणामावासकक्षस्य भित्तिपृष्ठे संयोजितमासीत्। तदिदं दुर्लभं सुवाच्याक्षरैः रमणीयं प्रशस्तिपत्रं शास्त्रिमहोदयनिधनानन्तरमनवधानतया विनष्टं केनापि नीतं वेति न वक्तुं शक्यते। यद् भवतु तद् भवतु। मम तु शब्दशास्त्राध्ययनार्थं सायं प्रातः प्रत्याह्निकमेव गमनं शास्त्रिणामन्तिके अनध्यायदिवसान् परिहृत्य नियतमासीत्। अतश्चित्रोपमे सुवाच्याक्षरैः सज्जीकृतेऽस्मिन्-अनीहमानस्यापि-अध्ययनकक्षावस्थानैनैतदुपरि स्वाभाविको दृक्पातः समजनिष्ट। ऐतिहासिकस्यास्यान्वेषणाय यदा मया प्रबन्धका अभ्यर्थितास्तदा तस्यानुपलब्धिं श्रुत्वा विषण्णोऽभूवम्। यतस्तस्य लेखस्य प्रतिलिपिरपि दुर्लभा दुःसाध्या चेति मत्वा "संस्कारजन्यं ज्ञानं स्मृति"-रिति तार्किकसमयमनुसरता बुद्ध्युपारूढोऽयं लेखः कथं कथमपि दैवप्रेरणया स्मृतिपथमानीतः परं तन्मुखबन्धे सन्दर्भिता - अनुष्टुप्छन्दसोः श्लोकद्वयी संस्मृतापि द्वितीयस्य श्लोकस्य प्रथमार्धो विस्मृतिगर्भे निलीन इति विषीदति चेतः। अथापि प्रौढविदुषां रचनासौष्ठवं भावाविष्करणं च प्रत्यभिज्ञातुं स लेखोऽत्र समुपन्यस्यते संस्कृतगिरां परिचयकामनया।

प्रशस्तिपत्रस्याविकल: पाठोऽधस्तनोऽत्रोपन्यस्यते—

"एकोऽप्यनेकरूपेण यो वेदेषु विमृश्यते ।
चतुर्वर्गफलप्राप्त्यै स भूयात् परमेश्वरः ।।
. . . . . . . . . . . शक्त्या प्रोच्छलिताशयः ।
व्यक्त्या विसृमरः सोऽयं वाच्यवाचकविग्रहः ।।

अस्य भगवतः प्रेरणया सुगृहीतनामधेयस्य सुब्रह्मण्यशास्त्रिणो दीक्षितस्य तनूजन्मान्तर्वाणिवरणीयवैदुष्यो वत्सगोत्रः पञ्चप्रवरो वीरेश्वरशास्त्री द्राविडः काश्यामनुपञ्चगङ्गं संप्रति वेदशाखासु वैतानिके कर्मणि तैत्तिरीयायाः विश्वग्वैशिष्ट्यमाकलय्य तामेव स्वाध्यायसत्रेण प्रवर्तयन्नात्मयाजीभवन् श्रोत्रियेषु तदनुषङ्गेण पूर्वोत्तरमीमांसाहेवाकिषु भूयांसं सन्तोषमावहतीति तदेकदेशे—

वेदा व्याकृतिकल्पतोऽपि सुमते ! शाखाबहुत्वं गता,
नो चेत् पाणिनिनापि तित्तिरिमुखा भागा कथं सूत्रिता ।
इत्थं वाजसनेयमन्त्रकलया वेदप्रथायन्त्रणा,
तद्वच्छिष्टनिविष्टशाखिककथोच्छेदः कथं जायताम् ।।"

काश्यां वेदविद्यालयस्य सम्बन्धे यस्य प्रमाणपत्रस्योल्लेखोऽत्र कृतस्तत् सम्बन्धे दैनन्दिन्यां ३०-६-१९२४ दिनाङ्के शास्त्रिणो लिखन्ति ......... "म. म. श्रीश्रीनाथाभिधैः श्रीदुर्गाप्रसादशर्मभिः श्रीवीरेश्वरकृष्णयजुर्वेदपाठशालामुद्दिश्य कृपाश्लोकं समङ्गलं सदाचारव्यवहारावाश्रित्य सचित्रपटे लेखयित्वा प्रेषितमिति – अनुगृहीतोऽस्मि"। यदि दैवयोगेन पूर्वतनस्य प्रमाणपत्रस्य – उपलब्धिर्नाभविष्यत् तदा दैनन्दिन्यां लिखितस्यास्य संवादः दुष्कर एवाभविष्यत् ।

श्रीमतां शास्त्रिमहोदयानां जयपुरे समागमानन्तरं राजकीये शिक्षाविभागे तेषां नियुक्तिः संजातेत्यन्ववोचं प्राक् तदानीन्तने सुप्रसिद्धे महाराजाकालेजेतिनामके – आङ्लमहाविद्यालये प्राध्यापक (प्रोफेसर) पदात् सेवानिवृत्तेरनन्तरं स्यूतवस्त्राणामुपयोगं विहाय केवलं धौतवस्त्रेण सह श्वेतदुकूलस्यैव

परिधानमङ्गीकृतमासीत्। संसारचक्रं परिहृत्यामी वीतरागिण ऋषिकल्पं जीवनं जीवन्तः समयमत्यवाहयन्। परमाजीवनं देवाराधनं वेदस्वाध्यायश्च तेषामविरतं प्रावर्तत।

दैवनियोगात् सहधर्मिण्याः सन्ततीनाञ्चैकान्ततो वियोगानन्तरं केवलमेषां प्रभूतं शिष्यमण्डलमेव परिवारपरिधौ परिगणनीयमभूत्। ये केचन मातुलपक्षतो भगिनीपक्षतो वा सम्बन्धिताः सदस्या आसन् तेऽपि परलोकं प्रस्थिताः। तैश्च स्वकीयजीवनकाले शास्त्रिणां जीवनमूल्यानां कापि लेखबद्धा प्रस्तुतिर्नैव विहिता। प्रत्युत गतानुगतिकरूपेणौदासीन्यमेव दर्शितम्। इति जीवनवृत्तस्य तथ्यमुपलब्धुं न कश्चित् स्रोतोऽधिगतः। ततो विषण्णेन शिष्यवर्गेण तेषां दैनन्दिनीमवलम्ब्य यः कश्चन जीवनप्रसङ्गः परोक्षरूपेणाधिगतः स एवोहापोहद्वारेण शृङ्खलाबद्धं सम्पाद्य जनसमक्षमानीतः। एवंविधस्य लोकशास्त्रसेवानिरतस्य महापुरुषस्य स्मृतिसंरक्षणायैवंविधे प्राकृतिके संविधानके स्थिते सति नान्यो मार्गोऽवशिष्ट आसीत्।

इत्थंभूते व्यतिकरे स्वर्गीयगुरूणां कार्यकलापमाध्यमेन तेषां कीर्तिसंरक्षणाय प्रयासो व्यापारो वा सर्वथा शिष्यवर्ग एव समापतितः। सम्प्रति स्वर्गीयशास्त्रिणां शिष्येषु द्वावेव तस्य नेदिष्ठौ - अन्तरङ्गतया स्थितौ दृष्टिपथं भजतः। तत्रैकः शास्त्रिणां लोककार्येषु सक्रियरूपेण सम्बद्धोऽपरश्च केवलं विद्याध्ययनेनान्तरङ्गो भवन्नपि कालकारणेन सीमितामेव सन्निधिमासेदिवान्। अतस्तस्य जीवनवृत्तलेखनं तदीयेन शिष्यसत्तमेन राष्ट्रपतिपुरस्कृतेन विदुषा साहित्याचार्येणास्मत्सतीर्थ्येन श्रीजगदीशशर्मणा संदब्धमास्ते। मयापि एतेषां यावदपेक्षितसहयोगदानेन परिष्करणाय सज्जीकरणाय च प्रस्तावनालेखेनास्य जीवनवृत्तस्य प्रामाण्यमनुष्ठितम्।

"प्रथमे हि विद्वांसो वैयाकरणा व्याकरणमूलत्वात् सर्वविद्यानाम्" इति ध्वनिकारस्यानन्दवर्धनस्य कथनानुसारं प्रवेशिकापरीक्षां प्रथमश्रेण्यामुत्तीर्य व्याकरणमध्येतुं संस्कृतमहाविद्यालयस्योपाध्यायकक्षायां लब्धप्रवेशेन मया समारब्धमध्ययनम्। अस्मत्पितामहशिष्याः प्राज्ञवरपण्डिता व्याकरणमर्मज्ञाः पूज्याः पं. चन्द्रशेखराचार्याः व्याकरणस्याध्यापका आसन्। संस्कृत-

महाविद्यालये तदानीन्तनः पाठ्यक्रमः सुविचार्य निर्धारितः छात्राणां व्युत्पत्त्याधायकश्चासीत् । सम्पूर्णाया वैयाकरणसिद्धान्तकौमुद्याः पाठनं चतुर्षु वर्गेषु विभज्य पाठाय नियतोऽभूत् । अत्र प्रसङ्गगतमिदमप्युल्लेखमर्हति यद् "गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनम्" "अष्टवर्षं ब्राह्मणमुपनयेत्" इति श्रुतिस्मृतिसंमतेन नियमेनोपनयनानन्तरं शब्दकोषाध्ययनेन सह पाणिनीयाष्टाध्याय्याः सार्धत्रिशतसहस्रासन्नानि सूत्राणि मया गुरुमुखादधीत्य कण्ठस्थीकृतानि तत एव च कौमुद्या अध्ययने महत्सौकर्यमनुभूतम् । परं प्रथमवत्सरस्य परीक्षायामहमेकाकी एव परीक्षार्थी परीक्ष्य आसम् । पत्रद्वयस्याऽपि प्रश्नानामुत्तराणि सम्यक्तया समाहितानि परीक्षोत्तरणे च मनसि द्रढीयानासीन्मम विश्वासः यदहं समुत्तीर्ण एव वत्स्यामि, किन्तु परीक्षाफलं मदाशातो विपरीतं प्रतिफलितम् । म. म. पं. गिरिधरशर्मचतुर्वेदिनो महाशयाः विद्यालयस्याध्यक्षा आसन् । मनसि विषादः प्रादुरभूत् । न केवलं विषादः - अपितु अस्मात् विद्यालयादेव मोहभङ्गः संजातः । मनसि चाकरवम् "मनस्यन्यद्वचस्यन्यत् कर्मण्यन्यत् महात्मनाम्" । अतो मदीयमध्ययनं निष्प्रत्यूहं नैव संभविष्यतीति मयात्र विद्यालयात् गृहं परावृत्य सकलोऽप्यन्तर्निहितो मनःक्षोभः स्वपितामहाय निवेदितः । तेन च सद्य एव निर्णयो दत्तो यत्त्वया शब्दशास्त्राध्ययनाय वीरेश्वरशास्त्रिणः प्रार्थनीयास्तेषामन्तिके तवाध्ययनं फलवद् भविष्यति । पितामहानुमतिं लब्ध्वा विद्याध्ययनकामनया तदन्तिकं समनुप्राप्तः । इतः पूर्वमनेकवारं पितृचरणैः सह शास्त्रिणां सदनमुपगम्य तेषां दर्शनस्यावसरः समधिगतोऽभूत् । किन्तूद्देश्यविशेषमादाय प्रस्थितस्य मम मनसि अनेके काल्पनिकाः प्रश्नाः समुदतिष्ठन् । स्वाभाविकं चासीन्मदीयं मानसिकमुद्वेलनम् । प्राङ्निवेदितमेतत् यत् शास्त्रिचरणाः पञ्चद्रविडेष्वन्तर्गता इति कृत्वा प्रारम्भत एव स्वयंपाकिनोऽभूवन् । तस्मिन् दिवसे भीत-भीत इव तत्सदनं प्रविष्टः । तत्र च प्रवेशानन्तरं यथानियमं सम्मुखे समागतां परिचारिकां विलोक्य पृष्टम् क्व सन्ति गुरवोऽधुना ? तया प्रत्युक्तम् - उपरि रसवत्यां स्थिताः पाकक्रियायां संलग्नाः वर्तन्ते । मयोक्तं ममागमनं निवेदय । सा पाकशालामुपेत्य मदागमनं निवेदितवती । ततश्चानुमतिमवाप्य मामुक्तवती — आगम्यतामिति । अहमन्तः - प्रविश्यासनोपर्युपविष्टः ।

कुशलक्षेमप्रश्नानन्तरं मदागमनस्य कारणमपृच्छन्। अहमारम्भतः समस्तं वृत्तजातं तेभ्यो व्यजिज्ञपम्। तदाकर्ण्य क्षणं स्थित्वा मामवोचन्-साधु कृतम्। अनुमतोऽस्यध्ययनाय, परं मदनुशासनं सर्वात्मना पालनीयं भविष्यति – एतदर्थं त्वया सन्नद्धेन भाव्यम्। अतो यथाकालं नियतोपस्थितिको भूत्वा यदाध्ययनं करिष्यसि तदा विषयस्य ग्रन्थस्य रहस्यज्ञानं स्वयमाविर्भविष्यति। अतः परिश्रमं समाचर, परिश्रमेण प्रतिभोदयो भविष्यति – अभीष्टस्य च यथायथं संसिद्धिः। इत्येवं सूत्ररूपेण शास्त्राध्ययनार्थमहमुद्बोधितः। अहम् अध्ययनं प्रारब्धवान् अनुकूलं हि दैवमभीष्टं पूरयति।

**अध्ययनारम्भः**

शास्त्रिणामादेशं हृदि निधाय प्रारब्धं मयाध्ययनम्। इतः पूर्वं गृहे एव सिद्धान्तकौमुद्या अध्ययनं प्रश्नवरपण्डितानां श्रीचन्द्रशेखराचार्याणामनुकम्पया समापितम् यत एते महानुभावा वृद्धायुर्या मदावासस्य सरस्वतीपीठस्य प्रतिवेशिनोऽध्यासन् – प्रत्यहं चैषां मत्पितामहचरणानां सविधे सायंकाले चतुर्वादनवेलायां समागमो निश्चितप्रायः समभूत्। इत्यनायासेन कौमुद्या अध्ययनं सम्पन्नम्। यत एकतः काशिकावृत्तिसहकारेणापरतश्च माथुरचतुर्वेद-पं०जानकीलालशास्त्रिणां सूत्रवृत्तिपठनेन कौमुद्या अध्ययने न मनागप्यवरोधः संजातः। दुर्बोधस्य फक्किकाभागस्याप्यवगमः पाणिनिसूत्राणामुपस्थित्या स्वयमेव शिथिलीभूतः।

**आर्षग्रन्थानामध्ययने प्राचीनार्षपद्धतेरनुसरणम्**

आर्षगवीषु - अस्मद्देशीयानां कियान् श्रद्धाभरो जजागार इत्यवगन्तुं "वृद्धिरादैच्" इति सूत्रस्य भाष्यसन्दर्भः एतन्महत्त्वज्ञानाय विलोक्यताम् – भाष्यप्रक्रियामनुसृत्य पूर्वपक्षिणा प्रकृतसूत्रस्य वैयर्थ्यं ब्रुवता वृद्धिपदोपादानं निरर्थकमिति शङ्कोद्भाविता तत्र समाधानं पुरस्कुर्वन् भाष्यकारो ब्रूते.......

........................................................................................................

........................................................................................................

.....आचार्यो हि दर्भपवित्रपाणिः शुचौ देशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म तत्राशक्यं वर्णेनैकेनापि अनर्थकेन भवितुं किं पुनरियता

सूत्रेण । एवंविधेन लेखेन भाष्यकारस्य सूत्रकारं प्रति कियती श्रद्धेति विदाङ्कुर्वन्तु विद्वांसः। आचारमूलक एव चायं बहुमानः। विशेषचर्चायाश्चात्र नावसरः। इति दिङ्मात्रमेवोपदर्शितम्। शास्त्रिचरणानां व्याख्याने असाधारणीं प्रतिभामुद्दिश्य मयोपश्लोकितम्—

**मीमांसामांसलान्तःकरणकवलितब्रह्मविद्यावदातः**

**श्रौतस्मार्तक्रियाभूर्भुजगपतिगवीगुम्फनोद्दाममेधः।**

**शास्त्रव्याख्यानमार्गेऽप्यनुपमप्रतिभाकौशलं संदधानः**

**वैदुष्यं वन्दनीयं विलसति सुमते! शास्त्रिवीरेश्वरस्य ।।**

एतल्लेखालोचनेन तदिदं सुप्रतीतं यत् शास्त्रिमहोदयैः सह पितामहानामकृत्रिमः सख्यभावः परस्परं हार्दिकस्नेहाभिषङ्गो महान् प्रीतिभावश्च समभवत्। यदा शास्त्रिणः समये समये-अन्योन्यस्यावासभवने सम्मेलनमभवत् तदा भारतीयप्राचीनाचारानुरूपं परस्परमालिङ्गनं विधायैवोपवेशनं ततश्च कुशलक्षेमादि-जिज्ञासापूर्वकं परस्परमालापः प्रारभत। इदं च दृश्यं बाल्ये वयसि गृहस्थितेन मया प्रत्यक्षीकृतम्। अयं च सौहार्दसद्भावो यथावसरं प्राचलत्। तदित्थं पारिवारिकसम्बन्धादेव मत्पितृचरणैः शास्त्रिसविधे व्याकरणसिद्धान्तकौमुद्या अध्ययनं विहितम्। तदानीं महाराजाकालेजः साम्प्रतिके महाराजाहायरसेकण्डरीविद्यालयभवने "माणकचौक" नाम्नि स्थाने प्रचलति स्म। राजकीयसंस्कृतमहाविद्यालयोऽत्र राजप्रसादस्य सम्मुखम् संप्रति विधानसभाभवनसम्मुखमवस्थिते भगवतो रामचन्द्रस्य मन्दिरे - एव स्थितोऽभूत् योऽद्यापि तत्रैव कार्यरतोऽस्ति। शास्त्रिचरणानां समयबद्धः कार्यक्रमः स्वभावानुकूलः समभवत्। यद्येवं नाभविष्यत्तदा विद्यालयातिरिक्तसमयेऽपि नियमितमध्यापनकार्यं कथमिव समाचरिष्यत्? अत्रास्योल्लेखः एवमभिप्रायेण क्रियते यत् समयस्य सदुपयोगस्तेषामभीष्ट आसीत्। अस्मत् पितामहैश्चातुर्वर्ण्यशिक्षायास्त्रिवर्गशेषप्रकरणे विशेषतो विद्यार्थिनां कृते "अये वृथालापकथाप्रसङ्गैर्न यापनीयः समयो ह्यमूल्यः" इति समयस्य वृथायापनं लोकयात्रायां प्रतिषिद्धमित्युद्घोषितम्। शास्त्रिभिः कालेजशिक्षणकार्यमनुतिष्ठद्भिः रिक्तान्तरेषु अध्ययनार्थिनश्छात्रानाहूय तत्र तेऽध्यापिताः।

एवंविधेऽध्ययनक्रमेऽनेके प्रतिभावन्तस्तत्रोपस्थाय स्वकीयं विभिन्नविषयाध्ययनमकुर्वन् । तेष्वेवान्यतमोऽस्मत्पितृचरणोऽप्यासीत् येन तदन्तिके व्याकरणमधीतम् ।

उषःकालादारभ्य रात्रिशयनपर्यन्तं शास्त्रिणां सर्वोऽपि दैनन्दिनकार्यक्रमः समयविभागेन सह सम्बद्धो बभूव । स्वभावतोऽमी समयप्रतिबद्धा आसन् । यावान् कालो यस्य कृते नियतस्तावान् तत्रैवोपयोजनीयः । तत्र वैषम्यमशोभनमरुचिकरं चाभवत् ।

यदा मयाध्ययनं प्रारब्धं तदा शास्त्रिणो राज्यसेवातो गृहीतावकाशा आसन् । सर्वविधैर्लौकिकबन्धनैश्च मुक्ताः स्वातन्त्र्येण केवलं देवोपासनेन स्वाध्यायेन संयुक्ताः कतिपयपूर्वतोऽनुवृत्तान् शिष्यान् व्याकरणं दर्शनादिकमध्यापयन् । मदीयमध्ययनं तु सर्वथा तदधीनमेवाभवत् । प्रातः सायं च मामकीनं गुरुगृहोपस्थानमावश्यकरूपेण नियतमासीत् । मध्याह्ने द्विवादनतो विश्रामानन्तरं व्याकरणपरीक्षायां नियतानां ग्रन्थानामध्यापनं प्राचलत् । तत्र यथाक्रमं शब्देन्दुशेखरः वैयाकरणभूषणसारः परमलघुमंजूषा वाक्यपदीयादिकमेकैकशः पाठयामास । चतुर्वादनात परतस्तेषां स्नानसन्ध्यादीनां सायंकालिकं कर्तव्यजातं निष्पन्नमभवत् ।

गुरुचरणानामियं मान्यतासीद् यदार्षग्रन्थाः सन्ध्योपासनादिकं विधायैवाभुक्तेनैवाध्येत्रा पठिताः प्रतिफलन्ति । तेषामिदं कथनं वस्तुतश्छात्राणां प्रतिभोदयायातितरामुपकारकम् । सन्ध्योपासनादि सायंप्रातः क्रियमाणाः परेमेश्वरोपास्तिरूपाः । यत्र भगवद् रामकृष्णादयोऽपि बद्धादराः बभूवुरिति पुराणभारतादिपर्यालोचनया सुप्रतीतं तावत् । ऋषीणां चेयमभ्यर्चनापद्धतिः काश्यादिषु विद्यातीर्थेषु चिराय प्रवृत्तासीत् । अयं च गुरुपरम्पराप्रवर्तितो मार्गः वर्णाश्रमपक्षपातिभिरद्याप्यनुष्ठीयत एव । "अहरहः सन्ध्यामुपासीत" इत्यादिश्रुतिवचनञ्चात्रार्थेऽनुगमकम् । गुरुजनानुमोदितश्चायं क्रमः श्रेयस्कामैरद्यावधि परिपाल्यते ।

महाभाष्यस्याध्ययनप्रारम्भे गुरुः शुचौ देशे आसनमास्तीर्य तत्र च समुपविश्य वैदिकं शान्तिपाठं विधाय गुरून् नमस्कृत्य पाठमारभते स्म । तत्-

सम्मुखे स्थितः शिष्योऽपि गुरुणा सह शान्तिपाठमाचरन्नधीयीत। भाष्यस्याध्ययनसमये मयाप्येष क्रमः परिपालितः। पाठसमाप्तौ च पुनः पूर्वोद्दिष्टः शान्तिपाठः कर्तव्यः। अनेन विधिना पाठित आर्षग्रन्थः फलेग्रहिर्भवति। पाठारम्भे कृते यदि कश्चित् संलापाय तत्रागच्छेत् तर्हि सः पाठसमाप्तेः प्रतीक्षां कुर्वन् मौनी तिष्ठेत् मध्ये व्यवच्छेदं न कुर्यात्। ममाध्ययनकाले स एष क्रमः परिपालितोऽभूत्। बहुष्ववसरेषु मदीयपाठकाले ख्यातनामानो विद्वांसः शास्त्रिणां दर्शनार्थं जिज्ञासोपशमाय च समागता अभूवन् किन्तु शास्त्रिभिः पृथगासने - उपवेष्टुं संकेतिताः — तूष्णीमवतस्थिरे। पाठसमाप्त्यनन्तरमेव तैः सह संलापः समजायत। व्याकरणशास्त्रस्योपोद्घातः...... .....यो हि पस्पशाह्निकेति नाम्ना परिचीयते बहुभिरदृष्टार्थैः परिपूर्णः स च कैय्यट - नागेशभट्टव्याख्यानभूताभ्यां प्रदीपोद्योताभ्याम्-उद्घाटितोऽपि स्पष्टप्रतिपत्तये संशयोच्छेदाय चापर्याप्तः यावद् गुरुमुखेनान्तर्निविष्टा भावोपपत्तिर्नविबुध्येत।

अथ पुनरिदं पाणिनिराचार्यस्य लक्षणं प्रवृत्तम् "सिद्धे शब्दार्थसम्बन्धे" इत्यादि भाष्यग्रन्थः तत्त्वतो नैव बुद्धिपथमारोहति यावदौत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः इति मीमांसादर्शनेन प्रतिपादितोऽर्थः ततोऽपि च 'अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्, विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः' इत्यादि वाक्यपदीयोक्तं नावबुध्येत। व्याकरणदर्शनस्याधारभूमिः पातञ्जलं महाभाष्यमेव – यत्र पाणिनिकात्यायनपतञ्जलीनां शब्दार्थनिबन्धनः शास्त्रीयो विमर्शः प्रस्तूयते। अत एव त्रिमुनिव्याकरणमिति औपाधिकं नाम सङ्गच्छते। सर्वेष्वपि दर्शनेषु विशेषतो व्याकरणस्य देशस्य स्वातन्त्र्यकालात् प्राक् देशे प्रौढं पाण्डित्यं संरक्षितुं नवाह्निकेन महाभाष्येन सहाङ्गाधिकारोऽपि पाठ्ये संमिलित आसीत्। इति मया नवाह्निकेन सहाङ्गाधिकारोऽप्यधीतः। यतो "बंगाल संस्कृत एसोशियेशन" प्रवर्तिते व्याकरणतीर्थ-पाठ्यक्रमे अस्यापि समावेश आसीत्। अह्ना निर्वृत्तमाह्निकम् इति व्युत्पत्त्यनुकूलं - आह्निकेति नामकरणं सार्थकतामापन्नम्। अत एव च भाष्याध्ययनस्यार्षप्रकारः स्वतन्त्र आसीत्। तदनुगमनेनैव विद्यार्थिनां प्रौढज्ञानं पाण्डित्यं च प्रादुरभवत्।

## अध्यापनवैशिष्ट्यम्

व्याकरणाध्ययनेऽपि महाभाष्यादारभ्य शेखरभूषणमञ्जूषादिग्रन्थेषु वाक्यपदीये च दर्शनान्तराणामपि विषयाः तत्र तत्र प्रसङ्गानुरोधेनात्र समाकलिताः सन्ति । तेषामावश्यकं विवेचनं यदि ससङ्गतिकं गुरुमुखान्नाव-बुध्येत तदा प्रकरणान्तर्गताः शास्त्रान्तराणां विषयाः उपेक्षिता भवेयुः तदा स्फीतं व्यापकं च वैदुष्यमवरुद्धं भवति । शास्त्रिमहाभागास्तु यावदपेक्षितं शास्त्रान्तराणां विषयवस्तुविवेचनं विधाय सन्दर्भशुद्धिं कुर्वन्त एव पाठनमकार्षुः । अध्यापनवैशिष्ट्यमुद्दिश्य मामकीनं गुरुवन्दनपद्यमत्रोद्धृयते ।

येन श्राव्यत एव पाठ्यत इव व्यापारयोगोऽर्जित-
स्तत्कृत्याश्रयकः स सर्वनिगमः षट्शास्त्रविद्योज्ज्वलः ।
पाराशर्यचरित्रचित्रितयशः शिष्यप्रदेयागमम्
श्रीवीरेश्वरशास्त्रिपादयुगलम् वन्दामहे तन्महः ।।

सहृदयधुरीणा विमृशन्तु क्वेदानीं विविधविद्याविद्योतितान्तःकरणाः सारस्वतसौभाग्यभाजः शास्त्रपारदृश्वानो गुरवः येषां सन्निधिराशीर्वचांसि च वैदुष्यफलदान्यासन् । तदेतदास्तां तावत् ।

## किञ्चित् प्रासङ्गिकम्

शास्त्रिणामध्यापनसम्बन्धिनी चर्चैव मयाऽत्र विशेषरूपेण प्रस्तुता । यतः शास्त्रिभिः सह मदीयो गुरुशिष्यसम्बन्धोऽध्ययनप्रधान एवासीत् । तज्जीवन-सम्बन्धिनीनां व्यवहारपक्षानुगतानां पारिवारिकीणां च सामयिकीनां घटनानां विषये मदीयः परिचयो वस्तुतो दैनन्दिन्या आलेखपठनान्तरमेव संजात इत्यधिकृतरूपेण तत्सम्बन्धे किमपि वक्तुमहमक्षम इति मौनावलम्ब-नमेव वरं मन्ये । तत्र तु लेखकमहोदया एव सर्वथा प्रामाण्यभाजः । अहं तु गतानुगतिकरूपेणैव तत्र सम्बद्धो वर्ते । मदीया प्रवृत्तिरारम्भत एव शास्त्रिणां सविधे केवलमध्ययनोन्मुखी लोकप्रपञ्चबहिर्भूतैवाभवदिति तेषामन्यैः कार्यकलापैरहं निर्लिप्त एवासम् ।

अध्ययनकाले सत्यवसरे समये समये तैः स्वेच्छया यत्किमपि पुराभवं शिक्षाविषयकमितिवृत्तं संस्कृतविदुषां बाह्याभ्यान्तरिकी च मनोवृत्तिः पारस्परिकं सौहार्दं सहयोगश्च केन रूपेणासीदिति स्वकीयेन विश्लेषणेन सह श्रावितं तन्मया लोकयात्रायां व्यवहारज्ञानस्यायमुपदेश इति मत्वा सर्वं सश्रद्धं श्रुतमाकलितञ्च। तैश्च यदादिष्टं तत् यथाशक्ति परिपालितम्।

## योग्यतापरीक्षणम्

शास्त्रिणां शिक्षाक्षेत्रेण सह व्यापकः सम्बन्ध आसीत्। अहं त्वासन्न-सप्ततिवर्षीये वार्धक्ये वयसि तेषामन्तिकेऽध्ययनार्थं संप्राप्त इति पूर्वं निवेदितम्। वस्तुतोऽहं चतुर्थाश्रमिणो गुरुवर्यस्य शिष्योऽभूवम्। परिणते वयसि शरीरशैथिल्यात् लौकिके कार्यसम्पादनेऽनुत्साहः स्वाभाविकः। तथापि सत्यावश्यके शिष्यस्योपयोगः क्रियत एव। एवंविधोऽवसरो बहुशो मयाप्युपलब्धः। पूनानगरात् प्रकाशमानस्य बालगङ्गाधरतिलकमहाशयस्य तिलकपञ्चाङ्गेति नाम्ना दक्षिणभारते सुप्रसिद्धं दाक्षिणात्यानां धार्मिक-पञ्चाङ्गस्य सम्पादकेन ज्योतिर्विदा रघुनाथशास्त्रीपटवर्धनेन एको ज्योतिषविषयको ग्रन्थः प्रकाशयितुमुपक्रान्तः यत्र सायणनिरयणपद्धतीनां ग्राह्याग्राह्यपक्षविषये विचारेण सह पञ्चाङ्गविषयकस्य लेखस्य प्रेषणार्थं शास्त्रिणः प्रार्थिता आसीन्। परं तदानीं तेषां नेत्रज्योतिः क्षीणतामुपगतेति लेखनं दुःशकमभूत्। एतस्मिन् प्रसङ्गे शास्त्रिभिः पटवर्धनमहाशयाय प्रेषितुं ज्योतिषविषयकस्य लेखस्य कृते अहमाज्ञप्तः।

अस्मद्गृहे चास्य विषयस्य चर्चाप्रसङ्गः ज्योतिषग्रन्थानां सम्पादनलेखनादिव्यापारो पूर्वतोऽनुवृत्त आसीदिति – एतद्विषयकं मामकीनं ज्ञानमपि संपर्ककारणात् सूर्यसिद्धान्तादिज्योतिषग्रन्थेभ्यः संजातमभूत्। ततश्च शास्त्रिणां निर्देशानुसारं द्वादशपृष्ठात्मको ज्योतिर्निबन्धो विलिख्य तेभ्यः श्रावितः समर्पितश्च। श्रवणानन्तरं विषयसंयोजनं मदीयां संस्कृतलेखसरणिं च प्रशशंस। स लेखः पटवर्धनाय संप्रेषितः। स च मुद्रितो न वेति नाहं जाने। एवमेव काशीहिन्दूविश्वविद्यालयस्याचार्यपरीक्षायां निर्धारितस्य शास्त्रीयस्य

निबन्धस्यामी परीक्षका आसन् स निबन्धोऽपि मद्द्वारेण श्रुतः परीक्षितश्च । गोपनीयेऽस्मिन् कार्येऽपि स मयि विश्वस्तो बभूव ।

## द्रव्यप्रधानस्य परिग्रहस्य परित्यागः

स एष महामतिः स्वयौवनकालादेव द्रव्यादिपरिग्रहणं प्रतिषिद्धवान् केवलमुपायनरूपेण शिष्यवर्गेण निवेदितं प्रेम्णा स्वीचकार । मयि तु तेषामेतावान् स्नेहभरोऽभूत् यत् कदाचित् स्वेच्छया कदाचित् संकेतेन चानीतो फलादिकस्योपहारः सर्वदैवानुमतः । इमां च तेषामनुकम्पामेव मन्ये । अज्ञातकुलशीलेन जनेन केनापि व्याजेन स्वार्थेन वा उपहृतं वस्तुजातं द्रव्यादिकं चोग्रो भूत्वा सर्वदैव बहिश्चकार । धर्मानुकूले चाचरणे व्यवहारे च तस्य भूयान् पक्षपातः समभवत् । साम्प्रतिकेऽस्मिन् काले विरला एव केचन धर्मभावनाया उपदेष्टारः ।

## शास्त्रिणां सभाजनार्थं विदुषां समागमः

जयपुरस्थाः स्वतन्त्राः विश्रामवृत्तिभोगिनः राज्यशिक्षाविभागे कार्यरताः विपश्चितः नागरिकाः श्रेष्ठिनश्च समागत्य शास्त्रविषयिणीं लौकिकीं च जिज्ञासां प्रस्तुय स्वस्व सन्तुष्टिमकुर्वन् । एवमेव राजकीयाधिकारिवर्गोऽपि शास्त्रिणां परामर्शमुपलब्धुं समये समये सम्पर्कमकरोत् । एवं शास्त्रिणां केचन व्यावहारिकबिन्दवोऽप्यत्र दर्शितास्तेषां जीवनपरिचयाय ।

## जीवनचरितस्य मूल्याङ्कनम्

एकस्मिन् सामान्ये ब्राह्मणपरिवारे लब्धजन्मनः अर्थादिसाधनविरहितस्य पुरुषस्य बाल्ये वयस्येव पित्रोर्वियोगमापन्नेनानेन केवलेन स्वपुरुषार्थैकशरणेनाद्वितीयविद्यावैदुष्यसम्पदमर्जयित्वा विषमां सांसारिकीं स्थितिं स्वकीयबुद्धिकौशलेन तीर्त्वा गृहस्थाश्रमस्य सुखमुपभुज्यायुषश्चतुर्थभागे गार्हस्थस्य दुःखोन्मीलिते संपातेऽपि स्थितप्रज्ञः स्वकीयेन धर्माचरणेन नैतिकेन सामाजिकेन च कर्तव्यकर्मणा सर्वथा - अविचलितोऽपरिग्रहवृत्त्या जीवन् विद्यादानेन सह स्वजीवनस्य साफल्यं विधायोपरतः । एतादृशाः परोपकारपरायणा भारतीयसंस्कृतेः धर्माचरणस्य च परिपालका अनुकरणीयचरिता अङ्गुलिगणनीया एव

भवन्ति महापुरुषाः। तेषां चरित्रेण व्यवहारेण चानुशासनस्य लोकजीवनस्य च कृते कियती प्रेरणा समुपलभ्यत इति सर्वजनसमक्षम्। इयमेव चास्य जीवनचरित्रस्योपलब्धिः येन लोके व्यक्तिविशेषस्य स्थाणु यशः प्रसरति। तत एव च 'गुणाः प्रियत्वेऽधिकृता न संस्तवः' इति कविसूक्तिः सङ्गच्छते।

अत्रेयं प्रकृतबन्धसम्बन्धितमष्टकं यथायथं पाठकानां परिचयाय पुरस्क्रियते।


राजस्थली संस्कृतसङ्गमस्य
निदेशकश्लाध्यपदेऽभिषिक्तः।
प्रभाकरोऽन्यः प्रतिभागुणैर्यः
प्रभाकरः शास्त्रिपदाभिभाष्यः॥ १॥

यः प्राच्यविद्यामधिगम्य गुर्वीम्
तथाङ्गलभाषां विविधोपचाराम्।
कार्यात्मना देवगिरां प्रकर्षम्,
संवर्धयन्नेष धिनोति चेतः॥ २॥


स राधिकाकृष्ण इति प्रतीतोऽ-
ध्यक्षः स्थितः संस्कृतसङ्गमस्य।
आराधयन् सोऽपि च देववाणीम्
कर्तव्यभावाभिमुखोऽस्त्वजस्रम्॥ ३॥

साहित्यमर्मज्ञतया प्रसिद्धः
स पण्डितेन्द्रो जगदीशशर्मा।
यो लेखबद्धामकरोद् गुरूणाम्,
तल्लोकयात्राश्रितजीवनीं ताम्॥ ४॥


तत् कीर्तिशेषस्य गुरोरतीत-
मुच्चावचं जीवनवृत्तजातम्।
पठन्तु विज्ञाः सकलं तदेतत्
विद्यानिधेस्त्याग-कथावदानम॥ ५॥



वानप्रस्थाश्रमं याताः श्रीवीरेश्वरशास्त्रिणः ।
सर्वशास्त्रेषु निष्णाता राजन्ते चित्रसंस्थिताः ।।



सव्येऽस्ति बदरीनाथस्ततः प्राक् श्यामसुन्दरः ।
वामे चन्द्रधरो यस्य स आस्ते गुरुतल्लजः ॥



भद्रासने गुरुर्भाति श्रीगङ्गाधरो स्थितैः ।
सव्ये युगलगोविन्दौ वामे सूर्यो जगत् प्रभुः ॥

अन्तेवसन् तत्करुणाभिषङ्गात्,
गङ्गाधरोऽसौ समधीतविद्यः ।
गुरोः प्रमोदाय विशिष्य तेन
सम्प्रस्तुतस्तच्चरितप्रबन्धः ॥ ६ ॥

भाषाविभागस्य निदेशकोऽसौ,
प्राच्यप्रतीच्योभय नपुष्टः ।
समुन्नयन् संस्कृतभारतीं नः,
शास्त्री कलानाथ चिरं चकास्तु ॥ ७ ॥

आलेखनेऽमुष्य प्रकाशने च
यैरत्र योगो विहितः सुधीभिः ।
कृतज्ञताभावविबोधनार्थं
तेभ्यो महद्भ्यो मम साधुवादाः ॥ ८ ॥

33 सरस्वती पीठ,
ब्रह्मपुरी, जयपुरम्

# वीरेश्वरप्रत्यभिज्ञानम्

□ पं० जगदीशशर्मा साहित्याचार्यः

---

सर्वविद्यार्णवाचामेऽगस्त्यायितमतिक्रमः ।
दक्षिणाशो न कस्य स्याद्वन्द्योऽसावुत्तराश्रयः ॥

विद्याव्रातबृहस्पतीन्सुरगवीसंधुक्षणैकव्रता -
न्वेदाभ्यासतपःपवित्रवपुषो भालोल्लसद्वर्चसः ।
विद्वद्वृन्दमधुव्रतावलिवृतांस्तुर्याश्रमे संस्थिता -
ञ्छ्रीवीरेश्वरशास्त्रिणो गुरुवरान्स्वान्ते श्रये सन्ततम् ॥

अन्वय-संस्तवः

अम्बरमणिजिगीषयेव विन्ध्याहार्योन्निनीषावष्टम्भननिष्णातमैत्राव-रुणिविहितसनातनावासाया आशायाश्चूडामणीयमानमुपवर्तनं काञ्चीमण्डल-न्नाम विद्योतते ।

तत्र मूलकोडेति प्रथिताभिधानो ग्रामो विद्वद्विलासविलसितोऽद्यापि पूर्वसंचितसुकृतसमवायं प्रकाशयन् विराजतेतराम् । अत्र हि वडम - औत्तर-पदसङ्केतिते द्रविडान्वये निगमागमनदीष्णधिषणानां सोमपायिनां

दीक्षितानामन्वये कृष्णयजुर्वेदतैत्तिरीयशाखाध्यायिनो वत्ससगोत्रा भार्गवच्यवनाप्नुवानौर्वजमदग्निप्रवरा धृतविग्रहा वेदा इव शरीरिणः पुमर्था इव सङ्घीभूताः समुद्रा इव चतुर्दिगीशावतारा इव स्मरणीयचरिताः कलितदिव्यदेहाश्चतस्रो विद्या इव भगवतो नारायणस्य चतुर्व्यूहा इव प्रख्यातपाण्डित्या अरुणाचलयज्ञेश्वरकृष्णसुब्रह्मण्य-दीक्षिताह्वयाश्चत्वारो मनस्विनो यज्ञपुरुषस्य चत्वारो बाहव इवाभ्राजन्त ।

यज्ञेश्वरदीक्षितान्ता निखिला एव पञ्चविंशतिपुरुषेषु सोमपीथिनो याज्ञिका इदमीयकुलालङ्करिष्णवोऽविद्यन्त । त्रिदशालयमुपयाते यज्ञेश्वरदीक्षिते कृष्णसुब्रह्मण्ययोर्भ्रात्रोरन्यतरः कनीयान् भ्राता सुब्रह्मण्यदीक्षितः कृतोपवीतिरात्मग्राम एव घनपाठिवैदिकविद्यालये तैत्तिरीयशाखाया द्वयशीत्याख्यातसंहिताब्राह्मणारण्यकग्रन्थांश्चतसृभिः समाभिरध्यगीष्ट ।

अथ कदाचित् सार्कं सतीर्थ्यैरसाववलोकयितुमना रथोत्सवं गुरुं व्रजन्तमनुवव्राज काञ्चीनगरीम् । दशदिवसानध्युष्य तत्रावसिते रथोत्सवे दशसहाध्यायिछात्रानादायार्णवाभ्यर्णावस्थितं चन्नपट्टननामधेयं नगरमेकं दिदृक्षुरयं प्रतस्थे ततः । चन्नपट्टनदर्शनकुतूहलापगमानन्तमुदचिरोधादेव चातुरीसम्पिपादयिषया तैलङ्गोत्कलवङ्गमिथिलापाटलीपुत्रगयाप्रदेशेषु बम्भ्रम्यमाणा अखिला एवामी विद्यार्थिनो विशिष्टविद्यार्जनवाञ्छया शारदाविलासविलसितां काशीमासेदुः ।

अन्यतश्चानवलोक्य तत्रैतान् सहागतानन्तेवासिनः समचिन्तयन् गुरुवर्या यत् सकला एव स्वावासं प्रतिनिवृत्ताः स्युरिति । साम्प्रतिक - राजस्थानराजधान्या जयनगर्याः प्राक्तनराजधान्या अम्बापुर्या अधिपतिस्त्रिविक्रम इव विक्रमशाली वङ्गमगधादिदेशविजेता सुप्रसिद्धोऽवदातयशा मानी मानसिंहो विश्वनाथपुण्यधामतया काश्यां सुरस्रोतस्विन्याः क्षेमेश्वरघट्टाभिधे पावनप्रतीरे निजनाम्ना मन्दिरमेकन्निरमापयद्दीनानाथादिनिवासार्थम् । यस्मिन्नेकः सुविशालो जलाशयः सर्वतश्चैनं द्विकक्षा नवतिप्रकोष्ठाः निवासिजनसर्वविधसुविधायै वेविद्यन्ते स्म । येषामन्यत्र कुत्रापि गतिर्नास्ति तेषां वाराणसी गतिरिति निभालयन्तो दाक्षिणात्या अमूनेव मानमन्दिर-प्रकोष्ठानधिवसन्तः सहजसुखेन विद्याध्ययनव्यासक्ताः समतिष्ठन्त ।

एषु केचन 'ब्राह्मणेन निष्कारणं षडङ्गो वेदोऽध्येयो ज्ञेयश्च' वाक्यमेतदनुसरन्तः स्वीयं मुख्यं कर्म वेदाध्ययनमभिजानन्तो घनान्तवेदानध्यगीषत । अन्ये च कतिपये विद्याभ्यासक्तचेतसः शब्दशास्त्रतर्कशास्त्र-ज्यौतिषसाहित्यादिविषयानध्यैषत, कतिचन च लोकसेवाहेवाकिनश्चिकित्साशास्त्राध्ययनसौलभ्यमलभन्त । समग्रोऽप्यध्येतृवर्गो मधुकर्या वृत्त्या जीवनयात्रां निर्वहन् द्वादशवर्षाणि यावदाहोस्विदितोऽप्यधिकहायनान्यध्युष्याध्ययनेऽवसिते स्वस्वदेशानधिगम्य यथाविधि समावर्तनसंस्कारान्निर्वर्त्य गृहस्थाश्रमोन्मुखोऽवीमूतीद्धासरावसानेकुलायाभिमुखद्विजयूथमिव । कतिचन प्रतेदिनगङ्गावगाहनजनितापूर्वपुण्यप्रेप्सया काशीमेव स्वावासमचीकरन् सदाशिवसन्निधिकामा ज्ञातास्पदताहेतोः ।

एतेष्वन्यतमो दाक्षिणात्यः सुब्रह्मण्यदीक्षितोऽमुष्मिन्नेव मानमन्दिरे परिकल्पितवासो घनान्तं स्वशाखीयं वेदं न्यायं साहित्यञ्चाधिजगे । महाभागस्यामुष्य सहाध्यायिष्वन्यतमो रामशर्मा शब्दानुशासनं ज्योतिषं त्रिस्कन्धं कर्मकाण्डं साहित्यञ्चान्यः कृष्णशर्मा तैलङ्गश्चायुर्वेदं सङ्गीतं कुलक्रमागतां वेदशाखां नृसिंहशास्त्रिणोऽपरे सतीर्थ्या अपि साङ्गं वेदं षड्दर्शनीं सम्यगवगत्य परां प्रवीणतां प्रपेदिरे । तत्तदागमाधिगतागाधपाण्डित्या इमे महत्या प्रतिष्ठया सम्मानेन च जीवनं यापयामासुः । मर्यादापुरुषोत्तमस्य भगवतो रामचन्द्रस्य जन्मभूमेरयोध्याया अधिपतिः श्रीदर्शनसिंहः श्रुतविविधशास्त्रनैपुणीको महता निर्बन्धेन रामशास्त्रिणः समाहूय राजधान्यां ससंस्कारं राजगुरुपदे प्रतिष्ठापयामास । सर्वातिशायिपदप्रतिष्ठिता एतेऽनवरतशास्त्रपर्यालोचननिरताः शेषमपि स्वजीवितं रामाराधनपरास्तत्रैव निवसन्तो गमयामासुः । कृष्णशास्त्री तैलङ्गस्तु सतत-शिवोपासनाप्रवणतया विश्वनाथसान्निध्यमाजिहीर्षुरत्रैव पाणिगृहीतीमविन्दत । ग्वालियर-परिवृढ-श्रीजियाजीरावमहोदयनिर्मापितं श्रीराधाकृष्णमन्दिरमधितिष्ठतानेन शिवपुर्यां काश्यां वैद्यकक्रियया प्राभातिकैर्भजनैश्च महती ख्यातिरर्जिता । पुत्रानन्तेवासिनश्च लोककल्याणकरं चिकित्साशास्त्रमध्यापयन्नन्तिमे वयसि वर्तमानः काशीवासमत्रैव चर्करीति स्म ।

अस्मदीयचरितनायकपिता सुब्रह्मण्यदीक्षितोऽपि कर्मकाण्डकुशलतया ऋत्विक्कर्मणि प्रवृत्तः काश्यां विश्रुतयशाः समुपलब्धगृहस्थाश्रमसुखोपभोगतया सर्वशास्त्रनिष्णातधियो धिषणाधिषणदेशीयस्य नानाविधशास्त्रेषु परःशतग्रन्थरचयितुरप्पयदीक्षितस्य षष्ठपुरुषवर्तिहरिशङ्करदीक्षितस्य दौहित्रीं वञ्जटङ्ककृष्णशास्त्रिसुतां यथाविधि लक्ष्मीनामधेयामुपयेमे ।

पाणिग्रहणानन्तरमपयाते बहुतिथेऽनेहसि प्रथममेककन्यया जननमग्राहि । मातृगर्भे विंशतिमासपर्यन्तमुषित्वा जातमात्रैव या दिवं प्रयाता । वासरेष्वेतेषु श्रीसुब्रह्मण्यदीक्षितः स्वकीयसारस्वतज्ञानवैलक्षण्यमापादयितुं पीताम्बरामुपासाञ्चक्रे ।

समाप्ते पुरश्चरणे चिकीर्षितशान्तिसमनुरूपवसुसम्प्राप्तिविरहान्मानसं व्याकुलतासाम्राज्यावृतमवर्तीत् । साधनान्तरमनभ्युपगच्छताऽहल्यादेवीनिर्मापितधर्मशालामधिवसन्तं कञ्चन योगिनमुपगम्य तदादिष्टयोगाभ्यासबलेन शान्तिरलभ्यत यथाकथञ्चन । चिरपरया दुहित्रा जन्माबाप्यानन्दितो गृहस्थगणः । चतुर्वर्षव्यतिक्रमणानन्तरमपि कन्याननमेव हर्षातिरेकाय नालमभूत् । अस्मिन्नेवावसरे श्वशुरस्यास्य सप्तलक्षमिता सम्पत्तिरपि दुर्दैववशात् सहसैव विलयमयात् ।

अष्टवर्षदेश्यायाः श्रीसुब्रह्मण्यदीक्षितस्य ज्यायस्या आत्मजाया गङ्गाकुमार्याः पाणिग्रहणसंस्कारो जयपुरराजगुरुणा कामनाथशास्त्रिणा सार्धममुष्मिन्नेव वत्सरे समपद्यत ।

परम्पराप्राप्तनिम्बार्कसम्प्रदायदीक्षिता अम्बापतयः स्वगुरूणां निम्बार्काचार्याणामनुदिनदर्शनलालसमानसास्तेभ्यः स्वाराध्यभगवन्मन्दिरं निर्माय तत्र भगवत्प्रतिमां प्रतिष्ठाप्य तन्निवासार्थं मन्दिरसंलग्नं राजगृहान्नातिदूरमेव विशालं भवनं प्रादुर्जयपुरे । कालचक्रस्य परिवर्तनशीलतया विवेकी बुद्धिमानपि जयपुरमहाराजो रामसिंहः शैवमतावलम्बिवरुशीरामव्यासस्य कुचक्रे पतंस्तन्मतावलम्बितयाऽन्यसम्प्रदायाचार्यानुत्पीडयामास । महाराजकृतोपेक्षामात्मापमानमेव मन्वानाः सर्वेऽपि सम्प्रदायाचार्या विहाय श्रीसर्वेश्वरशरणदेवं निम्बार्काचार्यं श्रीदेवविग्रहानपि सहैव नीतवन्तः । नगरं

परित्यज्य गतोऽपि निम्बार्काचार्यो भगवन्तं गोपीजनवल्लभं मन्दिर एवातिष्ठिपत्।

अस्मिन्नेवानेहसि ब्रह्मपुरीस्थद्रविडकाशीनाथशास्त्रिकनिष्ठपुत्रो मन्वाजीत्यपरनामधेयः कामनाथशास्त्री ललितासहस्रनामस्तोत्रपाठत्रिपुरसुन्दरमन्त्रजपप्राप्तसिद्धिः जयपुरमहाराजश्रुतिपथमापेदे।

जयपुरागमनायानेकशोऽनुरुद्धोऽपि निम्बार्काचार्यः पुनरावर्तितुन्नैच्छत्तदा कामनाथशास्त्रिप्रभावितो महाराजरामसिंहो निम्बार्काचार्यपीठाधिष्ठितचरं गोपीजनवल्लभमन्दिरमधिकारिरहितमवलोक्य सन्तप्तमना द्वाविंशत्यधिकैकोनविंशतिशततम - पंचविंशत्यधिकैकोनविंशतिशततम-विक्रमाब्दयोरन्तराले सिद्धायास्मै सर्वाधिकारसम्पन्नं गोपीजनवल्लभमन्दिरं समुपाहृतवान्।

स्वल्पैरेव वत्सरैरेतत्प्रभावातिशयाविष्टो जयपुरपुरेन्द्रोऽमुष्मादात्तदीक्षो द्विनवोत्तरैकोनविंशतिशततमे वैक्रमाब्दे राजगुरुपदव्या ससम्मानं भगवन्नैवेद्यार्पणसुविधायै ग्रामभूमिदानादिभिश्च ससत्कारमलङ्कृत्य समभ्यर्चयत्। ततः प्रभृति कामनाथशास्त्री राजगुरुपदेन सर्वैरेव व्यवाह्रियत।

अतिक्रान्ते च काले राजमहिष्या राष्ट्रकूटवंशजया बहुशोऽनुरुद्धच कामनाथशास्त्रिधर्मपत्नी श्रीमती गङ्गादेवी तामदीक्षत।

सुब्रह्मण्यदीक्षितस्य ज्येष्ठात्मजाया जयपुरराजगुरुकामनाथशास्त्रिणासमुपयमनानन्तरं शास्त्रसंख्यातपञ्चपितृष्वन्यतमस्य पितृकल्पस्यावमानन्न श्रेयसे कल्पेत शास्त्रादेशातिक्रमणञ्च पापायेति मन्यमानेन "दधिघृतमधुलोभान्मासमेकं वसेच्चेद् भवति हि खरतुल्यो मानवो मानभङ्गः," "अतिपरिचयादवज्ञा सन्ततगमनादनाकरोभवति," वचनान्येवंविधानि स्मारं स्मारं श्वशुरालयनिवासमनीहमानेनापि वसतिमुररीकृत्यागतिकतया तत्र स्वतन्त्राध्ययनाध्यापनादिकर्मभिरात्मजीवनयात्रानिर्वाहानुरूपं द्रविणजातमर्जयित्वा वचनीयतयात्मा नालिप्यत।

**शास्त्रिमतल्लिकानामुद्भूतिः**

तुरीयगर्भस्थितिविलोकनजाततृतीयबालिकाजन्मशङ्काकुलितचेताः—

कन्येति जाता महती हि चिन्ता,
कस्मै प्रदेयेति महान् वितर्कः ।
दत्ता सुखं प्राप्स्यति वा न वेति,
कन्यापितृत्वं खलु नाम कष्टम् ।।

ध्यायंध्यायमिदमीयार्थंजातमात्मनः स्वल्पीयसीं सम्पत्तिञ्च विगणयन्न-विवाहितकन्यासद्भाव-व्याकुलीभावमाप्नुवन् चिररात्राय बालेन्दुवदनदर्शन-लालसः सुब्रह्मण्यदीक्षितो भेषजान्तरमनीक्षमाणश्चिन्तामयचिकित्सायाः स्वगुरुं (परिव्राजकं)समया समुपातिष्ठत । चिन्ताकारणश्रवणसमकालमेव तत्प्रशमन-साधनमुदितवान्गुरुर्यत्त्वया मध्याह्नारम्भसमये मणिकर्णिकाघट्टमुपेत्य प्रतिदिनं गङ्गामवगाह्य माध्यन्दिनं कर्म तत्रैवानुष्ठातव्यम् ।


समाप्तिमुपगते च तस्मिन्नैकपात्रे जलमादायात्मवीरेश्वरमन्दिरमवाप्य तेनैव गङ्गाम्भसामिषिच्याभ्यर्च्य च तं स्कन्दपुराणान्तर्गतकाशीखण्डोक्तवीरे-श्वरस्तोत्रस्य पाठोऽनुष्ठेयः । प्रतिदिनमेवंविधानेऽनुतिष्ठति भवति नास्ति कोऽपि विचिकित्सावकाशोऽभिलषितलाभे । परिव्राजकोक्तावतिशय-श्रद्धालुर्दीक्षितमहाभाग एतन्निर्दिष्टविधानमनुदिनमनवरतं यथाविधि सम्पादयन्नास्त ।

इत्थङ्कारमनुष्ठानमाचरतोऽस्य व्यपगतेऽब्दद्वये षडिन्दुनिधिभास्कराब्द-(1916) मिते विक्रमसम्वत्सरे नभस्यसितसप्तम्यां शनिसंयुतायान्निशीथा-नन्तरं – सम्प्राप्तायामष्टम्यां तिथावनुराधानक्षत्रचतुर्थचरणासन्नावसितौ पुत्ररत्नमेव जनुषा कुलममलमलञ्चकार । शास्त्रप्रतिपादितविधिना जातकर्म-संस्कारोऽक्रियत जनकेनास्य जातस्य ।

"एकादशेऽहनि पिता नाम कुर्यात्" धर्मशास्त्रीयं वाक्यमेतदनुसरता "घोषवदाद्यन्तरन्तरस्थं त्रिपुरुषानूकमनरिप्रतिष्ठितं द्व्यक्षरं चतुरक्षरं वा कृतन्नाम कुर्यान्न तद्धितं तद्धि प्रतिष्ठिततमं भवति" इति शास्त्रमर्यादामनति-क्रमता नामकरणकाले वीरेश्वरानुकम्पामभिध्यायता तातेन देवाभिधानेनैव जातशिशोरभिधा व्यधीयत ।

जन्मकालिकग्रहस्थितिस्वैवङ्कारमविग्रत । दिनाङ्का:–4 सितम्बर 1849 ई. सूर्योदयादिष्टघटयादिकम् 47/0 सूर्यः 4/18 लग्नम् 2/10–

**जन्म लग्नम्**



गुरोः केन्द्रस्थित्या शुष्कराशिगतत्वात् देहकार्श्ययोगः, लग्नेश्वरो बुधः शुष्कराशिसिंहराशिस्थितोऽतो देहकार्श्ययोगः, देहकार्श्ययोगस्य स्वल्पत्वात् देहपुष्टियोगानामाधिक्यात् देहपुष्टियोगः प्रबलः। शुभराशिमिथुनलग्नसत्वात् पुष्ट–देहयोगः, जन्मलग्ने गुरुस्थित्या पुष्टदेहयोगः जन्मलग्ने बलवतः शुभग्रहस्यास्थितिरतो देहपुष्टियोगः। तृतीयेशव्ययेशयोः सूर्यशुक्रयोरेकराशिगतत्वाद्धीरयोगः। लग्नस्थितो गुरुर्विशेषदृशा, विद्यास्थानं पश्यतीति व्याकरणविद्योगः। गुरुर्लग्नगतो जातकं ज्ञानिनं धनिनं दीर्घायुषं करोति। धनेशश्चन्द्रो नीचराशिगतः षष्ठस्थानस्थितो धनसङ्ग्रहतत्परं भूलाभान्वितं शत्रुहन्तारं करोति जातकं परं नीचराशिस्थितत्वादधिकधनसंग्रहो न स्यात्। धने केतुस्थितिरपि न शोभना। गुरुः पुत्रस्थानं पश्यति, पुत्रोत्पत्तियोगः परं शनिदृष्टया पञ्चमे न पुत्रसुखं स्यात्। स्थानहानिकरो जीवः स्थानवृद्धिकरः शनिः। यं भावं शनिः पश्यति तस्य हानिं करोति यत्रस्थितिस्तस्य भावस्य वृद्धिं करोति। जीवो यत्र भावे स्थितो भवति तस्य भावस्य हानिर्भवति यञ्च पश्यति तस्य भावस्य वृद्धिं करोति द्वयोः शनिजीवयोः पञ्चमे दृष्टिसत्वाद् द्विविधं फलं जातम्। "ग्रहचतुष्टयादि एकर्क्षगं प्रव्रज्याकरं" अस्य महाभागस्य तृतीयभावे पञ्चग्रहाणां स्थितिः प्रव्रज्यायोगः।

## नयनोन्मीलनम्

सुतजनुषा यावानानन्दथुरतिशयितः समजनि समेषां सम्बन्धिबान्धवानां सुहृदाञ्च स्वान्ते तावानेव जन्मग्रहीतुरर्भकस्य च चक्षुषोरनुन्मीलनादन्धत्वज्ञानजन्मचिन्ताभारो ववृधे चेतसि सम्मदानुभवितॄणाम्।

जातजातकस्य सप्तमे वासरे जन्मतः कुलपुरोहितो दीक्षितस्य मार्गसहायनामा विद्वानाहिताग्निश्चोभावेव समाकर्ण्य सुतोत्पत्तिं वर्धापयितुकामौ "दिष्ट्या वर्धताम्" स्वकीयामोदप्रकाशायैवं श्रीकृष्णशास्त्रिणो "जातमातामहस्य" सदनमासेदतुः। नेत्रज्योतिरभाववतो बालकस्य वदनारविन्ददर्शनं न वामाह्लादं जनयिष्यतीति चिन्ताकुलमानवोदीरितमाभाषितमुपेक्ष्योभाभ्यामेव सुधीभ्यामेकमेव वचनं व्याहृतं विलोक्य विचारयिष्याव इति। निमीलितलोचनबालकमालोक्य पुरोहितो मार्गसहायशास्त्री विद्वानाहिताग्निश्च सममेवोचतुर्युगपदेव देवं सुब्रह्मण्यं स्वदेशागमनान्तरं सर्वदा विसस्मार। तत्कृतदोषप्रभावादेवास्याक्षिणी नोन्मीलतः। साम्प्रतमेवेदमीयदोषनिवारणाय क्रमुकं हरिद्राखण्डञ्च मुद्रयैकया सममेतस्मिन् भ्रामयित्वा कुलदेवप्रीतये पृथगेकतः स्थापयत। समुन्मीलितायामस्य दृशि प्रतिमासं शुक्लपक्षस्य षष्ठीतिथावेतज्जननी कुलस्वामिनः श्रीसुब्रह्मण्यदेवस्यार्चनां व्रतञ्च विदधीतायज्ञोपवीतकालं, व्रते चास्मिन् सप्तमरीचिका एव भोक्तव्याः। व्रतविधानोपदेशसमनन्तरमेव समुन्मिषिते शिशुलोचने। समीक्ष्येमं तात्कालिकं प्रभावं तत्रस्थाः सकला अपि स्त्रीपुरुषाः पुलकिततनवो विस्मिताश्च कुलस्वामिनं सुब्रह्मण्यदेवं ऋषिकल्पं पुरोधसमाहिताग्निं च परस्परं मुहुर्मुहुः प्रशशंसुः। चमत्कृतिचणतामवेक्ष्य कुलपुरोहितस्याहिताग्नेश्च स्तनन्धयमातामहः श्रीकृष्णशास्त्री प्रसवित्री चास्य लक्ष्मीदेवी मातामहश्चामुष्याः श्रीहरिशङ्करदीक्षितः सपरिवारमितरे चोपस्थिताः स्तुतिमाकलयन्तः सुब्रह्मण्यदेवस्य परमं प्रसेदुः।

जन्मनो द्वितीयेऽब्दे जठरामयार्तमेनं बालकं पितुरस्य सहाध्यायी वाङ्गो वैद्यजातीयो विष्णुबाबूनाम्नाख्यातस्तैलङ्गभट्टः श्रीकृष्णशास्त्री च क्षेत्रियरोगादुल्लाघतामनयताम्।

# बाल्यकालः

अक्षरारम्भो जयनगरागतिश्च—पञ्चमवर्षप्रारम्भे मातुलेन (श्री पापाशास्त्रिणा) काश्यामेवाक्षरारम्भो व्यधायि । कतिपयदिवसेष्वपयातेषु सुब्रह्मण्यदीक्षितस्य ज्यायस्याः सुतायाः सीमन्तसंस्कारोत्सवं निर्वर्तयितुकामः कामनाथशास्त्री सम्बन्धिन आत्मीयाञ्जयपुरे जनिष्यमाणसीमन्तमहे सम्मिलितुन्निमन्त्रयाञ्चक्रे । दीक्षितस्तु काश्या बहिर्गमनाभावविहितनिश्चय उपस्थितायामस्यां परिस्थितौ स्वधर्मपत्नीं लक्ष्मीदेवीं कनीयसीं सुतां सरस्वतीमात्मजातं वीरेश्वरञ्च जयपुरमगमयत् ।

कृतप्रस्थाना सापत्या लक्ष्मीदेवी बाष्पयानवैरल्यादध्वनि विन्ध्यवासिन्यां दिनत्रयं तीर्थराजे प्रयागे च षडहान्यध्युष्य शिविकायानेनैव जयपुरागमनायनमपारयत् । एवङ्कारमयमायासमनुभूय जयपत्तनमानर्च्छत् । अधिगतजयनगरा ससुता सुब्रह्मण्यदीक्षितधर्मपत्नी स्वभर्तृप्रातिनिध्येन पितृकुलकरणीयसमस्तमाङ्गलिककर्मणां सम्पादनमन्वतिष्ठदात्मज्येष्ठदुहितृसीमन्तसंस्कारे सानन्दम् ।

सोल्लासं सम्पन्ने सीमन्तमहोत्सवे किञ्चित्कालात् प्रागेव जयपुरस्थसाम्बशास्त्रितनयेन श्रीविश्वनाथशास्त्रिणा साकं कनीयस्या आत्मजायाः सरस्वत्या उपयमने जातेऽत्राल्पवयस्कतयाऽस्याः संरक्षितुमना एनां प्रसूर्लक्ष्मीदेवी हायनत्रयमध्युषितवती ।

शिशोर्वीरेश्वरस्य दृढीभूतेऽक्षराभ्यासे जयपुरस्थिततयाऽत्रैव विद्याध्ययनाभिलाषिणमेनं जयपुरीयमहाराजसंस्कृतपाठशालायां प्रैषयत् कामनाथशास्त्री स्वश्वश्रूप्रेरणया । एतदीयाध्यक्षश्रीरामभजसारस्वतमहाभागानशिश्रियदध्येतुमयममरकोषादीनध्यगीष्ट च ।

### पतङ्गोड्डायनम्

प्रवर्तमानसम्वत्सरे हेमन्ततौ जयपुरनिवासिपञ्चजनानुड्डाययतः श्लक्ष्णसूक्ष्मकर्गदनिर्मितपतङ्गान्निरीक्ष्यान्योऽन्यञ्च "वह काटा वह मारा" इत्याद्युच्चैराक्रन्दतो, बालप्रवृत्तेः प्रकृतिसिद्धतयाऽभिनवे कुतूहले शैशवचापलेन

संवृतो वीरेश्वरोऽपि ततो जोषमासितुं कथङ्कारं प्रभवेन्नाम। स्वकीयसगर्भ्या-कोशादपृष्ट्वैव कमपि तूष्णीं पणकद्वयमन्वहमाहृत्य पतङ्गांस्तदुड्डायनसाधन-सूत्रसमूहञ्चाक्रीणात्। समाप्तप्रायायां मध्याह्नवेलायां प्रासादपृष्ठमधिरुह्य सातिशयं तदुड्डायनसंलग्नोऽवर्तत। पक्षत्रयपर्यन्तन्नैरन्तर्येण क्रममिमं प्रचलन्तं प्रसवित्री प्रासादपृष्ठे पतङ्गोड्डायनात्मकं समालुलोक। भृशं कुपितेयं स्वजामातारं कामनाथशास्त्रिणमुपालभतात्रभवानेव बालकायामुष्मै पणका-न्प्रदायैवंविधक्रीडाकर्मणि प्रवर्तयति। श्वश्रूपालम्भमसहमानः कामनाथशास्त्री प्रत्यवोचन्न मया प्रत्तः कोऽपि कार्षापणः कस्मिश्चनाप्यहनि। कुतोऽयं पणकानानीय क्रीडन्नास्ते चैवन्नैदं किमपि ज्ञायते। दुहितृपतिप्रतिवचनाक-र्णनसमकालमेवात्मपुत्रीमब्रवीत् प्रसूरिदमीयात्मकोषन्निभालय स्वल्पीभावं तु न भजतीति। पालितजनयित्र्याज्ञाऽस्मकोषे भूयसां कार्षापणानान्न्यूनमनुभ-वन्ती तत्कालमेव क्रीडासक्तसहोदरमाकार्यानुयुक्तवती यन्मदीयार्थौघे स्वल्पा एवावशिष्यन्ते कार्षापणा, अपि स्वश्नयसि? श्रुतमुत्तरमोमिति। मदीयसहचर-प्रेरणयाऽन्तरेण पृच्छां प्रतिदिनममुष्मान्निस्सार्य कार्षापणानर्नैषम्। अनापृच्छ्य पणानयनं किन्नास्ति स्तैयम्? अनुयुक्तोऽर्भकः स्वीयं चौर्यमूरीकृ-तवान्। माता बालस्यावृत्तश्च रज्ज्वा पाणिपादमाबध्य रज्जुं च तां लोहकटक आसज्य बालन्निकष नीत्वाधः पातनभीतिमदर्शयतामाकृष्य। आपन्नभीरेष कदापि चौर्यं न करिष्यामीति प्रतिश्रुत्याजीवनमप्रदत्तं किमपि वस्तु नानैषीत्। कृतापराधाङ्गीकरणं भविष्यति च मन्तोरेवंविधस्य कदाप्यनाचरणमिति प्रतिश्रुतेराजीवनं निर्वाहश्चैतद्द्वितयं शास्त्रिवर्याणामा-दर्शशिक्षावित्त।

### उपनयनसंस्कारः

सम्पन्नप्राये सीमन्तोत्सवे वर्षत्रयानन्तरम् "अष्टमे वर्षे ब्राह्मणमुपनयीत", "गर्भाष्टमेऽष्टमेवाब्दे ब्राह्मणस्योपनायनम्," इति श्रुतिस्मृतिविधिवाक्यार्थ-मनुध्याय मुख्यकालातिक्रमणायुक्ततामभिवीक्ष्य व्रतबन्धस्य जयपुरात् सूनुना सममभिप्रतस्थे काशीं संस्कर्तुमिमं माता। तत्राष्टमे वर्षे विद्यमानस्यास्य "वसन्ते ब्राह्मणमुपनयीत" स्मरन् वाक्यमिदं पिता माघवसितपक्षद्वादश्यां

संस्कृत्य व्रतबन्धसंस्कारेण वेदं तदङ्गानि चाध्यापयितुं मनो दधे। श्रावण्यां पूर्णिमायामुपाकर्म कारयित्वा वेदाध्ययनाय प्रवर्तयाम्बभूव।

पापाशास्त्री स्वीयापत्यद्वयस्य पर्यायेणोपनयनोपयमनमहोत्सवयोरायोजनमरीरचत्। सम्मिलितुमस्मिन् महोत्सवद्वये पापाशास्त्रिसमाहूतः साम्बशास्त्री स्वकुटुम्बवर्गेण सार्धं प्रतस्थे काशीम्। द्वयोरपत्ययोः क्रमशो यज्ञोपवीतपाणिग्रहणसंस्कारसम्पत्तौ सत्यां वीरेश्वरं "नैने" इत्युपाह्वबालकृष्णभट्टस्य पाठालये प्रावेशयत्।

**अध्ययनम्**

गुरुपुत्रैः साकमेवाध्ययनं प्रारभत। षण्मासैस्तैत्तरीयसंहिता प्रपाठकत्रयाध्ययनासन्तुष्टान्तरङ्गो मातुलस्ततो वीरेश्वरमपाकृत्य विद्वद्धौरेयस्य "खरे" इत्युपाह्वरामशास्त्रिणः पाठशालायां प्रावीविशत्। वेदाध्ययनस्य "ब्राह्मणेन निष्कारणं षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति" मुख्यतया वेदविदुषः श्रीशङ्करनारायणशास्त्रिद्राविडाद्वेदाध्ययनमारेभे स्वमातुलसूनुनारायणशर्मणा सार्धम्। व्यवहारज्ञानाय व्युत्पत्तये च सप्तमसर्गपर्यन्तं रघुवंशं पञ्चमसर्गावधि किरातार्जुनीयञ्चापाठीत्। गुरुपादानां वार्धकातिशयमनुध्यायन्तः पिपठिषवश्छात्रा अत्रत्यपाठ्यसमाप्तिहेतोरन्यत्र जिगमिषवो गुरुचरणादेशाभिमुखा अभूवन्। एतदभिलषितमभिध्याय वीरेश्वरदीक्षितं सम्बोध्य प्रोचुस्ते यूयमिदानीमोझोपाह्वसरयूपारीणश्रीयागेश्वरशर्मणामभ्यर्णमुपेत्य शब्दानुशासनमधीध्वम्।

**पित्रोरूर्ध्वगतिरध्ययनान्तरायश्च**

अत्रान्तरे गृहीतजन्मा वीरेश्वरभागिनेयो मासत्रयाभ्यन्तर एव दुर्दैवात् कालकवलितो बभूव। इतश्च राजयक्ष्मराजागमननिवेदयिता कश्चन बर्ग्यस्तदीयो गण्डमालो गलन्निगृहीतवान् वीरेश्वरमातुः। सहधर्मिण्युपचाररतः पिताप्येतदीयः सहधर्ममाचरेदित्थं चिन्तयित्वामयं तमेव तत्र सङ्क्राम्य राज्ञा राजयक्ष्मणा शुचिमासशुक्लचतुर्दश्यां सम्प्रेष्य प्रागपवादभियाऽनन्तरञ्च पञ्चमदिवसे ततो दक्षिणायनमुपगते सवितरि नभोमासासितचतुर्दश्यामर्धरात्रे पूर्वाषाढाभे सुब्रह्मण्यदीक्षितं सहचारितां नीत्वाऽपूर्वपुण्यभाजा

भूयतोभयोर्मिथो योगेन परत्र । करकापातेन सस्यसम्पदिवाल्पवयस्को वीरेश्वरोऽनेन वज्रपातेनासह्येन शोचनीयतामितोऽपि पित्रोरौर्ध्वदैहिकक्रियान्निरवर्तयत् सश्रद्धम् । प्रावृषि कलुषितसुरसरिदम्भसि प्रतिदिनमवगाहनेन वारत्रयमिषमासे शीतज्वराक्रान्तो वीरेश्वरः । दैवीभिरेताभिरतर्कितापत्तिभिरध्ययनप्रतिबन्धो बालस्य बोभवीति स्म ।

एतदीयप्रगतिबाधिकाभ्यो विपद्भ्य उद्दिधीर्षवः श्रीरामशास्त्रिपादा हितैषितया जातु मध्यन्दिनात् परतः कदाचन च सायन्तनसमये विविधैरुपदेशैराश्वास्यैनं कथञ्चनाध्येतुं प्रवर्तयन्तः प्रैरयन्व्याकरणाध्ययनमाधातुम् । दैवगतेर्वैचित्र्यादूर्जमाससिताष्टम्यां भगिन्यास्तत्पतेश्चागमनेन मातुलमन्दिरेऽप्याजानेयोत्सवप्रारम्भेण प्रत्यूहायितं पुनरध्ययने गुरुप्रेरणास्रोतसि प्रवहत्यपि ।

## विवाह-संस्कारः

मातापितृविहीनस्यानवाप्तप्रौढिम्नः पालनपोषणादिभारो मातुलमूर्ध्नि समापतत् । भवितव्यताया दुर्निवारतयाऽर्थाभावमविचिन्त्य बौधायनसूत्रानुसारि - कौण्डिन्यसगोत्रिणः क्रमान्तवेदविदो व्याकरणसाहित्यपारगस्य श्रीराजेश्वरशास्त्रिणः कन्योद्वाहचर्चा प्राचलद्वीरेश्वरेण सार्धम् ।

अयं हि राजेश्वरशास्त्री श्रीनागेशशास्त्रिसंज्ञयाऽपि विख्यातोऽभूतत् । एष च शङ्करशास्त्रिणो मैसूरमहाराजस्यान्नसत्राध्यक्ष - श्रीसुब्रह्मण्यशास्त्रिणोऽन्ववायोद्भवः । विवाहस्य द्रविणापेक्षितामनुचिन्त्यात्र वर्तमानया भगिन्या गङ्गादेव्यावेदितं यज्जयपुरनरेशाद्धनं सङ्गृह्य काश्यां प्रेषयिष्यामीति ।

ततश्चैषात्र विधेयनागबलि-शिवप्रतिष्ठाब्राह्मणभोजनवसन्तपूजापण्डितसभादि कार्यजातं निष्पाद्य श्रीकामनाथशास्त्रिणा भर्त्रा भ्रात्रा च वीरेश्वरेण सहिता जयपुरं प्रत्याययौ । प्रतिश्रुतकार्यचिकीर्षया जयपुरमहाराजश्रीरामसिंहं राजमहिषीञ्च सम्प्रार्थ्य सहोदरोद्वाहकार्यनिष्पत्तये रूप्यकाणां पञ्चदशशतीं प्रदाप्य निधिनेत्राङ्काब्जमिते (1929) विक्रमवत्सरारम्भे स्वपतिविश्वासपात्रेण केनचन द्विजानुचरेण साकं सोदरं स्वकीयं मधुमासशुक्लचतुर्थ्यां काशीं प्रापयत् ।

ततश्च धनराशिमधिगत्य सङ्कीर्णभावमन्तरेणाखिलमपि विवाहोपयोगिसाधनं सङ्गृहीतं मातुलादिभिः । चैत्रशुक्लद्वादश्यां बटुमेनं समावर्तनेन संस्कृत्य विद्यमानवर्षस्य माधवापरदलद्वितीयायां भवान्यभिधानया कुमार्या समं पाणिग्रहेण समायूयुजन्मातुलादयः ।

## पुनर्विद्याप्रसक्तिः

गृहीतपाणिगृहीतीं वीरेश्वरं वैशाखशुक्लपक्षे 'खरे' इत्युपाह्वरामशास्त्रि-निर्देशेन पापाशास्त्री व्याकरणशास्त्राध्ययनाय स्वतनूभुवा सह श्रीयागेश्वर-शर्मणोऽभ्यर्णमगमयत् । गुरुपादैरारब्धमुभयोरध्यापनं सिद्धान्तकौमुद्याः शुक्रमासे चोत्तरार्धपाठः प्रारभ्यतास्याः ।

गुरुसन्निधावध्येतुमितरेऽपि कार्तिकशुक्लतृतीयातः समायातास्त्रयो विद्यार्थिनः गणेशशास्त्रिगाडगिलो मौनी भिक्षुशास्त्री तैलङ्गश्चेति । पूर्वापराह्णयोर्युगपदेवाधिजगिरे गुरुभ्यः स्थित्वा चात्रैव गुरुसमक्षमेवाधीत-विषयाभ्यासमचीकरन् । अपयातेऽनेहसि किञ्चित् पञ्चानामेतेषां युगपदेवा-व्ययीभावान्तरशब्दरत्नसहितमनोरमाया गुरुचरणरचित - हैमवतीभूषित-परिभाषेन्दुशेखरस्य कैयटकृतप्रदीपविशिष्ट नवाह्निक-महाभाष्यस्याङ्गाधिका-रभाष्यस्य चाध्ययनारम्भोऽजायत । एतत्पाठावसरे गुरुतनूजो देवकृष्णशर्मा त्रिपाठ्युपाह्वो रामनिधिश्चतुर्भुजशर्मा सारस्वतो द्वाविमौ ब्रह्मावर्तदेशोद्भवौ दाक्षिणात्यौ वीरेश्वरतैलङ्गो नृसिंहतैलङ्गश्चात्मनः पूर्वाध्यायिछात्रपाठश्रवण-मकार्षुः ।

## मध्ये पारिवारिकापत्तिः

अध्ययनसमय एवादसीयमध्यमभगिन्याः कक्षे कश्चन पिटकः संवृत्तः । मासचतुष्टयमेतज्जन्यार्तिमनुभूयासौ भर्तृसमक्षमेव पाञ्चभौतिकीं तनुं तत्याज । गङ्गाधरेण संजातोपयमा श्रीपापाशास्त्रि-दुहिता चतुर्दशवर्षवयस्कै-वापन्नसत्वा नवमे मासि ज्वराभिभूता गूढगर्भेयं नवनेत्रनिधिभूमिते (1929) वैक्रमाब्दे दिवङ्गताश्विनमासे । शोकाकुलमातुलपरिवारेण विजयदशमी-हनुमज्जयन्तीदीपावलि - प्रमुखा उत्सवाः साधारण्येन सम्पादिता न तु महता

समारोहेण । वीरेश्वरदीक्षितस्तु-प्रथमाब्दसत्वाद्विवाहस्य विजयदशम्युत्सवे वासोद्वयेन सत्कृतः श्वशुरादिभिः कोजागरीदिनेऽपि सम्मानितश्च ।

पारिवारिकापत्तिग्रस्तोऽपि "न्याय्यात्पथः प्रविचलन्ति पदं न धीराः" आभाणकमिमं मनसि भावयन् लक्ष्यादविचलन् मातुलसदनेऽदसीयपुत्रेण समं मातुलादेव समग्रामप्यष्टाध्यायीमपठीत् । न्यायबोधिनीसमन्वितं तर्कसंग्रहं नवसर्गान्तं शिशुपालवधं सप्तसर्गान्तं कुमारसंभवं समस्तं मेघदूतमभिज्ञान-शाकुन्तलमुत्तररामचरितं नृसिंह-भारतरामायणचम्पूश्चाधीतवान् ।

गुरुमन्दिरे सशब्दरत्नामव्ययीभावान्तां मनोरमामर्थसंग्रहञ्च परिसमाप्य गुरुचरणाज्ञया "रानाडे" इत्युपाह्व-बालशास्त्रीत्याहितलक्षणानां श्रीविश्वनाथशास्त्रिणां गुरुसुहृदां सकाशाद् व्युत्पत्तिवादं द्वितीयकारकान्तं शक्तिवादं सपरिष्कारं परिभाषेन्दुशेखरं शब्देन्दुशेखरं विषयतावादं नञर्थवादं ब्रह्मसूत्र-शाङ्करभाष्यस्य द्वावध्यायावधीयानावेव प्रथमगुरुभ्यो गोविन्दाचार्यकृत-चन्द्रिकाव्याख्यालङ्कृतं परिभाषेन्दुशेखरं शब्देन्दुशेखरं चारभेताम् ।

तंपमासे रामशास्त्री काशीमासाद्य यागेश्वरशर्मणामपि पाठालये भाष्यपर्यन्तं व्याकरणेऽधीतिनां समेषां परीक्षामुपादाय सन्तुष्टान्तरङ्गः सकलाभिनन्द्य - काशीस्थाः पाठशालाः पण्डितानामुपगम्य परीक्षणं विदधे । स्वसन्देहास्पदानां शब्दशास्त्रविषयाणां प्रश्नापदेशेन पृष्टानामुत्तराण्यवबुध्य तत्रासन्दिग्धतामापाद्यात्मवासास्पदं प्रतिनिवृत्तः ।

एष रामशास्त्री ग्वालियरराज्यमहापण्डितानां राघवेन्द्राचार्याणां शब्देन्दु-परिभाषेन्दुशेखरव्याख्यातॄणामपरा प्रतिकृतिरिव मध्यमात्मजतया विश्रुतः । तपोमासानन्तरं कोल्हापुरवास्तव्यमहाराष्ट्रनायकमण्डली समागत्य कालिदास-प्रमुखकवीनां नाटकान्यभिनीय वाराणसेयविद्वन्मण्डलीः समतोषयत् ।

## मातुलानामुदयपुरगमनम्

वीरविनोदाभिधेतिहास प्रथमभागे महाराणा शम्भुसिंहविषये लिखति—

स्वरूपसिंहाह्वमेदपाटाधिपतौ सन्तानशून्ये परलोकवासितामुपयाते शम्भुसिंह इदमीयकनिष्ठभ्रातृशार्दूलसिंहपुत्रः शराङ्गवसुभूमितेशवीयाब्दस्यै-

कादशमासस्य सप्तदशतारिकाया ( 17 - 11 - 1865 ) मुत्तराधिकारितया प्रतिष्ठापितो राजा राज्यसिंहासनेऽभिषिक्तश्च तत्रत्याप्त - सामन्तवर्गेण सर्वसम्मत्या। विविधविद्याभी राज्यं समुन्नायन् प्रजाहिताकाङ्क्षया व्यराजत। दौर्भाग्येण प्रजाया नन्दयुग्माङ्कन्दुमित - विक्रमवत्सरस्य (1929) तपस्यमासे तदनुसारं नेत्रमुनिवसुचन्द्रमितेशवीये वर्षे (1872) साध्यामयाक्रान्तवर्ष्मा मेदपाटाधिपतिर्महाराणाशम्भुसिंहः श्रीपापाशास्त्रिणं रुद्राभिषेक - चण्डीपाठ-जपाद्यनुष्ठानार्थमाजुहावान्यैरनुष्ठान-कर्मनिपुणैर्मनीषिभिः समेतम्।

आमन्त्रणाधिगममवलोक्य पापाशास्त्री शिवचैतन्यब्रह्मचारिणमपरानपि सप्तैतत्कार्यकुशलविद्वज्जनानादाय प्रातिष्ठतोदयपुरम्। समवाप्योदयपुरः शुभे मुहूर्ते चण्डीपाठाद्यनुष्ठानमारभत। अष्टादशमासावधि प्रचलत्यनुष्ठा-नादावपि महाराजे श्रीशम्भुसिंहे पुरन्दरपुरातिथितां भजति सकला एवानुष्ठातारो राजकीयैरधिकारिभिः सत्कारेण स्वां स्वां पुरीमभिगन्तुं प्रबोध्य धनादिभिर्वाहनादिना प्रहिताः। श्रीपापाशास्त्रीत्थङ्कारं प्रस्थाय ततो बाहुलेयमासान्तं भूमिगुणाङ्क-चन्द्रमितविक्रमाब्दस्य (1931) स्वसद्मानि परावर्तिष्ट।

सज्जनेन्द्रकल्पद्रुमसमर्पणपद्ये वेतालवंशोद्भूतः श्रीशम्भुसिंहः परिचाययति पद्येनानेन—

**श्रीमत्सूदयपत्तनोज्ज्वल-महीरत्नेषु हीरायितोऽ-**
**स्मत्सम्बन्ध-निबन्धमूलपुरुषः श्रीशम्भुसिंहाभिधः।**
**साक्षाच्छम्भुरिवापरः स मभूद्राजा ततः सज्जनो**
**मानी सज्जनवृन्दकैरवनीचंद्रोऽवनींद्रोऽभवत्॥**

मेदपाटाधिपमहाराणाह्वानजातान्तरालान्तरायावरुद्धं पाठं परावृत्तस्ततः पापाशास्त्री पुत्रभागिनेययोः पुनरारब्धवान्। प्रारभत चास्मिन्नेवानेहसि जीर्णोद्धारकार्यमपि स्वावासस्य। कार्ये चास्मिन्नासन्नावसानप्राये भवनस्य शुचिमासे जयपुरराजगुरुश्रीकामनाथशास्त्रिणा विशेषकार्यार्थमाहूतो जयपुरं जगाम। पुनश्चोर्जमासारम्भे काशीं प्रत्यागच्छत्। किञ्चित्कालमेवोषित्वा-ऽग्रहायणिके मासि निरपत्यराजगुरुसमादिष्ट - कार्यसम्पिपादयिषया मातरं

जामातरं विधुरञ्चादाय गङ्गाधरशर्माणं श्रीकृष्णभट्टसमेतो दत्तकपुत्रान्वेषणाय द्रविडदेशं प्रति प्रतस्थे । ज्ञातेषु बालकेषु शुभलक्षणसम्पन्नं कमपि रामाभिधानं बालमादाय भाविनं तत्सम्बन्धिसहितः काशीं परावर्तत ।

अमुष्मिन्नेव व्यतिकरे जम्मूनगरमहाराजाधिराजास्तीर्थयात्रां विदधाना विश्वनाथपुरीमेयरुरात्मानं पावयितुकामाः । तीर्थयात्रायां शास्त्रनिर्दिष्टधर्मादिकार्यप्रवृत्तिपरैरमीभिर्भूमिदेवानामत्रवसतां विदुषां सुरालयानामिहस्थानां सत्कारे जीर्णोद्धारे च चतुर्लक्षमिता मुद्रा व्ययिताः ।

इह च गौडसारस्वतदाक्षिणात्यशारदादेशीयब्राह्मणशताय काश्मीरकौशेयकानि वितीर्य संस्कृतपाठशालाञ्चैकां संस्थाप्य स्वनाम्ना स्वदेशं जिगमिषवोऽभवन् । गमनकालात् पूर्वमेव विद्वत्सम्मानचिकमिषया पण्डितसभामेकां कारयित्वा तत्र तेषां त्रिंशत्या प्रत्येकं तिस्रस्तिस्रः स्वर्णमुद्राः प्रायच्छन् । साम्प्रतमेकस्याः स्वर्णमुद्रायाः प्राप्तिः पञ्चसहस्रकल्पा । सभाध्यक्षाश्च काकारामपण्डितपौत्राः श्रीरामशर्माणोऽवर्तिषत । एतत्कार्यधुर्वहाश्च रानाडे इत्युपाह्वा बालसरस्वतीशास्त्रिणो यागेश्वरपण्डिताश्चाविद्यन्त । सभायामेतस्यामस्मदीयचरितनायकोऽपि स्वर्णमुद्रात्रितयोपहारेणेदम्प्रथमतया सम्मानितः । गुरूणामनुग्रहेण विशिष्टदक्षिणावतीषु सभास्वपि ततः प्रभृति सम्मानभाजनमभूदसौ ।

"आत्मनाम गुरोर्नाम नामातिकृपणस्य च ।
श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः ॥"

इति स्मृतिवचोऽनुसृत्य शैशवे पितरौ नामकरणसंस्कारादूर्ध्वमपि वीरेश्वरं वीरेन्द्रनाम्ना व्याजह्रतुर्ज्येष्ठापत्यत्वात् । अन्येऽपि सर्वे बान्धवादयो वीरुशास्त्रीति व्याहरन् । इतः प्रभृति सर्वैरेव वीरेश्वरशास्त्रीति संज्ञया व्यवजह्रे ।

## बालचेष्टितम्

प्रवृत्तषोडशवर्षस्य पाठशालायामधीयानस्य कश्चन नेपालदेशीयश्छात्रस्तारानाथशर्मा परिहासं विधाय पाणावस्य थूत्कृतवान् । समुपस्थितेऽवसरे

कदाचित्तारानाथशर्मा पणकान्याचितुमेनं करं प्रसारयामास। प्रबलप्रतिशोध-भावनोऽयमपि प्रतिकर्तुंमना हस्तेऽमुष्य निरष्ठीवत्। तत्क्षणमेव नेपालीयश्छात्रो गुरवे न्यवेदयदिदं शास्त्रिकृत्यं निशम्यात्यन्तं कुपितो गुरुः पाठशालायामस्यामध्ययनानर्हस्त्वं निर्गच्छ पाठशालाया अमुष्याः कदापि पुनर्मागमः। एवं गुरुरतीव निरभर्त्सयत्। वीरेश्वरः सद्य समासाद्य वृत्तं वृत्तमिदं प्रियमातुलमश्रावयत्। मातुलोऽप्यन्यस्मिन्दिने प्रातरेव वीरेश्वरमादाय पाठशालायां पुनः प्रवेशायाध्यक्षमहोदयं प्रार्थयत्। प्रत्यवायमाधायागतेऽस्मिन् पुनः प्रवेशः सुलभः। एतदुत्तरमाकर्ण्य प्रवेशयितुमनाः प्रायश्चित्तस्वरूपमप्राक्षीत् पापाशास्त्री। ततो वीरेश्वरः गुरोरादेशानुसारं मणिकर्णिकामवाप्याघमर्षण-विधिना स्नात्वा दशसहस्रगायत्रीमन्त्रजपं सङ्कल्प्य गङ्गाजलेन विश्वनाथम-भिषिच्याभ्यर्चयत्। प्रायश्चित्तावसानेऽघमर्षणमन्त्रोपदेशकस्य साक्ष्यमानीय वीरेश्वरं स्वकीयपाठशालायां पुनः प्रवेशायानुज्ञातवान्। प्रायश्चित्तानन्तर-मध्ययनात् प्रागेव कृत्स्नमौद्धत्यं सर्वथा परिजहौ वीरेश्वरः। गुरुजनश्चिराय साम्प्रतमयमुद्धतभावं न बिभर्तीत्यनुभूय समतुष्यत्।

## मङ्गलकार्यम्

अष्टादशवर्षवयस्कस्य वीरेश्वरस्य स्वसा सभर्तृका पापाशास्त्रिद्वितीय-तनयोपनयनसंस्कारे समगंस्त काश्याम्।

राजगुरुकामनाथशास्त्रिसमाज्ञप्त दत्तकपुत्रान्वेषणपरायणपापाशास्त्रि-समानीतसंपरीक्षित-रामनामबालकस्यैतदीयज्यायान् सोदरो जननी चेदमीया दत्तकविधानमकारयतां यथाविधि। सपत्नीकः कामनाथशास्त्री पुत्रत्वेनाङ्गी-चकार। उपनयनार्हायुष्यसत्वात् काश्यामेवोपवीतसंस्कारमपि सुमुहूर्ते व्यधित पुत्रस्य कामनाथशास्त्री। राजगुरुरयं पापाशास्त्रिज्येष्ठापत्यस्य नारायण-शास्त्रिणो विवाहोत्सवेऽवसिते जगदीशयात्रार्थं प्रातिष्ठत। ततः परावृत्य जयपुरप्रस्थानात् पूर्वमेव भ्रातुरर्थाभावान्तरायमध्ययने शङ्कमाना भगिनी भ्रात्रेऽध्ययनसमाप्ति यावत् प्रतिमासं रूप्यकद्वयदानं प्रतिश्रुतवती। राजगुरु-सहधर्मिणी सा कृतप्रस्थाना काशीतो माधवापरदले जयपुरं सनाथितवती। वीरेश्वरः शुचिमासे धर्मपत्नी-संस्कारं कृत्वा रजोदर्शनशान्तिमकृत।

**तान्त्रिकदीक्षाग्रहः**

एकदाश्विनमासशुक्लपक्ष - नवरात्रदशम्यां माननीयमातुलो वीरेश्वरं निमन्त्रयितुं श्रीविश्वनाथशास्त्रिणं प्रजिघाय। प्राप्ततदावासोऽसौ रहसि स्वोपासनाकक्षमधितिष्ठन्तं विश्वनाथशास्त्रिणं समयाऽऽनेनाभ्यगात्। एष शास्त्री स्वशिष्यमेनं स्वमतप्रवेशायान्वरोधयत्। अनुरोधमनङ्गीकुर्वाणस्यामुष्य हस्तौ निगृह्य विश्वनाथः प्रसभं सुरां पाययितुमियेष। पादद्वयमितस्ततः प्रक्षिपन् वीरेश्वरोऽर्चाकुम्भादिकं छिन्नभिन्नमकरोत्। शिष्यस्य तत् पादद्वयमपि विधृतवान्। दैवयोगादस्मिन्नवसरे सौभाग्यवतीं मातुलानीं दुर्गादेवीमुपस्थितामवेक्ष्य चकितावपत्रपयास्य पाणिपादमजहताम्। तत्क्षणमेवोत्थायायं सर्वं वृत्तं मातुलान्यै न्यवेदयत्। निखिलमिदमवगत्य निरभर्त्सयत् सा शास्त्रिणं बहुशः। पलाय्यातो मातुलसद्म समासाद्य वृत्तमिमं तस्या अप्यकथयत्। ततः प्रभृति विश्वनाथशास्त्रिणा न किमपि व्यवाहरत् सप्तदशवर्षाणि यावत्।

**श्रौतकर्मज्ञानार्जनम्**

अस्मिन्नेवावसरे काशिकराजकीयसंस्कृतपाठशालातो बालशास्त्रिषु गृहीतावकाशेषु कृताग्निहोत्रग्रहणेषु सत्सु वीरेश्वरनारायणेन्दूरबारतव्यसूर्यनारायणभैयाशास्त्रिनामधेयाः सर्वेऽप्यमी प्रचलितव्युत्पत्तिवादमनोरमाशब्दरत्नपाठे संप्रविष्टाः। कारकान्तव्युत्पत्तिवादान्तरं सकलैरेवान्तेवासिभिः समं सुहृद्वृत्या परिभाषेन्दुशेखरनञर्थवादविषयतावादपाठानश्रौषुः। गुरोरग्निष्टोमचिकीर्षायां जातायामेतदीयादेशेन तत्कालं श्रौतकर्मज्ञानविद्यामर्जयित्वा बालशास्त्रिणो निजधनराशिक्रीतस्थाने सौमिकवेदीनिर्माणमारच्य तत् स्थानं यज्ञशालानाम्ना विख्यातं व्यधुः।

अतीवाश्चर्यकरमिदं यदस्मिन्नग्निष्टोमयागेऽशीतिवर्षवयस्केन घारयदीक्षितेन गुरुणैवाध्वर्युकार्यं निर्व्यूढम्। इदमीयो ज्येष्ठभ्राता श्रीकालेकरो ब्रह्मपदमध्यासितो विष्णुरूपो यज्ञ ओझोपनामको यागेश्वरपण्डितोऽध्वरेऽमुष्मिंस्त्रयोदशवर्षवया जोशी होताऽवर्तत। प्राप्तमहामहोपाध्यायपदवीको ओडसराजारामशास्त्रिमहोदयोऽस्मिन् सवे सामगणप्रमुखः। ऋत्विक्ष चान्येषु

त्रयोऽग्निहोत्रिणः, श्रौतकर्मनिष्णातः साठ्युपाह्वः काशीनाथशास्त्री समपीपद-ग्नीध्रकार्यम् । बालवृद्ध - सहयोगेनैवङ्कारं प्रारब्धोऽग्निष्टोमयागः सम्पन्नः । श्रीगङ्गाधरशास्त्रिणोऽत्र सोमप्रवाका आसन् । प्रायोगिकज्ञानशिक्षणादेशाद्गुरोः समग्रोऽपि छात्रगणो यज्ञमण्डपेस्मिन् गङ्गास्नानेन शुचिर्भूत्वा कौशेयवासः परिधाय कर्मावलोकयितुमास्त । मानवल्ल्युपाह्वगङ्गाधरशास्त्रिभिरग्निष्टोमयागीय - सम्पूर्णविषयज्ञानाय बालसरस्वतीकृताग्निष्टोमपरिचय-नामकमेकं पुस्तकं विलिख्य मुद्रापयित्वा च सुत्यादिवसात् प्रागेव प्रकाशितम् । यागेऽत्र दक्षिणा द्वादशशतधेनुरूपेण राजकीय - सौवर्णमुद्रा वितीर्णाः । स्वयं काशिराजः, सम्मानिताः सामन्ताः, श्रीमन्तो विद्वांसोऽन्ये च काशीवासिनो यज्ञावलोकनकामनया मण्डपाद बहिरतिथीनां कृते विनिर्मित-विशिष्टशालायामुपविविशुः । यज्ञदर्शनावाप्तपुण्यफलाः सर्वेऽप्यमी विलक्षण-यज्ञदर्शनेनात्मजीवनसाफल्यमायन् । काशिराजप्रमुखैरखिलैरेव महामोदो व्यक्तीकृतः । गृहीताध्वरदीक्षितशास्त्रिशिष्यः स्वकुलपुरोहितमण्डिमहाराजो विपुलरिक्थराशिराजितोर्णामयकम्बलवासांस्युपदीचकार । सुत्याहेऽग्निष्टोमीय-पशुबन्धनादिनिवृत्तो नक्तं तृतीययामादारभ्य प्रातःसवनमध्याह्नसवने पञ्चमेऽह्नि प्रथमयामावसाने यज्ञमादित्येष्टिञ्चानुष्ठाय यथाविधि कर्मैतदवसायितम् । विंशतिवासरसाध्येऽमुष्मिन् यज्ञमहोत्सवेऽन्वहं सहस्रशो ब्राह्मणानां भोजनसत्रं प्रचलदास्त ।

अपरेद्युरहर्मुखे निखिला ऋत्विजः शास्त्रिश्रद्धालवोऽपरे छात्राश्च काशिराजेन सत्रात्मवीरेश्वरस्याधस्तान्मणिकर्णिकाघट्टेऽवभृथस्नानं जलेष्टिं च विधाय शास्त्रिवर्येण विसृष्टाः स्वस्वस्थानमीयुः शास्त्रिमहोदयोऽपि ऋत्विग्गणेन छात्रवर्गेण पुरस्कृतोप्यवाप निजनिकेतनम् ।

गार्ग्योपनामा याजी विनायकशास्त्रिवर्योऽवभृथस्नातौ दम्पती बहुमूल्य-वासोभिरलङ्कृत्य मध्येमार्गं पुष्पविसरैरवाकिरन् सद्म समासादयत् । पण्डित-सभामारचय्य दक्षिणाभिरभ्यर्च्य विदुषो मन्त्रपाठिनो वैदिकानपि सम्मानेन दक्षिणाभिरतोषयत् । दीक्षितोऽवसिते सवे पञ्चक्रोशीयात्रां सोल्लासं बन्धु-वर्गेण सुहृत्सङ्गेन छात्रवृन्देन सार्धं समपादयत् ।

इतश्च सप्तवर्षेभ्योऽपस्माररोगग्रस्ता वीरेश्वरधर्मपत्नी ज्वराभिभूताऽभूत् । अमुष्मिन्नेवानेहसि शास्त्रिमातुलद्वितीयपुत्रस्य जयपुरवासिगणेशशास्त्रिदुहित्रा सह विवाहनिर्णयो जातः । अपरतश्च सप्तर्षिनगरस्थघनपाठियज्ञेश्वरसुतया साकं राजगुरुकामनाथशास्त्रिसूनोरपि विवाहनिश्चयः कृतस्तत्रत्यान् सकलानपि समाहूय । उद्वाहद्वयेऽपि शास्त्रिण उपस्थितेरावश्यकतया मातुलविशेषनिर्बन्धेन विद्यमानमुमूर्षुदशामपि मासत्रयपर्यन्तन्न कापि भीतिरिति चिकित्सकोक्तौ विश्वसन्ननिच्छन्नपि विसृष्टुं स्वभार्यां जयपुरं प्रत्यतिष्ठत । काशी - प्रस्थानादष्टमदिन एवैकचत्वारिंशदुत्तरैकोनविंशतिशततमविक्रमाब्दे ज्येष्ठशुक्लत्रयोदश्यां (1941) परमं धाम प्रापत् । जयपुरे जायमानविवाहयोरन्यतरो भार्यामरणादेकाहपूर्वमेव निष्पन्नः । काशीसमागतव्यक्तेर्दुःखाकरवृत्तान्तमिमधिगम्य जयपुर एव प्रथमदिवसादारभ्य सपिण्डान्ताः क्रियाः कृत्वा स्वभागिनेयपाणिग्रहणमवलोक्य प्रत्यावर्तत विश्वनाथपुरीम् ।

सहचरीविरहजातखेदोऽप्ययं गुरुप्रचोदितः पुनः पूर्ववदेवाध्ययनकर्मप्रवृत्तः । साङ्गवेदद्वयनिष्णातः षड्दर्शनीमार्मिकः कलणकूर्चविसथवास्तव्यो रामदीक्षितस्तत्रैवासीत्तदा । काशीमवाप्य त्रिस्थलीयात्राविधानानन्तरमुपात्ततुरीयाश्रमदीक्षादेतस्मान्नारायणरामेश्वरशास्त्रिभ्यां सहायमपि शास्त्री न्यायप्रकाशमीमांसा-परिभाषाशास्त्रिदीपिकाशाबरभाष्योपेतब्रह्मसूत्राध्ययनायादसीयान्तेवासितामुररीचकार । तदीय पुत्रः स्वामिशास्त्रिसद्मनि गादाधरीं पूर्वपक्षवादांश्चाध्यगीष्ट । बालशास्त्रिनाम्ना विख्याताद्विश्वनाथदीक्षिताद्व्याससूत्राणां भामतीसंवलितशाङ्करभाष्यं शब्देन्दुशेखरञ्चाध्यैष्ट । छात्राणां दौर्भाग्याद् वदुर्विपाकाच्छब्देन्दुशेखराजन्तपुंलिङ्ग–भागाध्ययनानन्तरमेवासौ पाञ्चभौतिकीं तनुमुत्सृज्य विश्वनाथसायुज्यमाससाद । सपरिष्कारमवशिष्टशब्देन्दुशेखरं मानवल्ल्युपाह्वगङ्गाधरशास्त्रिसकाशादधीत्य शक्तिवादञ्च पुनर्दर्शनान्तराण्यवगत्य पञ्चविंशे वर्षे समातुलकुटुम्बः दक्षिणभारतं प्रति प्रतस्थे शास्त्री ।

**द्वितीयो विवाहः**

श्रीरामेश्वरयात्रातः परावृत्य शालीवाहीतिसंस्कृतनामप्रसिद्धतिण्णवल्ली-सन्निधौ ताम्रपर्णीसरित्पूर्वतीरे वन्नारपीठाभिध पेठाग्रहारे किञ्चित्कालम-ध्युष्य सम्पन्ने नारायणशास्त्रिपाणिग्रहे केडारवल्लरग्रामस्थस्वामिशास्त्रि-सूनुशिवस्वामिदुहित्रा सार्धमस्य शास्त्रिणो द्वितीयो विवाहः समपद्यत। सप्ताहत्रयं विरचितावासः काशीं गन्तुं प्रवसति मातुले पुरस्कृतसहधर्मिणी-कस्तदीयपितामहपितामहीसहितस्ततः कृतप्रस्थानां गंगुवण्डानग्रामेऽहोरात्र-मुषित्वा तृचनापल्लीपुरं प्राप्य नित्यकार्यावश्यकताधिकवस्तुजातं काशीं प्रापयितुकामस्तृचनापल्लीवाष्पयानस्थितिस्थानाधिकारिणं सङ्गम्य वस्तु-प्रेषणविधिमापाद्य तञ्जोरनगर एव स्वमातुलान्यां दुर्गादेव्यां ज्वराक्रान्तायां पञ्चदिनान्यध्युष्य कुम्भकोणनगरे वसन् दश दिनानि यापयामास।

तञ्जापुरतः सार्धक्रोशत्रयस्थितं तिरिवयातनगरं प्राप्य दक्षिणायन-सङ्क्रमणे कावेरीवाहिनीकृतस्नानतर्पणादिक्रियो विश्रम्य तत्रत्यश्रेष्ठिस्थापित-वेदवेदाङ्गदर्शनकाव्यसाहित्यादिपाठनव्यवस्थापन्नपाठशालां तैलङ्गछात्रवेशम-विद्यमानां विलोक्य वेङ्कटाचार्यविहितसम्भाषः सायं सकलजनयुतः तञ्जापुरं प्रतिनिवृत्तः। नभश्शुक्लदशम्यामस्तमनवेलायां लक्ष्मीपूजां निर्वर्त्य सङ्गत्य सर्वेपररात्रे कृतप्रस्थानाः विट्ठलपुरे त्रियामामेकां गमयित्वा गोविन्दराजपट्टन-मागत्य त्रिपदीनामक "शेषगिरि" पर्वतारोहणमार्गेण कृतनगरप्रवेशा लक्ष्मीवेङ्कटेशदर्शनलाभं लब्ध्वैकस्थाने दिनद्वयं स्थित्वाऽपरदिने मातुलकनि-ष्ठात्मजस्य गणपतेः पापाशास्त्रिणानुष्ठिते चौलकर्मणि देवार्चनब्राह्मणभोजना-दिना निवृत्य गोविन्दराजपट्टनमुपगम्य द्वितीयदिवस उपाकर्मणि जातेऽपररात्रे प्रस्थाय कृष्णाकूलङ्कृष्णाकूलमप्ययुः। कृष्णाभीमासङ्गमेऽवगाह्य निवृत्तनित्य-कर्माण उपाकर्माङ्गभूतप्रायश्चित्तात्मकाष्टोत्तरसहस्रगायत्रीमजपन् सर्वे। आहारादिकर्मनिवृत्तैर्निखिलैरिहैव क्षपा क्षपिता शयनसुखमुपभुञ्जानैः। प्रत्यूषे सरित्सङ्गमावगाहनजन्यपुण्यभाजो विहित - नित्यकर्मादिक्रियाः प्रचलन्तोऽमी परेद्युर्मध्याह्नवेलायां तटिनीतीरस्थ "मनमाड" ग्रामस्थितविट्ठलमन्दिरनिवास-सुखमनुबभूवुः। अत्रैककार्षापणक्रीतशतनिम्बूफलाः परदिनाधिगतप्रस्थानाः

प्राप्तसुदामापुराभिधस्थानास्तत्र यवनाधिकृतनिवासस्थानमेव नियतन्निरीक्ष्य प्रत्यावृत्ता बाष्पयानस्थितिस्थान एव। तत्र च केनचिन् महाराष्ट्रवासिना प्रेरिता यदल्पजलप्रवाहे कस्यचिदुद्यानं सतामावासार्हं तत्र बहुशः कक्षानवलोक्य न्यवात्सुः । अपरेद्युः प्रस्थाय सायं जाबालिपुरमागताः प्रभाते प्रयागमापुः । तत्राहोरात्रमुषित्वा त्रिवेण्यामनुष्ठेयाखिलधर्मकर्माण्यनुष्ठाय जन्माष्टम्युत्सवाहे काशीमासेदुः।

सम्पीडितस्यापि शान्तस्वान्तेन शान्तिप्रचुरजीवनं यापयतः कस्यचिन्महात्मनो व्यवहारमभिवीक्ष्यायमेव वीरेश्वरौद्धत्यापाकरणौषधिरिति चिन्तयित्वा पापाशास्त्री पूर्ववत् पठनपाठनादिप्रवृत्तो वीरेश्वरं दर्शनार्थमेतस्यादिदेश। एष वीरेश्वरोऽपि दर्शनदिवसाच्छान्तस्वभावेनैव व्यवहारजातं विदधानो न्यायमीमांसावेदान्तावशिष्टग्रन्थाध्ययनसमासक्तमानसोऽवर्तिष्ट।

इतश्च कथमपि कालं यापयन्ती दुहितृवात्सल्यात्तया सह समागता पितामही स्वल्पज्वरपीडयैव मार्गशीर्षकृष्णाष्टम्यां पाञ्चभौतिकं पिण्डमत्यजत्। मणिकर्णिकाघट्टे तदीयं प्राथमिकोत्तरं दाहसंस्कारादिकं पर्याकारि। अवशिष्टोत्तरकार्यनिर्वाहाय स्वदेशस्थतनयस्तडित्पत्रावबोधितवृत्तान्तः सपदि समागत्य सर्वकार्यजातं सम्पादयामास । वर्षीयानसौ मासानन्तरं स्वदेशं जिगमिषुर्मार्गव्ययमादाय प्रातिष्ठत । माधवमासिकाक्षयतृतीयायां पापाशास्त्रितृतीयतनूजः काशीनाथो विषूचिकाक्रान्त औषधविशेषेणोल्लाघताङ्गतोऽपि पुनर्ज्वराभिभूतोऽभूत् अपरतश्च जयपत्तन एवैदमीयश्वशुरगणेशशास्त्रिणोऽधिकाषाढे परलोकप्रयाणमविद्यत । परलोककृतप्रयाणेऽस्मिन् कनिष्ठो विश्वनाथो जयपुरमहाराजादेशेन काशीनाथं सभार्यमाह्वयत् । अवसरेऽस्मिन् काशीनाथमाता ज्यायान् कनीयांश्च भ्रातरौ भार्यया सार्धं जयपुरमाजग्मुः। अपुत्रोऽपि दौहित्रवत्तया सापत्य एवाभवत्। समायातेष्वेतेषु मात्रा रोगार्तभगिन्या स्वमध्यमपुत्रेण भागिनेयवीरेश्वरेण च सहितः पापाशास्त्री काशीमेवाध्यवात्सीत्। आश्विनशुक्लपक्षे पापाशास्त्रिस्वसा पुरन्दरपुरातिथितामभजत्।

प्रवर्तमानमाससितदले जयपुरराजगुरोः कामनाथशास्त्रिणः षष्टचन्द्रपूतौ जातायां तच्छान्तिविधानायाध्ययनार्थमधिवसता काशीं समाहूतेन स्वतनुजन्मना साकं काशीतः पापाशास्त्री ऋग्यजुःसामवेदिनोऽन्यांश्चापि वैदिकान् पाचकानपि जयपुरं प्राहिणोत्। वीरेश्वरोऽपि सपत्नीकोऽपरेहनि प्रस्थाय चतुर्थ्यां भाविन्यां शान्तौ सत्कर्तुमभ्याजगाम। सम्पन्ने शान्त्युत्सवे काशी-समागतवैदिकविद्वद्गमनात् पूर्वमेव मातुली-राजगुरु-पुत्रवधूभिः समं वीरेश्वरोऽपि काशीं प्रत्यचलत्। समवाप्य काशीमन्तर्वत्नीं पापाशास्त्रिमध्यमपुत्र-स्नुषामुद्दिश्य सम्बन्धिभिरनुष्ठीयमानोत्सवाम्सानन्दमद्राक्षीत्। ‹उद्युञ्जानोऽध्यापकपद - प्राप्तये राजकीयसंस्कृतमहाविद्यालमुख्याधिकारिणं शर्मण्यदेशाभिजन "पीसो" नामधेयन्निकषा मातुलगणेश - शास्त्रिणोऽनुरोधेन महता काशीस्थमुख्यन्यायालयाधिकारिणा बङ्गदेशीयेन सत्रागमत्। पाठशालाध्यक्षः समाश्वास्य मुहुर्मुहुः साक्षात्कर्तुमादिशत्। मासद्वयान्तराल एव पापाशास्त्रि-पुत्रवध्वाः सीमन्तोत्सवः सम्पन्नः। सायं मकरसंक्रान्तिनिमित्तकृतगङ्गास्नानः सम्प्राप्तसद्या तडित्पत्रमेकमलभत जयपुरागतम्।

## जयपुरागमनम्

भगिनीतालुस्फोटवृत्तं समाहूतिञ्च स्वयीयामभिज्ञायापरदिन एव शास्त्री राजगुरुपुत्रं स्नुषाञ्चादाय राजहंसश्रीबालशास्त्रिसहितः सपत्नीको मार्गेऽविश्राम्यन् प्रस्थानदिनाद् द्वितीयदिन एव जयपुरं प्रापत्। बाष्पयानस्थि-तिस्थान एव नगरागत - प्रयागराधावल्लभाभ्यां श्रुतं यदाङ्गल - चिकित्सक-यादवनाथचिकित्सया साम्प्रतमुल्लाघा। समाकर्ण्यैतच्छान्तचेतसा सर्वैः सह "श्रीजी का मन्दिर" इति नाम्ना। विख्यातं देवश्रीगोपीजनवल्लभमन्दिरं प्राप्य भगिनीमावृत्तं च साक्षात्कृत्य स्वकार्ये संलग्नः। परेद्यवि द्राक्तरशल्य-चिकित्सया तालुस्फोटमपाकृत्य तत्र तैलचिक्कणवस्त्रखण्डनिधानक्रियया पञ्च-भिरेव वासरैः सर्वथारोग्यलाभमलभत भगिनी।

जयपत्तनाधिपतिमहाराजमाधवसिंहनृपतेः सौराष्ट्रदेशीयायाः जाडूणजीत्यभिधाप्रथितायाः गर्भवत्या महाराज्ञ्याः प्रसूत्यर्थं "हवामहलनाम्ना" प्रसिद्धो राजप्रसादोऽरिष्टत्वेन कल्पितः। तत्रावरोधप्रबन्धविधित्सया राजपुरुषाः

प्रासादान्निःसृत्य देवश्रीगोपीजनवल्लभमन्दिरमिता अन्यस्थानि भूयांसि स्थानानि रोगग्रस्तभगिन्याः "गुराणीजी' तिपद - प्रसिद्धाया वासस्थानमप्यायसश्रृङ्खलावरुद्धं व्यधुः । एतदीयसुरङ्गामार्गेणैव "हवामहल" नामकं राजसदनमपि तेऽगमन् । समाकर्ण्यैतद् वीरेश्वरः प्रतिवेशिकमन्त्रिप्रवरश्रीकान्तिचन्द्रमुखोपाध्यायमधिगम्य राजपुरुषाचरितं वृत्तजातमवाबोधयत् । यथापूर्वं तानि स्थानान्युन्मुच्य राजकीयपुरुषैर्लोहश्रृङ्खलयावबद्धानि, अधुनातो व्याधिपीडितमदीयभगिन्याः "गुराणीजी" ति नाम्ना प्रथिताया निवासहेतोः स्थानं किमपि नावशिष्यते । निवेद्य दमुत्तरं प्रतीक्षमाण एवास्मिन् दूतान् संप्रेष्य मन्त्रिवरो राजपुरुषानाकार्य तांश्च सर्वा व्यवस्थाः पृष्टवा राजगुरुश्रीकापनाथशास्त्रि-निवासस्थाने युष्माभिरियं नवविधा किमालम्बिता ? इत्थङ्कारमुक्त्वा तानमर्षेण निर्भर्त्स्य मन्दिरं गमयित्वा पूर्वंवन्निर्बन्धस्थानातिरिक्तस्थानेभ्यो लोहश्रृङ्खला अपाकृत्य तानि स्थानानि राजगुरुवशगानि कारयामास ।

## अधिकारावाप्तिर्नयनैपुणी च

अपूर्वकार्यविधानशक्तिमवगत्य भार्याभ्रातुरेनां राजगुरुरवागच्छद् यन्त्र्-पतिनाऽमात्येन च समुत्पन्नविरोधोन्मूलनायायमेवालम्भविता । निर्णीयैतद् भगिनीपतिरथारुणस्काशीयानं वीरेश्वरस्य । प्रज्ञाबलबृहन्मूलबलवत्पादपमाश्रित्य सार्धमासेनैव राजगुरुमन्त्रिप्रवरयोः पारस्परिकमनोमालिन्यमपवार्य द्वयोरन्योऽन्यं यातायाते पूर्ववदनेन शास्त्रिणा प्रवर्तिते ।

प्रासादन्निर्मिमिषुः क्षमापतिरिव कर्मक्षेत्रमवतितीर्षुः सम्भावितो बुभूषुश्च शास्त्रिमहोदयस्तदनुकूलां भूमिमादावेव महतायासेन निर्माय तत्रावातारीत् । ज्येष्ठभगिनी सर्वतः प्रथममेनमस्य कर्मक्षेत्रतयाऽऽवृत्ताज्ञया स्वकीयगोपीजनवल्लभमन्दिरस्य प्रबन्धकत्वेन निरचिनोत् । अस्मिन्नेवावसरेऽत्रत्यैर्विद्वद्भिः सामन्तैरितरैरपि सम्भावित-पुरुषैः शनैः शनैः परिचयमचर्करीत् पुनश्चात्रत्ययावन्मात्रकार्यंकर्तृव्यक्तीस्तीक्ष्णदृशावलोकयतो वीरेश्वरस्य सर्वमायव्ययादि विवरणजातमायत्तीकृत्य राजगुरुणा प्रतिमासं व्ययितुं त्रिशती निर्णीता। एतदतिरिक्तमायराशिमुपद्रष्टात्मनोऽन्तिकवैदय मन्दिरसेवकवर्गधर्मकर्मवाहनादिनिमित्तं सप्तशती रूप्यकाणां प्रतिमासं व्ययायोपयुक्तामब्रवीदित्थम्। एतदनुसारं शास्त्रिमहोदयः षोडशमासावधि कार्यमदः समपीपदत् । एतत्कालाभ्यन्तर एव काशीतः सप्तर्षिनगराच्च पुत्रवध्वा रजोदर्शनशान्तिकार्यं

समागतातिथिसत्कारे षोडशशती मुद्राणामधिकं व्ययिता। अनन्तरञ्च मन्दिरजीर्णस्थानोद्धारकार्ये राजकीयव्ययात् त्रिसहस्ररूप्यकाणामधिको व्ययोऽभवत्। इत्थङ्कारन्निर्धारितद्रव्यराशेः षट्शताधिकचतुःसहस्ररूप्यकाण्यवशेषयदेष:। समीक्ष्येदं कामनाथशास्त्री परमप्रसन्नतामन्वभवत्। किन्तु खलैर्दुर्जनैर्भागिनेयैश्च प्रवादोऽयं प्रचारितो यदेष मातुलो राजगुरुः राजगुरुस्तु सन्नपि वैतनिकः सेवको वस्तुतस्तु वीरेश्वर एवात्रत्यः स्वामी।

मासत्रितयादनारतं प्रवादमिमं श्रावं श्रावं शास्त्री केनाप्यपदेशेन काशीगमनाय समुद्यतः। काशीप्रस्थानकाले श्रीराजगुरुरेतदीयकार्यसन्तुष्टान्तरङ्गोऽस्मै त्रिसहस्ररूप्यकाण्युपायनरूपेण प्रदायावादीत् यत्काश्यां भवनमेकमेभी रूप्यकैः क्रीत्वा त्वरितमेवात्र परावर्ततां भवान्।

### भवनक्रयार्थं काशीगमनम्

भवनक्रयार्थमाषाढशुक्लदशम्यामितः प्रस्थायाग्रवनै दिवसमात्रमुषित्वाऽपरेद्युः प्रभाते प्रयागं प्राप्य त्रिवेण्यां स्नानादिनित्यकर्म श्राद्धादिकर्म चानुष्ठाय त्रयोदश्यां गोविसर्गनिहसि काशीं प्रापत्। सार्धमेव चानेन भगिनीभागिनेयमातृष्वसारोऽपि काशीमयुः। चतुर्दश्यां मातृश्राद्धं पूर्णिमायां पार्वणं गुरुपूजनञ्चान्वतिष्ठत्। आहूतश्चासौ प्रतिवर्षवद् बुन्दीराजसभायामगच्छत्। सायंसन्ध्यादिनिवृत्तो मिश्रैः सङ्गम्य शाङ्कस्थानै काश्या उदगागावर्तमानवरुणाकाश्यां दिनत्रयमस्थात्। तत्र प्रतिपदि वीरेश्वरसत्कृतास्ततो द्वितीयदिने रामशास्त्रिप्रभृतिभिः सम्मानितास्तृतीयवासरे काशीं प्रत्यावृत्ताः स्वकार्यसंलग्ना अभूवन्। चतुर्थ्यां पितृश्राद्धसम्पादनानन्तरं सदनान्वेषणाय पापाशास्त्रिणं प्रैरयत्। प्रोष्ठपदे मासि भवनक्रयादिसमस्तकार्यमाधाय पूर्णिमानन्तरं चतुर्थ्यां जयपुरं सनाथितवान्। पूर्ववद् राजगुरुगृहकार्यासिक्त्यभावेऽपि यः कश्चन तत्कार्यसंलग्न एनं किमपि पर्यपृच्छत्तस्मै तावदेवाकथयन्न ततोऽधिकम्।

### राजगुरोरामयिता तत्प्रतिक्रिया च —

नवरात्रानन्तरमूर्जमासे राजगुरुजन्मोत्सवे जाते षष्ठयामपस्मारामयेनाक्रमणं व्यधायि सहसा। समाहूतो मन्त्रिवैद्यवर्गः चिकित्सा भिषग्भिरेव विधेयेति प्रोच्य गतास्ते सर्वे। महाराजस्यापि सन्देशः पूर्वसंवादी समभवत्।

तदनन्तरं काशीतः समाहूतपापाशास्त्रिमहोदयागमनानन्तरं कान्यकुब्जकेदार-नाथात्मजो वैद्यनाथश्चिकित्सामस्यारेभे। इतश्च बाहुलेयमासे दौहृद वत्-पत्नीसमेतः श्रीवीरेश्वरः काश्यां किञ्चित्कालकृतवासः पौर्णमास्युत्तरमेकक एव जयपुरमागच्छत् । सापत्ययोः श्वशुरयोर्नव्यवेश्मनिवासेन पत्नीतो निश्शङ्को निश्चिन्तश्चाजायत। राजगुरु स्वास्थ्यज्ञानोत्तरं तैषसितपञ्चमीं यावदुषित्वाऽत्र पापाशास्त्रिसमादिष्टः सीमन्तादिसंस्कारसम्पिपादयिषया काशीं मातुलेन साकं प्रतस्थे।

**काश्यां सीमन्तसंस्कारः सूनुसूतिमहश्च —**

कृतसीमन्तसंस्कारस्तन्निमित्तोपवनादिभोजनमनु माघशुक्ल - सप्तम्या-मात्माजन्ममुखमवेक्ष्य "एकादशेऽहनि पिता नाम कुर्यात्" इति स्मृतिवचोऽनुसृत्य जातकर्मनामकर्मभ्यां सममेव जन्मकालिक-गण्डान्तदोषनिवृत्तये गोमुखप्रसव-शान्तिमपि विधाय जन्मोत्सवसम्मिलिता भगिनीदुहितरो यथाशक्ति सत्कृता अनेन शास्त्रिणा।

**व्यवस्थाकौशलम् —**

काचन राज्ञी तपोमाससितपक्षपूर्णिमायां चन्द्रोपरागनिमित्तं गंगास्नानाय काशीमागता। परवासरे ग्रस्तास्तसत्वेऽपि गृहगमनत्वरया गुरुवर्यश्रीयोगेश्वर-पण्डितान्तिकमागत्य न्यवेदयत्स्वाभिलाषम्। तदादिष्टो वीरेश्वरो द्विशत-पण्डितानेकविंशतिरूप्यकमूल्यवत्स्वर्णमुद्राभिस्तया सत्कारयामास। निखिल-कार्यग्रेसरीकृततया विशिष्टदक्षिणाभिः सत्कार्य गुरूनपि समतूतुषत् । सुव्यवस्थाहेतोः स्वयमेकां स्वर्णमुद्रामधिकामानर्छ।

**व्यवहार-प्रवणता**

राजगुरुकामनाथशास्त्रिणाकारितो जयपुराजिगमिषुमन्त्रशास्त्रज्ञगुर्जरा-भिजनश्रीराधावल्लभेन सार्धं जयपुरमागत्य किञ्चित्कालप्राप्तवासः पापा-शास्त्रिकनीयसात्मजातोपनयनसंस्कारे तृतीयसूनुचन्द्रशेखरस्योपयमनसंस्कारे च सहयोगचिकीर्षयाशु काशीं पुनरसौ प्रातिष्ठत। फाल्गुनिकचैत्रिकमासयोः पर्यायत उपनयनोपयमने सम्पन्ने। अब्देऽमुष्मिश्चैत्रो मासो मलिम्लुच आसीत्। पापाशास्त्रिद्वितीयपुत्रसमन्वितो माधवमासे स्वकीयानुकूलतायै सहवीरेश्वरो जयपुरं प्राप्य निदाघातपमसहिष्णुरपि शुक्रमासासितपक्षपर्यन्तमत्रोषित्वा

राजगुरोरनुमत्या केनचन रामकुमारनाम्नानुचरेण सहार्धमार्गं वाष्पयानेनातिक्रम्यावशिष्टाध्वानं शकटेन चोदयपुरं प्राप । उदयपुरे च पापाशास्त्री "वज्रटङ्क सुब्रह्मण्यशास्त्रीति" नाम्नाज्ञायत । पुण्यविभागाध्यक्षोऽदसीयागमनवृत्तान्तं महाराजाय निवेद्यायमाशीर्भिरेधितुकामोऽत्रोपतिष्ठासुरिति सममेवाकथयत् । तत्रत्यनियमानुसारं श्रीनैवासनमध्यासितुमादिदेश । देवस्थानविभागादेतदीयपितृव्यो ग्राममेकं न्यासीकृतवानृणमादाय । ग्रामस्यायत्तीकरणमेवात्रागमन-मुख्यप्रयोजनमेतस्य । एद्विषयक-प्रार्थनापत्रमस्य पन्नालालाभिधमन्त्रिणा महाराजसेवायामग्रेसरीकृतम् । मासद्वयानन्तरं प्रार्थनापत्र निर्णयोऽयमविद्यत । भवदीय पितृव्यगृहीत-त्रयोदशशतरूप्यकर्णराशि प्रदानेन ग्रामोऽयं सुब्रह्मण्यशास्त्रिस्वं भवितुं प्रभवति । रूप्यकानयनराजगुरुसेवकप्रेषणात्मक-कार्यद्वयमक्षिलक्ष्यीकृत्य सुब्रह्मण्यशास्त्री श्रीवीरेश्वरं सरामकुमारसेवकं जयपुरपथात् काशीं प्राहिणोत्। काशीं प्राप्याङ्गलन्यायाधीशकार्यालयाद्वीरेश्वरो बान्धवयुतो विवादोपयोगि प्रतिरूपकपत्रं प्रगृह्य सेवकं जयपुरमगमयत् । अस्मिन्नेवावसरेऽवशिष्टऋणराशिप्रत्यावर्तनाय राजतसौवर्णाभरणानि निक्षिप्य सहस्रमुद्रात्मकं ऋणमादाय स्वयमुदयपुरे समुपस्थितः । महाराज्ञ्या धर्मोपदेशकार्यनियुक्तो वीरेश्वरो मासद्वयावकाशं गृहीत्वा काशीमायातः ।

**द्वितीयप्रियोपरमः**

पत्नी प्रसूतिरोगाक्रान्तेति भिषग्भिः प्रबोधितस्तत्सम्मत्या तत्रैवास्थात् । द्वितीयपत्नीतो लब्धजनिरात्मजः शास्त्रिवर्यस्य मात्रा सहैवाचिकित्स्यमामयं गतः । किञ्चित्कालानन्तरं पितरं स्वर्गमनेन शोकाक्रान्तमानसं व्यधात् । वारद्वयमारोग्यमुपलभ्यापि कुपथ्यकारणात् तृतीयवारं पुनारोगाक्रान्ता वीरेश्वरशमर्मभार्याऽपि वेदाब्धिनिधिभूमिते विक्रमवत्सरे (1944) फाल्गुन कृष्णनवम्यां कुम्भार्के काशीवासलभत । और्ध्वदेहिकक्रियाश्च भर्त्रैवानुष्ठिताः । इतश्च उदयपुरान्मातुले समायाते तदीयज्येष्ठपुत्रस्य ताम्रपर्णीतीरात् समागतायाः लक्ष्मीनामिकाया भार्याया ऋतुशान्तिसंस्कारः सम्पन्नः । मधुमासपर्वणि प्रस्थाय काशीतः क्रमेणायोध्यामथुराप्रभृतिषु स्थानेषु तिष्ठन् सम्वत्सरारंभप्रतिपदि जयपुरमायातो वीरेश्वरः । भगिन्यावुक्तो पत्रं तद्वृत्तं च संप्रेष्यात्रैनमाह्वयताम् ।

क्रमशः

**तार्तीयीकोद्वाहः**

कतिपयवासरानन्तरं रामनवमीदिने वीरेश्वरमातृस्वसृतनयस्तद्विद्वृत्तेन न्यवेदयत् यत् काश्यां सम्पत्स्यमानविवाहोत्सवे राजगुरुपुत्रादिभिः सह भवानपि समागच्छतु सम्मिलितुम् । राजगुरुरात्मजातं सेवकैः सह प्रैषयत् परं वीरेश्वरमत्रैवारुणत् । तमनागतमवेक्ष्य न्यवेदयत् यद् गुरुवर्यश्रीयोगेश्वरशर्मण आदेशेन म. म. गङ्गाधरशास्त्रिणा राजेश्वरशास्त्रिणा च भवदर्थमेका कन्यका मैसूरनगरे निश्चिता । अतो मैसूरं प्रति भवता प्रस्थातव्यम् । विलोक्यैतत् श्रीवीरेश्वरो वैशाखशुक्लतृतीयायां प्रस्थायान्यस्मिन्नहनि मैसूरं प्राप्तवान्। इतश्च राजगुरुः स्वसम्बन्धिसप्तर्षिनगरवास्तव्यश्रीयज्ञेश्वरभट्टपार्श्वे तद्विद्वृत्तेन सूचनामिमां प्राहिणोत् यदद्य श्रीवीरेश्वरो मैसूरं प्रति प्रातिष्ठत । तुरीयवासरे सायं पुण्यपत्तनं प्रवेक्ष्यति, यदि तत्र पाणिग्रहणकार्यं भवितुं शक्नोति एतदन्तिकं गत्वा वार्तालापः कर्तव्यस्तदनन्तरमेवासौ सप्तर्षिनगरं नेतव्यः।

"अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः" इति स्मृतिवचनमनुध्यायन्विवाहस्यावश्यकर्तव्यतां विचिन्त्य रामकुमाराभिधं राजगुरुसेवकं गौडब्राह्मणं स्वानुगं विधाय नवाहमहमदाबादमुम्बापुरीमतिक्रामँस्त्वराहेतोः कल्याणनगरं समाससाद । अत्रत्यशङ्कराचार्यमठेऽवतीर्य सायन्तनसन्ध्याकालप्रत्यवायशङ्कयाऽऽसन्नं सन्ध्याकालमभिज्ञाय सायंसन्ध्याकर्मानुष्ठानाय पुण्यपत्तनं प्राविक्षत्। यदीयपत्रमादायावस्थित्यर्थं तन्निवासिनो गृहं प्राप्तस्तद्गृहस्वामिनो विपरीतभाषणेन खिन्नोऽनुपदमेव यदश्वशकट्या तद्गृहं गतस्तच्छकटीचालकमपृच्छत् – अस्ति कश्चिद् द्रविडोऽत्र नगरे ? चालकोऽमुं द्राविडशिवमन्दिरमनयत् । सामशास्त्रिणः शङ्करशर्मणः सम्मत्या तत्रावतार्य गतश्चालकः। अनेन ससम्मानं श्रीवीरेश्वरोऽवस्थापितोऽत्र ।

प्रातर्यज्ञेश्वरभट्टः स्वश्यालकेन काशीनाथशर्मणा श्रेष्ठिना च सार्धं समेत्यैतदीयं पूर्वसंकेतितस्थानमध्यास्त । श्यालकं कार्येऽस्मिन्नियुज्य स्वयं च साक्षात्कर्तुमेनं भ्रामं भ्रामं द्राविडमन्दिरमभ्यगात् । श्रीवीरेश्वरमत्रावलोक्याभाषत । भवान् स्थानान्तरमागत्यास्थात् । अहं पूर्वलिखितस्थानं गत्वा तत्रानवलोक्य भवन्तं पदातिरेवात्रागतः काशीनाथशर्मापि समायातः।

कार्यान्तरं गतः स सायमत्रागमिष्यति । विवाहविषयिणी चर्चा सम्पत्स्यते । एतदुक्त्वा सोऽपि स्वस्थानं गतः । वीरेश्वरस्तु शारीरिककार्येभ्यो निवृत्य रामकुमारसहयोगेन भोजननिर्माणादारभ्याहारादिसर्वकार्येभ्यो निवृत्तः पुण्यपत्तनं द्रष्टुं न्यसरत् । तत्रत्यदर्शनीयस्थानानामपरिहार्यतां मन्यमानः सुब्राशास्त्रिणं त्र्यम्बकशास्त्रिणं च "यौ स्वमातामहस्वसृ-जानकीसुतावास्तां तौ" पृष्ट्वापणारामदुर्गराजपथशिवाजीभवनादिस्थानानि समालोक्य चतुर्थयामादौ स्वनिवासस्थानमागत्य विशश्राम । सायन्तनसन्ध्योपासनानन्तरं समागतेन यज्ञेश्वरभट्टेन सह जलाशयसमीपस्थसदाशिवमन्दिरं प्रविश्य काशीनाथशर्मणा संलपितवान् । अन्ते काशीनाथशर्मा प्रोवाच—भवानावाभ्यां सहैव सप्तर्षिनगरे चलतु । चतस्रः कन्या विद्यन्ते एतासु कतमयापि सह भवदीयविवाहनिश्चयो न भविष्यति तदा मदीययुग्मजातकन्ययोरेकतरया ज्येष्ठया कन्यया सह पाणिग्रहणं कारयित्वैव भवन्तं परावर्तयिष्यामीति प्रतिज्ञाय प्रातर्धूमशकटीप्रस्थानसमये आवां भवन्तं तत्र द्रक्ष्यावस्तत्रैव भवानागच्छतु इत्युक्त्वा काशीनाथशर्मा ततः प्रतस्थे । स्वसदनं प्राप्य गणेशमात्रे सर्वं वृत्तं न्यवेदयत् । तया प्रोत्साहितः प्रभात एव भोजनावधि सर्वकार्येभ्यो निवृत्तः सार्धाष्टवादनवेलायां वाष्पयानस्थितिस्थानं यज्ञेश्वरभट्टसहितः प्राप्स्यामि, अतस्तत्क्षणमेव गणेशमाता काशीनाथयज्ञेश्वरभट्टयोः सन्निधावश्वशकटीं प्राहिणोत् । द्वाभ्यामेताभ्यां साकं ससेवको वीरेश्वरोऽपि सप्तर्षिनगरं समाससाद । मध्येमार्गं काशीनाथशर्मणो गृहे ताम्बूलादिभिः सत्कृतो यज्ञेश्वरभट्टगृहं प्राप । तत्र सायन्तननित्यकर्म कृत्वा चिरं वार्तालापमकरोत् परं मत्कुणैःपीडितो गृहान्निसृत्य बहिः शिवमन्दिरं परितो वर्तमानेऽनावृतस्थाने विश्वनाथव्यासदीक्षितरामकुमारैः सह सुखमस्वपत् मत्कुणाभावात् ।

परेद्युर्यज्ञेश्वरभट्टश्यालकः श्रेष्ठिवरः काशीनाथशर्मणा तथा स्वभगिन्यादिभिः सह रामकुमारसहितं वीरेश्वरं न्यमन्त्रयत् । जन्मपत्रमवलोक्य पञ्चमे दिने मौहूर्तिकः षडष्टकदोषं न्यगदत् इति स वीरेश्वरमवोचत्-अयमपि दोषस्तु वर्तत एव । परमावश्यकं चेत् स्वामिनोरैकत्वं गोदानञ्च दोषमार्जनायालम्, ग्रन्थान्तरेषु इयं विधा इति प्रत्युवाच । कन्यामातुराग्रहेऽपि यज्ञेश्वरभट्टानुरोधेन दौहित्र्या निर्दोषजन्मपत्रिकामेलापकेन च किञ्चिदुदासीनः

काशीनाथः कर्तव्यविमूढ इवाभवत् । यज्ञेश्वरभट्टस्तु तं गाडग्रामं नीत्वा सम्बन्धिभिर्दुहितृजामातृभ्यामालप्य च निश्चेतुं जामात्रा सह परावृत्तः । इतश्च वीरेश्वरोऽवदत् पत्रिकाद्वयं जयपुरे प्रेषयम् एतयोर्यस्याः पत्रिकायाः सम्मतिरागमिष्यति सैवोपयुक्ता भविष्यति ।

दशमीतिथौ जयपुरात् प्राप्तपत्रद्वयान्यतरस्मिन् पत्रे काशीनाथकन्यया विवाहः करणीयो यतः काशीनाथ आढ्यतरः । द्वितीयस्मिन् दिने यदेतदनन्तरं द्वितीयदिने लिखितं तत्रेदमुत्तरं यत् काशीनाथस्य कन्यया वैधव्यादियोगो वर्ततेऽतो यज्ञेश्वरभट्टदौहित्र्या सह विवाहसंस्कारः समुचितः । तत्र समागतैः सर्वैरेव द्राविडैरस्मिन्नेव पत्रे स्वकीया सम्मतिः प्रदत्ता । पञ्चमदिने विवाह-मुहूर्तोऽपि निर्णीतः । एतदनन्तरं श्रीवीरेश्वर आसन्नक्रोशद्वयं कृष्णासरित्तटं यज्ञेश्वरभट्टविश्वनाथबालदीक्षितैः सहागच्छत् । तत्र श्रेष्ठवैदिकानां गृहे स्वद्वितीयभार्यायाः सर्वाः अवशिष्टाः क्रियाः सम्पाद्य पुनः सप्तर्षिनगरं समाययौ ।

## अशिव-सन्दोहः

अन्येद्युर्मध्यान्हे सुप्तः श्रीवीरेश्वरः स्वप्नमिममपश्यत् यत्–आत्मसतीर्थ्यगणेशशास्त्रिगर्ग्येण सह तद्गृहान्निर्गत्याचलत् । चक्रपुष्करिणीं समासाद्य मेघ-च्छन्नगगनादनिगर्जनया सह विद्युत्पातमपश्यत् । उभावेव मूर्च्छितावास्ताम् । किञ्चित्कालानन्तरं चेतनां प्राप्य गणेशशास्त्रिणं तत्रादृष्ट्वा व्याकुलीभूय शय-नादुत्थितः ।

स्वप्नोऽयं यथार्थो न भवेदित्थं भगवन्तं प्रार्थयमाने सति द्वितीयेस्मिन् दिने मध्याह्नानन्तरं पत्रेणैकेन वृत्तान्तो विदितो यत् श्रीगणेशशास्त्री ज्वराक्रान्तो भूत्वा भगवत्-सायुज्यमाप । समीक्ष्यैतत्—ऊनविंशतिवर्षपर्यन्तमेकत्राध्ययनाध्यापना-दिकर्म कुर्वतोरावयोरेकतरस्येयं दशा सम्पन्ना । चिन्तयानयात्यन्तमुद्विग्नोऽभव-द्वीरेश्वरः । अयं विवाहः कीदृशो भविष्यति ? निर्णये जात एव मित्रस्य परलोक-वासो जातोऽतोऽयं चिन्ताकुल एवासीत् । दिनद्वयानन्तरमेव श्रीयज्ञेश्वरभट्टः सजा-मातृको ग्रामादागतः । आषाढमासकृष्णपक्षे शराब्धिनवेन्दुमिते वैक्रमे वत्सरे विवाहादिकार्यं सम्पाद्य श्रीवीरेश्वरं सहैव नीत्वा स्वग्रामं गतः । तत्र कन्यायाः पितामहाशीर्वादं कारयित्वा ग्रामात् पुनरावृत्तः । ततश्च सर्वेऽमी सप्तर्षिनग-

रादपि प्रस्थानमकुर्वन्। दम्पत्योः सेवकः रामचन्द्रशर्मा पत्नीमातुलश्चैताभ्यां सहैवास्ताम्। दिनद्वयं पुण्यपत्तनमध्युष्य किञ्चिदुपकरणं क्रीत्वा मुम्बापुरीवटोदराह्मदाबादनगराणि अतिक्रामन्तो जयपुरं समाययुः।

सर्वैः सह जयपुरं प्राप्त एव राजगुरुः कामनाथशास्त्री पुनरपस्माररोगाक्रान्तोऽभवत्। अनेन श्रीवीरेश्वरस्य वार्तालापोऽजायत परमन्यैरुक्तमयं वीरेश्वरोऽमङ्गलां पत्नीमादायात्रागतः। वाक्यमेतत् समाकर्ण्य तस्यापि कष्टप्रदतां विजानन् काश्यां क्रीतभवनप्रवेशाय रामचन्द्ररामकुमारावेकां वृद्धां ब्राह्मणीं च सह नीत्वाषाढशुक्लपञ्चम्यां जयपुरात् प्रस्थायार्गलपुरबाहिन्यां यमुनायां स्नानमकरोत् प्रयागे च त्रिवेण्यामप्यस्नात्। काशीं गत्वा नूतनगृहप्रवेशमुहूर्तं ज्ञातुं मौहूर्तिकेन सह वार्तालापं विधाय पापाशास्त्रिगृहमगात्। तत्र बालिकां तत्पौत्रीं शीतलां मृतां श्रुत्वेदमप्यमङ्गलफलं भविष्यतीति मनसि विचिन्त्य दशमीमुहूर्ते प्रविविक्षुरपि मृतबालिकायाः मातुरासन्नमृत्युं समीक्ष्य तस्मिन् गृहे प्रवेशसमये श्रीवीरेश्वर उत्साहहीन एवाभवत्। परेद्युः सायं पापाशास्त्रिणः स्नुषायाः परलोकवासोऽवर्तत। तत्पतिस्तु स्वकनिष्ठश्वशुरकन्याया विवाहोत्सवे गत आसीत्। अतस्तस्याः प्रथमौर्ध्वदेहिकं कर्म शास्त्रिणैवाकारि। चित्तमितोऽपि व्याकुलमभवत्। पुनरपि मातुः प्रतिवार्षिकं श्राद्धं पूर्णिमानिमित्तं गुरुपूजनं च कृत्वायं कर्त्तव्यविमूढोऽभवत्। तृतीयायां सायमागततडित्पत्रेण विदितं यज्जयपुरे कामनाथशास्त्रिणः पञ्चवेदाङ्गभूमितविक्रमाब्दे श्रावणमासस्य तृतीयायां सोमवासरे ( वि० सं० 1945 ) भगवत्सायुज्यमभवत्। द्वितीयस्मिन्नहनि पितुः श्राद्धक्रियानन्तरं पञ्चम्यां भगिन्या सह पत्नीं रामचन्द्रं रामकुमारं वृद्धां ब्राह्मणीं च काश्यामेव निविश्य पुनः जयपुरं प्रति प्रस्थातुमना अभवत्। तस्मिन्नेव दिने सायं पापाशास्त्रिणो द्वितीयपुत्रोऽपि जयपुरात् काशीं प्रापत्। सोऽवदत् कामनाथशास्त्री मूर्च्छितावस्थायामासीदित्येवाहं जानामि। मूर्च्छितावस्थामाकर्ण्य भगिनीपतेरनिष्टमाशङ्कमानः काशीतः प्रस्थानसमये जयपुरागन्तॄणामेतेषां मार्गव्ययार्थं धनराशिं रामचन्द्रहस्ते निक्षिप्तवान्। जयपुरागतेन शास्त्रिणा श्रुतं यज्जयपुरमहाराजस्य तथा मुख्यामात्यस्यानुकूल्येन राजगुरोरौर्ध्वदेहिकं सर्वं कर्म प्रतिष्ठानुरूपमेव जातम्। दशमे दिने श्रीवीरेश्वरशास्त्रिपत्नी सहागतान्यैः सर्वैः सह दुःखं परिमार्ष्टुं जयपुरमागच्छत्।

जयपुरराजगुरुगृहक्रियमाणो यो व्यवहारः स व्यवहारानुकूलं कार्याध्यक्षेण राजसम्मत्यनुसारमवशिष्टः सर्वोऽपि व्यवहारः समुचितरूपेण सम्पादितः। पापाशास्त्री पञ्चदशदिनान्यध्युष्य सुब्रह्मण्यापरनामधेयेन पालितपुत्रेण मुकुन्देन सह काशीं प्रातिष्ठत। गङ्गाधरशास्त्रितनयाविवाहे समागताः काशीस्था अपि इतः प्रस्थानमकार्षुः।

राजगुरुगृहकार्यव्यवस्थाविधानाय प्रेरितोऽपि पूर्वानुभवकारणात् तत्कार्यं न स्वीकृतवान् किन्तु राज्यव्यवहारे न्यायालये यत्कर्तव्यमस्ति तत्र सम्मतिमवश्यं दास्यामीति प्रतिज्ञातवान्।

अनन्तरञ्च राजगुरुपत्नी काश्यां सभावसन्तपूजासहस्रजनभोजनपञ्चकोशीयात्रार्थं सहस्रमुद्रा वितीर्य काशीं प्रैषयत् वीरेश्वरम्। तत्र कार्तिके मासि सर्वं कार्यं सम्पाद्य मार्गशीर्षे पञ्चक्रोशीयात्रादिकार्यं कृत्वा सम्प्राप्ते आह्वानपत्रे जयपुरं प्रत्यागमत्।

वैशाखमासस्यामायां मातामह्याः देवलोकप्राप्तिपत्रं संप्राप्य पुनः काशीमयासीत्। तदीयौर्ध्वदेहिककर्मणि जाते मुकुन्दस्य चौलसंस्कारार्थं मातुलानीं तदीयं कनिष्ठपुत्रं चादाय जयपुरं समेत्य इतः सप्तर्षिनगरं गत्वा ततः स्वभार्यां समादाय त्रिपदीस्थाने गोविन्दराजपट्टनं प्राप्तवान्। ततो द्वितीयस्मिन् दिने त्रिपदीगिरिं सार्धक्रोशत्रयं समारुह्य वेङ्कटेश्वरदेवदर्शनमकार्षीत्। स्वमित्रदत्तपत्रेणपरिचयं विधाय वेश्मन्येकस्मिन् न्यवसत्।

अपरेद्युश्चौलकर्म कृत्वा गोविन्दराजपट्टनं प्रत्यावर्तत। तत्रैकस्मिन्नुद्याने त्रिलोचनघट्टवासिनोऽन्नाशास्त्रिजामात्रा साक्षात्कारो जातः। चिरकालात् प्राक् शास्त्रिणः श्वशुरस्य कनीयान् भ्राता काश्या निरगवत्। यस्य निवासस्य कोऽपि संकेतो नासीत्। अन्नाशास्त्रिजामातृवाक्येनामुष्य सम्पूर्णो वृत्तान्तो विदितः। भूयश्चायं कालहस्तीश्वरदर्शनार्थं दक्षिणकाश्याः स्वर्णरेखासरितस्तटं प्राप्य मातुलानीप्रेरणया काञ्चन कन्यामवलोक्य कोल्हापुरं प्रत्यागतस्तत्र लक्ष्मीदर्शनं कृत्वा तत्रत्यैर्द्राविडैः सम्मानितः पुनः सप्तर्षिनगरमागच्छत्। ततश्च पुण्यपत्तनं प्राप्य रामकृष्णशास्त्रिणं साक्षात्कृत्य संभाष्य चैतन्निर्दिष्टस्थाने दिनद्वयमवस्थाय काशीं गन्तुं प्रेरितो मद्रासनगरमगात्। तत्र मातुलद्वितीयपुत्रस्य

विवाहार्थं मुम्बापुरीवटोदराहमदाबादनगरेष्वेकैकं दिनं स्थित्वा जयपुरमागच्छत्। पत्नीं मातुलानीं च पुत्रेण मुकुन्देन सह मथुरामार्गेण काशीं प्रति प्रेषयामास।

**राजव्यवहारः**

आश्चर्यकरमिदं प्रतीयते स्म यदेकस्य भूस्वामिनो मृत्योरनन्तरं तदुत्तराधिकारिणः ग्रामद्वयात् प्रतिशतं पञ्चदशरूप्यकाणि राजकररूपेण ग्राह्याणि। अयमेव निर्णयोऽधीनस्थसम्बन्धिकर्मचारिलेखानुसारं निर्णायकाधिकारिणाऽपि दत्तः दण्डोऽयं देवपूजकस्याथवा देवतायाः ? इति न बुद्धिपथमारोहति। एवंविधा निर्णयाः कार्याधिकारिणामविचारिताद्योतकाः।

राजगुरुकामनाथशास्त्रिणः स्वर्गवासानन्तरं तत्पुत्रः काशीनाथः स्थानाधीशो मन्तव्य एतदर्थं राज्ये व्यवहारः प्रवर्तितः। राज्यसर्वकारः श्रीजीमन्दिरस्थगोपीजनवल्लभदेवपूजादिव्यवस्थानिमित्तं ग्रामद्वयस्य भूमिं काशीनाथस्याधिकारे दत्तवान्। ग्रामान्तराणां भूमिविषये काशीनाथपितुरग्रजात्मजेन लक्ष्मीनाथशास्त्रिणा प्रवर्तिताभियोगानन्तरं निर्णयो भविष्यति। देवाराधनं विना किमपि कार्यं न सम्पद्यत इति विचार्य काशीनाथस्तदीया माता च सहस्रचण्ड्यनुष्ठानार्थं त्रिभिर्ब्राह्मणैः सह श्रीवीरेश्वरं काशीं प्रैषयताम्। तत्राश्विनशुक्लप्रतिपदि नवरात्रारंभसमयेऽनुष्ठानारंभं कारयित्वाभियोगे सहायतार्थं वीरेश्वरो जयपुरमागच्छत्।

अबीरायां स्वसरि लक्ष्मीनाथशास्त्रिकृताभियोगस्य निराकरणस्यावश्यकतामनुभूय स्वस्रा समाहूतः समागत्य च तत्रावधानतया मनोदधे। अबीराया भगिन्याः कार्यनिष्पादनं सहोदरस्य मुख्यं कर्तव्यमेवातः शास्त्रिवर्यो जयपुरराज्यमुख्यामात्येन श्रीकान्तिचन्द्रमहोदयेन प्रातिवेशिकत्वादतीव सम्पर्कं साधितवान्। "कः कालः फलदायकः" इत्याभाणकानुसारमश्वमेधाध्वरादियज्ञावसानजातापूर्वस्येव साधितसम्पर्कस्यापि कालान्तरे फलदायकत्वात्।

अभियोगनिर्णयो मन्दगत्या भवति न तु त्वरितया गत्येति जयपुरवाराणस्योः कार्यवशाद् गमनागमने विदधदयं मुख्यामात्यस्य साक्षात्कारमन्येषामपि प्राड्विवाकादीनां साक्षात्कारं प्रायशो व्यधाच्छास्त्रिवर्यः "राज्ञः परिकरः सेव्यो

न सेव्यः केवलो नृपः " इति नीतिवचनं हृदये निदधानः। परिचितिस्तु तैर्जातप्रायैव मुख्यामात्यभवने।

श्रीलक्ष्मीनाथशास्त्रिणा सह प्रचलितेऽभियोगे न्यायालयस्तमाहूय प्राबोधयत् यद् भवान् ग्राममेकमादाय तुष्यतु। परं मथुराप्रसादवाक्कीलस्यैतद्विषयिण्याऽसम्मत्या स उपरितनं प्रस्तावं न स्वीचकार। अभियोगव्यवस्थामापादयितुं मथुराप्रसादवाक्कीलतुल्यौ द्वौ वाक्कीलौ विषयेऽस्मिन्नियोजितौ। न्यायाधीशस्य स्नेहसम्पादनायापि प्रयासः प्रारब्धः। न्यायालयेऽर्पितानि राजकीयाधिकारपत्राणि पुण्यपत्राणि दानपत्राणि समालोक्य च न्यायालय इदं निर्णीतवान् यत् पितृपितामहानां ग्रामाणामाद्यादेकग्रामस्यार्धं द्वितीयग्रामस्य चतुर्थांशं च दद्यात्। एकश्चैवं निर्णयं दत्तवान् द्वादशसहस्ररूप्यकाणि ददातु। ततो निर्णयभिन्नत्वान्निर्णयपत्रमुच्चाधिकारिणः सम्मुखे प्रेषितम्। तत्र द्वादशसहस्ररूप्यकाणि न देयानि, एतदतिरिक्तं यन्निर्णीतं तदवश्यं देयमिति निर्णयो जातः। एतन्निर्णयविरुद्धं तेनाग्रेऽभियोगः प्रवर्तितः। तत्रैकः सदस्योऽवदत् यदस्य कोऽपि सम्बन्धो नास्ति, अतः निरस्तः क्रियते। द्वितीयश्चैवं निरणैषीत् यत् प्रत्येकग्रामस्य तृतीयांशो देयः। मन्त्रिपरिषदि यदायमभियोगः प्रस्तुतस्तत्र द्वितीयन्यायालयकृतनिर्णयस्यैव पुष्टिरभूत्।

चिरायप्रचलदभियोगलाभेनात्मस्वसृस्वान्तजातप्रसादोदन्वदुद्वेलताप्रकाशः शब्दैरेवन्निर्दिष्टः "लक्ष्मीनाथस्य गुराणीगृहे न कोऽप्यधिकारः पूर्वराजेन स्वीकृत इति नहि अद्यापि कश्चनांशः, किन्तु ते रामनाथपुत्रं प्रार्थयन्त इति तस्य पुत्रत्वेन परिग्रहाय मम सम्मतमिति भूभागव्यवस्थापकाय कथनीयमितीयं महाराजाज्ञेति" सुरेन्द्राच्छ्रवणं रामवल्लभेन निश्चयकरणं च तथैवोपलब्ध्या लक्ष्मीनाथपराजयेन महान् सन्तोषश्च। आगतेभ्यो महाराजाज्ञाश्रावणं सर्वेभ्यः। महादेव्या महाराज्ञ्या च मनुष्यद्वारा श्रावणमेतन्निर्णयस्य।

लक्ष्मीनाथः सर्वं त्यक्त्वा गन्तुमितः प्रवृत्तो महाराजं द्रष्टुं प्रीतमनिवास आसीन इति श्रीनिवासवाक्येन सम्पद्ग्रामेण प्रबोधिताया भगिन्याश्चित्तसान्त्वना, नापि स किमपि कर्तुं शक्त इति। लक्ष्मीनाथस्य दौष्ट्यप्रतिबन्धाय यत्नः।

इत्थं निर्णये जाते ( 1932 ) विक्रमाब्दतो यद्गृहं निशासार्थं वादिसमीप आसीन्महाराजस्तद्रिक्तं कर्तुमादिदेश। ऊनपञ्चाशदधिकैकोनविंशति-

शततमे विक्रमाब्दे माघमासे अमावास्यायां अर्धोदयपर्वणि स्नातुं राजाज्ञया पुत्र-वधूदासदासीसहितः प्रयागमगच्छत्। माघपूर्णिमाग्रहणे काश्यां स्नात्वा गयां गत्वा पुनश्च काशीं प्राप्यायोध्यामथुरावृन्दावनादितीर्थानां यात्रां कृत्वा श्रावणमासे जयपुरमागच्छत् शास्त्रिवर्यः।

**सिद्धपुरुषसम्पर्कः**

एतस्मिन्नन्तराल एवासन्नाप्तवर्गेभ्यः प्राक्कदाचनाम्बापुरीसौधप्रत्यासन्न-प्रासादस्थशिलादेवीदर्शनात् प्रत्यावर्तमानेन श्रुतचरसिद्धषड्बाबालावृत्तेन मनस्यवधार्य तद्दर्शनं षड्बावसथसविधस्यार्बुदाचलरेलैकदेशस्थ—पर्वताधित्यकाश्रमं समुपेत्य महात्मनश्चिरकांक्षितं दर्शनमलम्भि। दर्शनानन्तरमभिवादनादिभिरर्चितोऽसौ महात्मा शास्त्रिमनोगताभिलाषं सम्यगवबुध्य सम्पिपादयिषुरक्षौ पुष्पस्रजं शास्त्रिकण्ठे संयोज्य फलादिसंभृतं करण्डमेकमयच्छत्। किञ्चिद्दिवसानन्तरमेव शास्त्रिणो नियोगः समीहितराजकीयसेवायां प्रतिष्ठिताध्यापकपदे संजातः। प्रसन्नमना द्रविडशास्त्री कृतज्ञतां प्रकाशयितुकामोऽभिलषितसिद्धिदायकमहात्मनोऽभ्यर्णमगच्छत्। शास्त्रिवर्यमवलोक्य प्रसन्नमना महात्मा माल्यफले प्रदाय व्यसर्जयदमुम्।

**प्राध्यापकपदे नियुक्तिः**

जयपुरमहाराजश्रीरामसिंहनृपतिसम्मानसमानीतवैयाकरणपुङ्गवरामभजसारस्वते गुणनिधिवसुभूमितेशवीयाब्दचतुर्थमाससप्तविंशतितारिकायां ( 27-4-1893 ) रामसन्निधये त्रिदशालयकृतावासे जयपुरराजकीयसंस्कृतपाठशालाध्यक्षे विनायकामेनामनलोकयितुमनीहमानः शिक्षाविभागाध्यक्षः कालीपदवन्द्योपाध्यायो महाराजकालेजतः श्रीलक्ष्मीनाथशास्त्रिद्राविडं विगमय्य सनाथयामास। प्रवर्तमानवत्सरस्य मईमासस्य द्वितीयदिनाङ्के ( 2-5-1893 )।

सिद्धानुकम्पया भवितव्यतायाः प्राबल्येन चतुर्णवत्यधिकाष्टादशशततमे ( सन् 1894 ) शवीयाब्दारम्भे संस्कृताध्यापनायाध्यापकस्याङ्ग्लमहाविद्यालयेऽनुभवताऽऽवश्यकतां मुख्यामात्यकान्तिचन्द्रेणानुषङ्गिकतयानुयुक्तः कश्चनात्मीयाप्तजनः समुदतरत्तत्क्षणमेव यद् वीरेश्वरशास्त्री चिराय सुपरिचितः श्रीमतां विद्वान् योग्यश्चायमेव किं न नियोजनार्हो यदितरान्वेषणं विधीयते। निशम्यैत-

ह्वचश्चकितोऽवोचत मुखोपाध्याय:, सोऽपि किं पण्डित: ? मम त्वभिभाषकत्वेन ज्ञातचर:, स तु याथार्थ्येन विद्वानेवेति निर्णीय विश्वस्तसूत्रेण स्वीयेन न्ययोजयत् संस्कृताध्यापनायाङ्लमहाविद्यालये प्रचलतो वर्षस्य सितम्बरमासस्य षोडश-दिनाङ्कतो मैथिलमहाभागस्य चेतो व्यथात् स्थानान्तरं संस्कृतविद्यालये।

## दैनन्दिनीलेख:

शतवर्षेभ्य: प्राग्यो दैनन्दिनीलेखक्रम: प्रारब्ध: शास्त्रिमहोदयेन पण्डितेनापि सताऽनुदिनं द्विधा विभज्य तत्रैकायव्ययबोधिका दैनन्दिनी द्वितीया चादिवसानुष्ठितकार्यकलापानामन्योन्यसम्मेलनसम्बद्धक्रियाविविशेषाणामवगमयित्री। अत्र लेखे देवनागरीलिपि: प्रयुक्तेति नास्ति कापि विचिकित्सा, परमित: पूर्वं दक्षिणभाषास्वन्यतमा कतमा भाषा द्राविडत्वादस्य द्राविडी महाराष्ट्रजै: सह साहचर्यान्महाराष्ट्री मद्रासभवा मिश्रिता वेति न निर्णेतुं शक्यते दक्षिणदेशभाषाऽपरिचयहेतो:।

राजकीयसेवोपलब्धेरनन्तरमपयातेषु कतिपयवासरेषु भाषापरिवृत्तिविहिता शास्त्रिणा। सर्वोऽपि लेख: संस्कृतभाषयैव प्रारभ्यत प्राक्तनीं भाषां परिहाय।

आङ्ग्लानां नववर्षारम्भे पञ्चनवत्युत्तराष्टादश ( 1895 ) शततमहायनादिमदिन एव दैनन्दिन्यां निर्विघ्नतावाप्त्यै प्राचीनै: क्रियमाणमङ्गलाचरणपरम्परामक्षुण्णामाधातुं भारतीयपरम्परानिर्वाहाय क्रियाकलापलेखनात्प्राग्गणपतिसरस्वतीगुरुचरणानभिवन्द्याङ्ग्लवर्षस्वीकृतिकारणमात्मनो दर्शयताऽलेखि–

"अद्य हूणवर्षारम्भस्तत्स्वामिनी ( विक्टोरिया ) देशस्यास्य साम्राज्ञीपदमलङ्कुरुते तत्परतन्त्रतयाऽस्माभिरपि स एव वर्षारम्भोऽङ्गीकृतो मुद्रितश्चेति मयापि कृत्यलेखाऽव्ययलेखावेवं प्रारब्धौ"। दैनन्दिनीलेखेनैतेन शास्त्रिवर्यस्याधि: पराधीनताजन्य: स्पष्टं परिलक्ष्यते।

राजकीयसेवास्वीकृते: पूर्वमपि शास्त्रिपाद: "पक्षादवैयाकरण:", "अनभ्यासे विषं विद्या" सूक्तिद्वयमन्तरनुध्यायन् सपक्षमागतान् पिपठिषून् विद्यार्थिन: सस्नेहमध्यापिपदत एवातिश्रद्धालवस्ते स्वप्रमोदकार्येऽसम्मिलितगुरुचरणानां

निलये वस्तुजातं प्रेषयन्त एव लिखन्ति शास्त्रिमहाभागा अस्यामेव दैनन्दिन्यां यद् गिरिधरलालस्य वाग्दानमनु शर्कराफलानि समागतानीति ।

अयं गिरिधरलालो झालरापाटनवास्तव्यो नागरब्राह्मणः शास्त्रीद्राविडोऽनुदिनजायमानजीवनघटनामेकैकामवश्यमुदलिखत् ।

भवदीयवैदुष्येणात्यधिकं प्रभावितो जयपुरराज्यमुख्यामात्य आवश्यकपरामर्शहेतोः स्वकीयसौधे यदा कदाचन भवन्तमाकारयामास ।

**"गन्तव्या राजसभा द्रष्टव्या राजपूजिता लोकाः ।**
**यद्यपि न भवन्त्यर्थास्तथाप्यनर्थाः प्रलीयन्ते" ॥**

इत्यादिप्राचीनानुभूत्योक्तं वचनमनुसृत्यान्वहमेव गमागमादिकमाचारीत् । महानुभावोऽसौ न केवलं पण्डित एवापितु मन्त्रतन्त्रश्रौतस्मार्तानुष्ठानादिविविधकर्माभिज्ञोऽप्यविद्यत ।

कालमहिम्ना मुख्यामात्यकान्तिचन्द्रमुखोपाध्यायज्यायसात्मजे भवदेवशर्मणि प्रबलामयाक्रान्ते मुख्योऽमात्यो भवन्तमाहूय परामृश्य चैतदीयोल्लाघतानिमित्तं देवाराधनमाधातुममुमेवाभ्यर्थयामास । अनिच्छन्नपि मन्त्रिमहोदयाग्रहातिशयपाशपतितोऽर्थनाङ्गीकारमेवात्ममुक्तिसाधनं मन्यमानो महामृत्युञ्जयजापमेव बालकारोग्यहेतोरचर्करीद् यथाविधि । मृत्युञ्जयमन्त्रानुष्ठानप्रयोगेण कतिपयैरेवाहोभिरमात्यतनूजन्मा नीरोगतामगच्छत् ।

ब्राह्मणानां षट्कर्मसत्वेऽपीज्याध्ययनदानकर्मानुष्ठातॄणामुत्तमत्वख्यापनात् प्रतिग्रहस्य गर्हितत्वाच्चैकदामात्यकान्तिचन्द्रक्रियमाणवृषोत्सर्गकर्मणि महाभारतीयविराट्पर्वपारायणार्थमर्थितोऽनुष्ठितपारायणो दक्षिणामस्वीकृतवानान्तरिकप्रसादाभावात् प्रतिग्रहग्रहणे । प्रतिग्रहादानैः पूर्वसंचितात्मतपःफलनैःशून्यमापद्यत इति दृढा धारणाभवद् भवतः । स्वयं तु प्रतिग्रहग्रहणविरुद्ध आसीदेव परमितरानपि प्रतिग्रहीतॄनवलोक्य विप्रानदुःख्यद् भवदीयहृदयम् ।

जयपुरीयमहाराजकालेजे संस्कृतप्राध्यापकपदकार्यमनुतिष्ठन्नेष न प्राप सप्तमासावधिवेतनम् । धैर्यं धारयन्नन्ततो गत्वा पञ्चनवत्युत्तराष्टादशशततमेशवीयवत्सरस्य मईमासस्य चतुर्थतारिकायां ( 4-5-1895 ) युगपच्चतुर्दशदिव-

सोत्तरसप्तमासवेतनं सपादपञ्चाणकाधिकत्रिसप्तत्युत्तरत्रिशतीं (3731=।) रूप्यकाणामविन्दत। जयपुरीयरजतमुद्रायां राज्यसेवातो लब्धमिमं धनराशिं सर्वतः प्रथमं पूजनीयभगिनीपादयोरर्पितवान्। इत्थङ्कारं भारतीयसंस्कृतेरादर्शमन्यजनेभ्योऽपि सोल्लासमुपस्थापितवान्। शक्तिशक्तिमतोरभेदं मन्यमाना प्रतिदिनानुष्ठीयमानपञ्चायतनपूजायां शिवस्यैव प्राधान्याद् भवानीपतेरसीमानुकम्पां विचिन्त्य सोमवासरात् प्राक् प्राप्तसप्तमासवेतनं च सञ्चिन्त्यास्य श्रेयसेऽपि भगवान् शङ्कर एव साधीयानिति निश्चितवती भगिनी।

अन्येद्युर्दशवादनवेलायामध्याप्य पाठालयात् प्रतिनिवृत्तमेनं भगिन्यादिदेश अद्य सोमवासर इति व्रतमवश्यमनुतिष्ठ शिवस्येति सहोदर्यादिशं गुर्वाज्ञादेश्यं मन्वानस्तत्प्रेरणया तद्दिनारब्धव्रतस्य यावज्जीवमासंशं निर्वाहमतानीत्।

सुपर्वेन्द्रवारुणीप्रतिस्पर्धिमंथिलमहाभागः स्थानान्तरानन्तरमुपजापमुत्पाद्य स्वसाध्यसाधने सफलीभवितुकामः शिक्षाधिकारिणा कालीपदवन्द्योपाध्यायेन स्वमाङ्ग्लविद्यालयेऽध्यापनयोग्यो नेत्येवंविधया वाचा शास्त्रिणोऽपमानं कारयित्वा निजनैपुण्येनामुष्याङ्ग्लविद्यालयतः संस्कृतविद्यालये स्वस्थाने स्थानान्तरं कारयितुमपारयत्पञ्चनवत्यधिकाष्टादशशततमेशवीयहायने सितम्बरमासस्य षट्तारिकायाम् ( 6-9-1895 )।

वृत्तमेतद्विदित्वामात्योऽधिकारिणोऽपमानं स्थानान्तरस्थगनादेशदुष्प्रभावञ्च चिन्तयित्वाऽसूचयदमुं गत्वाध्यापनकार्यविधानाय कतिपयमासान् यावत्, पुनरेतत् स्थानप्रत्यागमनमिति केनचिदात्मीयाप्तजनेन। तदनु मुखोपाध्यायप्रहितपरामर्शमनुध्याय संस्कृतविद्यालयेऽध्यापनकार्यमारब्धवान् मासस्य नवमतारिकातोऽसौ ( 9-9-1895 )।

व्याकरणोपाध्यायकक्षाध्यापनाय प्रदत्ताऽत्राधीतिनश्छात्रा भवदत्तचन्द्रदत्तगिरिधरगोविन्दराममदनलालप्रश्नवरप्रमुखा आसन्। एतदतिरिक्तविषयकक्षाछात्रानसौ कुवलयानन्दसाहित्यदर्पणावध्यापयत्।

आत्मकौशलादाङ्ग्लमहाविद्यालयमाप्तो मधुसूदनमहाभागस्तत्राध्यापिपद्विद्यार्थिनस्तदीयाध्यापनशैल्याऽपरितुष्टा अध्येतारस्ततः शिक्षाविभागाध्यक्षोऽध्यापयितुं तदीयास्पदे द्राविडलक्ष्मीनाथशास्त्रिणं प्रैषयत्तदा वीरेश्वरशास्त्रि-

णमभि छात्रैः प्रफुल्लचन्द्रादिभिरेतस्य वाक्कलहोऽजायत । एतदनन्तरं वाक्कलह-परिणामपरितुष्टस्य लक्ष्मीनाथशास्त्रिणो मनसि पूर्वतो वर्तमाना यदयं वीरे-श्वरो मधुसूदनस्याङ्ग्लमहाविद्यालयस्थिरीकरणे बाधक इति भ्रान्तधारणाऽ-पगता ।

कतिषुचिन्मासेषु प्रयातेषु छात्रैरन्यमाध्यमेनानेकविधाभिश्च लक्ष्मीनाथ-शास्त्री निखिलं तथ्यमभिज्ञाय वीरेश्वरशास्त्रिणो वासस्थानमवाप्यावादीद् यन्नि-र्दोषो भवानध्यायिनो नितरां श्लाघन्ते भवन्तम् ।

कदाचन लक्ष्मीनाथशास्त्री वीरेश्वरशास्त्रिणा सदनसम्बन्धिवार्ता विधाया-ब्रवीत् "त्वमीश्वकुरु" परमेतदीयपूर्वकृत्यानि स्मरन् द्राविडशास्त्री नाङ्गीकृतया-नेतदीयं वचः । लक्ष्मीनाथशास्त्रिणोऽयमियज्जुगुप्सतेस्म यदेकदा पाठालये समा-गतायास्मै सम्भाषणावसर एव न देयो विचिन्त्येदं नियतसमयात् पूर्वमेव ततः प्रचलितवान्निजावासं प्रति । पाठशालाकालावधिरासीन्नियतकालस्य प्रातः सार्धसप्तवादनतः सार्धैकादशवादनम् ।

**पण्डितानवबोधविकलता**

संस्कृतपाठशालायां स्थानान्तरे जातेऽत्रत्यपण्डितानां शास्त्रीयज्ञानातिरि-क्तज्ञाननैपुणीविरहेणाधिकारिकृतप्रश्नेषु जोषमासीनान्कटाक्षयँल्लिखति पञ्चनव-त्युत्तराष्टादशशततमेशवीयवर्षस्यान्तिममासस्य षड्विंशतितारिकायाम् ( 26-12-1895 ) ।

"किन्नामधेयास्तातचरणाः, कियद्वयो, वसतिश्च का, कश्चाध्ययनावधिः, कुत्राधीतिः, किञ्च मासिकं लभ्यते, कदाप्रभृतिसेवारताश्च भवन्तः ?" इत्यादि-प्रश्नानामुत्तरप्रदाने सर्वेऽपि पण्डिताः प्रभविष्णवो नाभवन्, परमुत्तरे सर्वेऽपि षट्शास्त्रज्ञाः सर्वज्ञाश्चाभूवन् ।

संस्कृतपाठशालायामध्यापयन्तं शास्त्रिणं "भावयाञ्चक्रे" इत्यत्र भूतवन्तं प्रेरयामास इत्यण्यन्तावस्थावाक्यमुच्चारयन्तं गङ्गाधरो वैद्यकृष्णरामभट्टसूनु-रवोचत् "भवन्तं प्रेरयामास" इति युक्तमिदं कथं स्यात् । जानकीलालचतुर्वेदेना-प्यनुमोदितं गङ्गाधरोक्तम् । ( अयं हि चतुर्वेदी पं० शिवदत्तसतीर्थ्योऽधुनाध्या-पको भूतपूर्वश्छात्रोऽत्रत्यः म० म० गिरिधरशर्मणां शिक्षागुरुरपि ) तदैव च

वैयाकरणपुङ्गवेन शिवरामशर्मणा समर्थितम् । अयं शिवरामशर्मा गुलेरी काशीतः समानीतः रामसिंहमहाराजेन श्रीरामभजेन सार्धमध्यापकोऽत्र । शास्त्रिणा सर्वेऽपि निर्भर्त्सिता मूर्खा इवावदन्निति । अपरेऽहनि पाठालयं गत्वा पाठयित्वा वैद्यपुत्रेण संविदं कृत्वा भूतवन्तमित्येवोचितमिति स्वीकारयामास । संस्कृतपाठशालायां भवदत्तगोविन्दरामचन्द्रदत्तभ्रमरलालप्रभृतयः पठन्त आसन् । गृहे च गिरिजाप्रसादराधाबल्लभमुखा अध्यैषत ।

सदनसमागतान् पिपठिषया पाठशालाध्यायिछात्रातिरिक्तान् दैनिकं कर्म विहाय विमुखान्निराशांश्च नाकार्षीत् ।

गुरुपूर्णिमादिवसे पाठालयावकाशसद्भावादत्रत्यतात्मवेश्मन्येवाचतुर्थयामम् । गुरुपूजानिमित्तागतमदनजलधरभवदत्तानिरुद्धकन्हैयालालगिरिजाप्रसाद-राधावल्लभकाशीनाथैरनुष्ठितनमस्योऽपि दक्षिणां तत्समर्प्यमाणां नाग्रहीदिति भासते भवदीया त्यागवृत्तिः ।

संस्कृतपाठालयीयाध्यक्षपदमध्यासीनो लक्ष्मीनाथशास्त्रिमहोदयो मिताक्षराव्याख्यायाः प्रथमश्लोकार्थं योगशास्त्रीयपारिभाषिकशब्दार्थानवबोधेनाधिजिगमिषून् वास्तविकार्थमवगमयितुन्न प्रभुरभूदिति लिखति द्राविडः "अद्य पाठालये महांश्चमत्कारो यल्लक्ष्मीनाथोऽपि पण्डितश्चेत् सर्वमेव सर्वेषां पठनं व्यर्थं मिताक्षराप्रथमश्लोकार्थोऽपि न तेन ज्ञात" इति । परेऽहनि वीरेश्वरशास्त्रिमहोदयः पाठशालामुपगम्य मिताक्षराद्यपद्यस्य योगसूत्रानुसारं यथार्थतयार्थं बोधयामास । भावत्कैवंविधज्ञानामर्षितो लक्ष्मीनाथशास्त्री शिक्षाविभागाध्यक्षश्रीकालीपदबन्द्योपाध्यायं समयागमत् । बन्द्योपाध्यायो लक्ष्मीनाथशास्त्रिणैव वृत्तं सम्प्रेष्य द्रविडशास्त्रिणमाह्वयदात्मसद्मनि ।

परलोकतापन्ने काशीनाथपितरि दशमदिनकृत्यनिर्वाहाय ब्रह्मपुरीस्थगोकर्णेश्वरमहादेवमन्दिरे सङ्घीभूते बान्धववर्गे स्मृतिः श्रुतेर्बाधिकेत्यनन्तरमपशब्दं व्याहरन्तं लक्ष्मीनाथशास्त्रिणं भर्त्सितवानेष शास्त्री ।

जातु लक्ष्मीनाथशास्त्री द्रविडशास्त्रिणोऽसन्निधौ परोक्षमेवार्षविवाहमधिकृत्य पाठशालायाममुष्य गर्हां व्यतानीत्, श्रुत्वैतत् ततः कुपित्वा मध्येमार्गमेव संगम्य प्रत्यक्षं बोधयित्वात्मपक्षमेवोररीकारयाम्बभूवासौ शास्त्रिवर्यः ।

भृशं शास्त्रिकर्मपरितुष्टोऽमात्यो द्राविडस्य स्थानान्तरं वर्षाभ्यन्तरेऽनवलोक्यात्मकृतसन्धां मृषा मन्यमानोऽगस्तमासस्य सप्तमतारिकायां (7-8-1896) निरभर्त्सयच्छिक्षाधिकारिणम् । अन्येद्युः सान्त्वयितुं शिक्षाविभागाध्यक्षमीशानचन्द्रतन्मातरावगच्छताम् । सधिक्कारं सान्त्वनां नीतः स उक्तवान्— "यतः प्रभृति वीरेश्वरोऽन्यपाठालयं प्रेषितस्तत आरभ्य सर्वे मदुपरि क्रुद्धाः सन्तीति ।"

एतन्मासत्रयोदशतारिकायां ( 13-8-1896 ई० ) कालीपदवन्द्योपाध्यायप्रहितः प्रधानलिपिको दुर्गाप्रसाददाधिमथो वीरेश्वरगृहान् समेत्याब्रवीद् यत् संस्कृतपाठालये न गन्तव्यं श्वो महाराजकालेजे गन्तव्यमिति । सममेवैतेन पुनः संस्कृतविद्यालयप्रेषणादेशासन्तुष्टो मधुसूदनमहोदयस्तत्कालमेव राज्यसेवामत्याक्षीत् ।

घटनयानया खिन्नमनाः शास्त्रिमहोदयः काशीस्थराजकीयपाठालये व्याकरणाध्यापकपदनियोगायावेदनपत्रमेकं तत्रत्य–प्रधानाध्यापकान्तिकमजीहयत् ।

त्यक्तराज्यसेवाकार्यभारमोभामहाशयमवेक्ष्य माधवसिंहमहाराजो धर्मसभासदस्यतामग्राहयदेतदीयपितृस्थानस्य किञ्चित् समयानन्तरन्निजपुस्तकालयाध्यक्षपदेऽपि प्रत्यतिष्ठिपत् ।

शरीरास्वस्थतया गृहीतावकाशः शास्त्री समुल्लाघतामित एव महाराजकालेजे विंशतितारिकायामष्टममासस्यागात् ( 20-8-1896 ई० ) ।

एतस्मिन् दिने शिक्षाविभागाध्यक्षानुकम्पातिशयमवलोक्य सचिन्तो गृहमागत्य सायमारामं गत्वा स्थितो रात्रावागच्छत् लिखति च दैनन्दिन्यां पाठालये तु शिक्षाविभागाध्यक्षैः कृपाधिक्यं प्रदर्शितमपि बिभेमि कुटिलमतेः । एतस्माद्धेतोर्मनोवैक्लव्यमादधानः शास्त्री काशीस्थराजकीयपाठशालाधिकारिणन्निकषा पत्रं सम्प्रेष्य पुनर्व्याकरणाध्यापकपदप्रदानाय निवेदितवान् ।

अब्दपूर्तिकृत्यस्य धर्मागमनिर्दिष्टतया प्रतिवर्षमयं स्वजन्मदिने रुद्राभिषेकं विधाय स्वजातीयानन्यानपि द्विजानबूभुजत् । स्वयमपि चाभ्यवाहरत् तदनन्त-

रम् । भगिनी चास्याराति वयं सम्पाद्य रूप्यकद्वयममुष्मादलभतैतदुपलक्षे । स्वयञ्च वासोऽधिगत्य प्रमोदेन महता सवर्षापनं जन्मदिवसममानयत् । विद्वद्भिरन्योन्यावासगमागमादिभिः साधितसम्पर्कत्वात् सभाजयितुमेनं नैयायिक-भवदत्तहरदत्तदुर्गाप्रसादप्रभृतयः सप्त समायाताः सम्मान्य प्रेषिताः शास्त्रिवरेण । भक्त्यामात्यभार्यया भगिन्या च प्रेषितोत्तरीये सादरमाददादेव शास्त्री ।

संस्कृतपाठशालायां ज्योतिषमधीयानोऽपि गिरिजाप्रसादो व्याकरणशास्त्रमध्येतुमन्येऽपि च समागच्छन् । तान् सहागतान् कदाचिच्चैकमेवाध्यापयत् । लवपुरीयपरीक्षाविभागाध्यक्षप्राप्तपत्राणामुत्तरं संप्रेष्य न्यायव्याकरणशास्त्रिप्रश्नपत्राणि निर्मितवान् ।

भवदन्तेवासिभवदत्तशर्मणो लट्टूजीत्यपरनामधेयस्य दाधिमथशिवदत्तपण्डितस्य पितृचरणस्य कनीयसोऽङ्गसम्भवस्य विष्णुदत्तस्योपनयनसंस्कारे सम्भूय भिक्षां प्रदाय बटवे सम्मानार्हामेकां मुद्रामादाय गृहं प्रत्यावर्तत । समासादितलोकव्यवहारनैपुणीयं सर्वेषामनुकरणीया द्रविडशास्त्रिणः ।

विगलितामर्षावेशो हनुमानिवानिष्टशङ्कयानुशयवानपि भवति कदाचन शास्त्रिमहाभागः । एकस्मिन्नहनि न्यायाधीशसुरेन्द्रनाथचट्टोपाध्यायसेवको मध्याह्ने समेत्य कृतशयनभङ्गो बभूव कोपभाजनमनन्तरञ्च सुरेन्द्रनाथस्वान्ते वैषम्यसम्भावनयानुशयमेवमकरोत् । "वक्राः प्रभवः खलु" ।

महाराजाकालेजेऽध्यापयता शास्त्रिणा भूरामलमक्खनलालयोरन्यं समुद्भूतयावकलहक्रोधमभिवीक्ष्य मनसि द्वयोर्मक्खनलालाघातहरिचरणराजेन्द्रचिन्तितं विज्ञाय स्वकीयविवशता प्रकटितानौचित्येन सहायुक्तमिदं वयं किं कुर्मः ।

सुरेन्द्रनाथचट्टोपाध्यायालये राधामोहनमाथुरप्रयासेन सन्धि समाकर्ण्य प्रसन्नः शास्त्रिवर्यः संस्थाध्यापकगौरवहानिर्नास्मा अरोचत जायमानैवंविधकर्मणा । अमात्यतनयानध्यापयितुमनुदिनमाराममगमत् तत्रैव चाङ्ग्लभाषा-पुस्तकं वामनशिवरामआप्टेकृतं ससंस्कृतं संस्कृतव्याकरणस्यारब्धमध्येतुं कालीचरणचट्टोपाध्यायेन ।

नव्यन्यायशास्त्रिपरीक्षोत्तीर्णो बदरीनाथमहोदयो वर्षद्वयानन्तरमङ्गनन्द-वसुचन्द्रमितेशवीयाब्दद्वादशमासैकोविंशे दिने ( 19-2-1896 ) महाराज-संस्कृतपाठशालायां न्यायशास्त्राध्यापनाय नियुक्तः आसन्नवर्षद्वयं यावन्निर्वहन्न-ध्यापनकार्यं समयानुकूलाङ्ग्लभाषाध्ययनविकमिषया परित्यज्याध्यापकपदं महाराजकालेजे प्राविशत् ।

महाराजकालेजेऽध्यापयन्नपि संस्कृतपाठालयवृत्तपरिज्ञानखिन्नो मुनि-निधिवसुचन्द्रमितेशवीयवर्षादिममासषट्तारिकायामेवं लिखति ( 6-1-1897 ) यद् वैयाकरणपुङ्गवो लक्ष्मीनाथशास्त्रिद्राविडः " आतो धातो " रिति सूत्रस्थ-ग्रन्थं बोधयितुमसमर्थ एव – "पाठालये लक्ष्मीनाथशास्त्रिणोऽलग्नो ग्रन्थ "आतो धातो " रिति सूत्रस्थः शेखरः " इति । अस्यैव मासस्य दशमतारिकायां लक्ष्मी-नाथशास्त्रिणो रामकुमारेण युद्धं वाचाभूत् संस्कृतपाठालये । ततो रामकुमारो निष्कासितः पाठालयाल्लक्ष्मीनाथशास्त्रिणा ।

दिग्गजाङ्कवसुभूमितेशवीयाब्दद्वितीयमासषोडशतारिकायां (16-2-1898) गोपालदत्तप्रेषितं काशीतः पुरोहितायानायितं शिरोवेष्टनमेकादशाणका-धिकत्रयोविंशतिमुद्राक्रीतं लब्ध्वा मूल्यादिपत्रेण सह गणपतिद्वारा गङ्गाधर-शर्मणां गृहे प्रैषयत् शास्त्रिमहोदयस्तदा नेत्रे च द्वादशाणकान्भाटकस्यापि दत्तवान् ।

गोपीनाथपुरोहितेनाङ्ग्लभाषायामाचार्यपदवीं लब्धवतोपायनरूपेण प्रेषिते प्रेमलीलाभर्तृहरिशतकयोः पुस्तके प्राप्तवान् द्रविडशास्त्री वर्तमानवर्षस्य नवम-मासस्य षोडशतारिकायाम् ( 16–9–1998 ) ।

**धर्मशास्त्रेऽधिकारः**

जयपुरराज्यप्रधानामात्यज्यायान् सूनुरीशानचन्द्रमुखोपाध्यायो भवदीया-न्तेवासितादानेन गुरुममन्यतैव परमेतदीयतातः श्रीकान्तिचन्द्रमहोदयोऽपि विवा-दनिर्णयायानेकधर्मागमग्रन्थान् भवतोऽधीतवानसकृद्धर्मशास्त्रीयव्यवस्थालेखना-यापि प्रार्थयत चातो गुरुमेवामुममन्यत ।

कस्मिंश्चिद्वासरे प्रधानामात्यो भवन्तन्निकर्षैकविवादनिर्णयनिमित्तं पत्रं लिखित्वा न्यवेदयत् यत् स्त्रीधनाधिपतित्वे कस्याधिकारः पाणिग्रहणावसरे च

किं दीयते ? ऋणादाने ऋणप्रत्यावर्तनविषयिणी धर्मशास्त्रीयव्यवस्था का ? कृपया व्यवस्थापत्रमुल्लिख्य प्रेषणकष्टं करोतु । धर्मशास्त्रीयग्रन्थानखिलानालोड्य समस्तप्रश्नोत्तराणि तदाधारेण निर्दिश्य व्यवस्थापत्रं प्रैषयत् । एवं कान्तिचन्द्र-मुखोपाध्यायो गोपनीयविषयान्विश्वासभाजनतयाऽभिज्ञाय गुरुवदत्र श्रद्धधात् ।

अत एव च यदाकदाचन मुखोपाध्यायो यथाकथाचन पर्याप्तमुपायनी-कृतवान् । यदपि शास्त्रिमहोदयः प्रतिग्रहग्रहणप्रतिकूलस्तदपि गुरुवद्वर्तनादुपहा-रमुपानयत् । एकदा मध्याह्ने सबहुमानमाहूतः शास्त्रिवरो मन्त्रिमहोदयसदनं समासाद्य ततो रजतपात्राणि राङ्कवं क्षौमयुगलं सुवर्णाङ्गुलीयकमेकां स्वर्णमुद्रां पञ्चरूप्यकाणि प्रापदुपायनतया ।

महाराजाधिराजो जयनगरनरेशः श्रीमाधवसिंहो भूपतिर्भानुसप्तमीमहोत्स-वावसरे श्रीमते कान्तिचन्द्रमहाभागाय शिक्षागुरुपदवीं प्रदायामण्डयदेनममण्डय-न्नमित्राणि । स्वशिष्यस्यैवं सम्मानेन द्राविडमहाभागो हर्षोल्लासभरतां बिभरा-म्बभूव, परमन्यजनेषु महान्कोलाहलः पदन्यधित । अन्यच्च व्योमाभ्रनन्दोर्वीमि-तख्रिष्टाब्दाष्टममासैकोनविंशतितारिकायां लिखति ( 19 । 8 । 1900 ) द्राविडो यदद्य महाराजमाधवसिंहमहोदयानां जन्मदिवसोत्सवप्रयुक्ता बृह-न्नलिकानिनादा असूचयन्महाराजजन्मदिनम् । गुरुपूजासायं सभाभवत् तत्समय एव श्रीमदमात्यकान्तिचन्द्रमुखोपाध्यायेभ्यश्चामरे छत्रं चतुरस्रयानं गजं तद-व्ययवहनाय ग्रामञ्च दत्तवन्तो माधवसिंहमहाराजाः ।

श्रुतसम्मानप्रवृत्तिः शास्त्रिवरोऽन्यस्मिन् दिने श्रीमताममात्यानां शिक्षा-गुरूणामारामं गत्वाभिनन्द्य गृहमागमत् । ततो मुख्यामात्यः श्रीकान्तिचन्द्रमहो-दयो दिवंगतस्वधर्मपत्नीस्मृतिमन्दिरकार्यं परिपूर्णतां याते गुरुवैदुष्यप्रभावाकृष्ट-हृदयो मुनिशरनिधिभूमितविक्रमवत्सरे ( 1957 ) पौषमाससितप्रतिपदि सोमवासरान्वितायां तदीयस्मारकोत्कीर्यमाणान्यरचितश्लोकावलोकनाय समा-हूय मेघनादभट्टाचार्येण साकमेनं प्रैषयत् । श्लोकानवलोक्य तदीयसौष्ठवविषये मुख्यामात्यायोत्कीर्णताहेतोर्न्यवेदयत् ।

## परीक्षाकेन्द्रस्थापनं जयपुरे

शिक्षाविभागाध्यक्षपदमध्यासीनः कालीपदवन्द्योपाध्यायः परीक्षाकेन्द्रा-भावमत्रोदीक्ष्य भवत्प्रेरणया तत्स्थापनाय प्रयतमानोऽनारतं प्रवर्तमानख्रिष्टव-

त्सरस्य जनवरीमासस्य द्वितीयदिनाङ्क (2।1।1900) परीक्षाकेन्द्रं जयपुरे प्रत्यतिष्ठिपदेतदालोच्य सर्वेऽपि परीक्षार्थिनश्छात्रा अध्यापकाश्च सबहुमानं शश्लाघिरे।

परीक्षापारितोषिकरूपेण लब्धं सप्ताणकात्मिकरूपकचतुष्टयं बदरीनाथशास्त्रिणे दत्वा समतुष्यत् द्राविडमहाभागः। पण्डितदुर्गाप्रसादानां दीपावलिलक्ष्मीपूजनदिननिर्णयायागमनं समय एव कर्तव्य इति निश्चयः। प्रचलतो वर्षस्य नवममासचतुर्दशतारिकायां वसवासंवसथावस्थितमहाचन्द्रयतिसविधे तत्पृष्टम्—

**कमण्डलूपमोऽमात्यस्तनुत्यागो बहुग्रहः।**
**नृपतेः किं क्षणो मूर्खो दरिद्रः किं वराटकः ॥१॥**

इति श्लोकं व्याख्याय सविस्तरं प्रेषितवान् शास्त्रिवर्यः। मासस्यास्य चतुर्विंशतितारिकायां कालीपदवन्द्योपाध्यायशरीरास्वस्थताम्निशम्य शिक्षाविभागाध्यक्षकालीपदशर्मणां वन्द्योपाध्यायानामामयज्ञानाय तदीयगेहं गतस्तत्र लक्ष्मीनाथभाथिनाथप्रभृतिभिः सम्भाषितवान् पुनरन्यस्मिन्नहनि नक्तं शिक्षाविभागाध्यक्षसद्म समासाद्य तत्र वर्तमानैर्लक्ष्मीनाथादिभिः संवाद्य गृहं प्रत्यागतः शास्त्री। अस्यैव मासस्यान्तिमतारिकायां ( 30।9।1900 ) शिक्षाविभागाध्यक्षकालीपदवन्द्योपाध्यायशरीरविद्यमानरोगाधिक्यश्रवणं यदेकदर्वीमितदुग्धस्यापि गलाधोगमनं महाकष्टेन। वर्षस्यास्य दशममासद्वितीयतारिकायां ( 20।10।1900 ) शिक्षाविभागाध्यक्षशरीरे किञ्चित् स्वास्थ्यलाभ इति मक्खनलालोक्तिश्रवणम्।

नवमतारिकायामध्यक्षशरीरे रोगाधिक्यश्रवणेन शास्त्री सचिन्तं स्थितः। दशमतारिकाञ्च पुनस्तच्छरीरे रोगाधिक्यमाकर्ण्योद्विग्नमना अविद्यत शास्त्री। रात्रौ सार्धनववादनवेलायां शिक्षाविभागाध्यक्षकालीपदवन्द्योपाध्यायानां प्राणोत्क्रमणमाकर्ण्यातिशयमखिद्यत द्राविडः। संसारस्य दुःखमयतां विचिन्त्याश्वस्तः कथमपि।

स्वर्याते वन्द्योपाध्याये संजीवनगङ्गोपाध्यायः शिक्षाविभागाध्यक्षपदमशिश्रियत्।

सप्तपञ्चाशदधिकैकोनविंशतिशततमस्य ( 1957 ) विक्रमवत्सरस्य तपोमासासितपक्षद्वितीयायां द्वाविंशत्युत्तरैकोनविंशतिशततमविक्रमवत्सरात् (1922) पञ्चत्रिंशद् वर्षेभ्यः प्रवर्तमानविवादं लक्ष्मीनाथशास्त्रिसम्बन्धिभीकोजीपन्तो माध्यस्थ्यमवलम्ब्य लक्ष्मीनाथशास्त्रिपितृव्यपत्न्यां शास्त्रिवर्यभगिन्यां समासादितभर्तृभ्रातृजोदवसिताहितभुजिक्रियायां सत्यां समाप्तिमगमयत् ।

भवदीया शास्त्रनैपुणी न केवलमपि तु लोकातिशायि व्यवहारप्रावीण्यमपि विसदृशमेवाविद्यत ।

## श्वसुरालयगमनम्

कस्मिंश्चिदवसरे जयपुरात् प्रस्थाय महाराष्ट्रान्तर्वर्तिकराडग्रामस्थश्वसुरालयप्रेप्सुरभवत्तत्र महामारी सुरसेव वदनं व्यादाय प्रासर्पत् । पथि महामारीसङ्क्रमणसाध्वसात्तच्छामकौषधस्य सूचिवेधेनान्तःप्रवेशप्रबन्धस्तत्रत्यसर्वकारेण कृतोऽनेनापि स्वीकृतः सूचिवेधेनान्तःप्रवेशो भेषजस्य । तज्जन्यव्यथानुभवो दैनन्दिन्यामङ्कितो द्राविडेन, "स्वर्गसदृशश्वसुरालयसुखसमक्षमकिञ्चित्करमेव कष्टमेतत्" ।

सन्निहितवाष्पगन्त्रीस्थितिस्थानं कराडनगरमासीत्तत्र धर्मशालायामूष्मयानयात्रां समाप्य यापिता कथमपि यामिनी । प्रातः स्नानादिनित्यकर्मनिवृत्तो वृषभशकटेन कराडग्राममवाप्य ततः सार्धदशाणकाधिकैकमुद्रया शकटान्तरमाधाय गारुडाग्रामं प्रति प्रचलितोऽसौ मार्गेऽतिसाराशुद्धाधोवस्त्रमभिज्ञाय मध्ये वर्त्म शकटमवरुध्य कुमनाभिधायां धुन्यां वासांसि परिमार्ज्योज्ज्वलपरिधानीयानि परिधायाभीष्टास्पदमापन्नः ।

तत्र निखिलानभिवन्दनीयानभिवन्द्य स्वधर्मपत्नीप्रेषितविविधवस्तूनि तत्तज्जनेभ्यो वितीर्य सायं कृतस्नानो यज्ञोपवीतान्तरं परिधार्य कृताहारादिक्रियोऽस्वपीद् द्रविडशास्त्री ।

अपरेद्युरप्राक्षीदात्मदुहितुरनागमनकारणं श्वश्रूस्त्वसंकटमुपवर्ण्य कथमपि समतोषयत् पत्नीमातरम् । गारुडग्रामस्थाखिलस्थानानि संवीक्ष्य बहुलाभिधानसंवसथञ्चाभिगम्य तत्रत्यां संस्कृतपाठशालां समालोक्य तदीयाध्यक्षसम्भूतवा-

र्तालापेनातीव प्रभावितोऽसौ । नवनिधिसिद्धीन्दुमितख्रिष्टहायने ( 1899 ) दैनन्दिन्यां लिखन्नास्तेऽयमिदम् "योग्योऽयं पाठशालाध्यक्षो यस्य कृत्वा शतं विद्यार्थिनो यत्र पठन्ति"। लेखेनामुनानुमीयते लघुग्रामेऽस्मिश्छात्राः शतं तत्कालं संस्कृतमपाठिषुरेतस्य सर्वस्य श्रेयः पाठशालाध्यक्षमुपयातीति । यदीयायासेन समीचीनया व्यवस्थया चात्रत्येयं पाठशाला प्राप्तास्पदा विद्यते ।

बहुलाग्रामतः परावृत्यावाप्तगारुडाग्रामो वामनवासुदेवभट्टनायकनामधेयसुधीभ्यां वार्तालापप्रसङ्गे पृष्टो भवान्यद्गौणशब्दस्य व्युत्पत्तिलभ्योऽर्थः " प्रधानः " इति कथङ्कारमुपजायते ।

सम्यक् समाहितेऽपि प्रश्नेऽसन्तुष्टावुभावन्येद्युर्भोजनान्तरं तावन्यविद्वद्भिः साकं तत्र समायातौ । तदा गौणशब्दनिरुक्तिः प्रधानार्थबोधिका विस्तरशो निरूपिता । आर्यसिद्धान्तमासिकस्यानेकानुयोगानां समाहितिः समीचीनतया समुचिता विहिता । समाधानसन्तुष्टान्तरङ्गाः सर्वेऽपि स्वस्वसदनानि प्रययुः ।

भवदीयवैदुष्याभिभूता भूयांसो विद्वांसस्तत्राहरहो विभिन्नविषयेषु शास्त्रचर्चामाचरितुं समवेताः समजायन्त । समुपस्थितसुधीसमाग्रहेण वैदिकं कर्म ब्राह्मणविषयञ्च व्याचष्ट । " श्रेयसि केन तृप्यते," भणितिरियं तत्र चरितार्थाऽबोभवीत्, यतस्तत्रत्याः पुमांसो भवदन्तर्हितविशिष्टज्ञानलाभाय दोषाप्यागच्छन् । एवं रात्रिन्दिवं श्वसुरालयपुरुषसङ्गमेन शास्त्रचर्चया च समयमगमयदेष शास्त्री । श्रोतृभिरविश्रान्तं श्रान्तो नक्तं शयनापदेशेनैव कथञ्चन मुक्तिमवाप ।

यथैव पत्नीपितृगृहात् प्रत्यावृत्तिकार्यक्रमो निश्चितस्तथैव तदीयजननी स्नेहस्विन्नात्मदुहित्रे यानि यानि वस्तूनि प्राहिणोत्तन्निर्देशो दैनन्दिन्यामेवङ्कारमदर्शि शास्त्रिणा— आम्रपाकः, नारिकेलपाकः, पृथुकाः, गुडपाकः, मुन्यन्नम्, केशचूर्णम्, तण्डुलाद्यचणकपिष्ट्याद्युपकरणानि । वासांसि मुद्राश्चोपदायामवाप्यासौ प्रास्थानिकमङ्गलक्रिया यथाविधि सम्पाद्य समस्तस्थविरानभिवन्द्य कनीयसश्चाश्लिष्य रामदर्शनेन सार्धमभिप्रतस्थे जयपुरञ्चाजगाम ।

यदाकदापि जयपुराद् बहिर्गमनमजायतास्य महाभागस्य तदा स्वप्रत्ययपात्राय भूरामलश्रेष्ठिवर्याय द्रविणाभरणादिरक्षाभरं समर्पयँल्लिखति दैनन्दिन्यां

मईमास्याष्टाविंशतितारिकायां प्रवर्तमानख्रिष्टाब्दस्याद्य (28।4।99) सम्पूर्णं रजतपात्राणि प्रत्युप्तरत्नस्वर्णाभरणानि राजतालङ्काराश्चायसमञ्जूषायां पिधाय भूरामलश्रेष्ठिगृहे स्थापितवान्। अस्मिन्नेव दिने स्वान्तेवासिभवदत्तानुशंसाया उल्लेखोऽपि वर्तते।

जयपुरमहाराजमाधवसिंहभूपतेर्जन्मदिवसोत्सवावसरे महाराजायोपायनीकर्तुं भवानपि मुद्राद्वयं शिक्षाविभागाध्यक्षपार्श्वे प्रेषयत्। अस्मिन्नेव वत्सरे प्रयागविश्वविद्यालयीयप्रवेशिकापरीक्षायां ( एन्ट्रेन्स ) वैयाकरणपण्डितशिवरामात्मजश्चन्द्रधरो गुलेरी सर्वप्राथम्यमभजतेति शास्त्रिहृदयोदधिरुद्वेलायितः स्वशिष्यसाफल्येन।

संजाते सति ग्रीष्मावकाशे महाविद्यालयस्य स्वसेवकरामकुमारेण समं वाराणसीमयासीद् द्रविडशास्त्री। सम्प्राप्ते चात्र श्राद्धदिने मध्याह्ने श्राद्धमारभ्य चतुर्थयामादौ श्राद्धकार्यान्निवृत्य स्वसदन एवावस्थितः शास्त्री न बहिरगमत्। परस्मिन्नहनि करणीयतर्पणमनुष्ठायैव बहिर्यातव्यमिति सम्प्रदायसमयोऽवश्यं पालनीयो भवति।

वाराणसीतः प्रस्थाय मध्येमार्गं विश्राम्यन् जयपुरमागच्छत्। आङ्गलमहाविद्यालयमुपेत्य तत्रत्यं कार्यजातं सम्पादयन् शिक्षाविभागाध्यक्षविवेकेन प्रचालितयोग्यतापरीक्षायाः प्रारम्भं दृष्ट्वा समतुष्यत्। काशीस्थधर्मपत्न्याः सविधे राजकीयवार्ताहरद्वारा धनादेशेन दशरूप्यकाणि संप्रेषितवान्। श्वशुरप्रेषितचिपिटनारिकेलादिपुटकं वाष्पयानस्थानात् नवाणकाधिक–रूप्यकैकभाटकप्रदानेनाहरत्। पुण्डरीकगुणाकरस्य (1901 ई.) निशाधिपतिगगननिधिभूमितख्रिष्टाब्दादिममासस्य तृतीयतारिकायां शवयात्रायामवश्यंगन्तव्यत्वेऽपि शीताधिक्येन सायंकालत्वेन न सम्मिलितः शास्त्री। समवेदनां प्रकाशयितुकामः गुणाकरसंसारचन्द्रचतुर्मुखसामन्तदेवीसिंहानां गृहान् गतवान्। शिक्षाविभागाध्यक्षेणाध्यापनकाले न केनापि भाषणादिकं विधेयमित्याज्ञा प्रसारिता।

वर्तमानमासस्य सप्तमतारिकायां शास्त्रिणामयं लेखः ''फाल्गुनकृष्णचतुर्थ्यां सम्पद्यमानभगिनीपौत्र्या विवाहेऽधिकृतोऽपि गोविन्दभट्टं पुरस्कर्तु-'' मेवोपदेशः शास्त्रिणः।

धर्मपत्न्या आसन्नप्रसवत्वाद् वाराणसीं गन्तुमना भूरालालश्रेष्ठिनः सकाशाद् रूप्यकाणां चतुःशतीमानीय गोविन्दरावप्रदत्तभ्रातृदेयानि विंशतिरूप्यकाणि गृहीत्वा पाठालये विद्यालयाध्यक्षसमीपे दशदिनावकाशप्रार्थनापत्रं प्रदाय स्वीकृतिमवाप्य द्वितीयस्मिन्नहनि धनुर्लग्ननवमांशे क्षेमतण्डुलान्यादाय कलशे रूपकं निक्षिप्य नालिकायन्त्रशब्दश्रवणेन सहैव प्रस्थायेतो बाष्पयानमारुह्य समयच्युत्याऽवनं प्राप्य माध्याह्निकं विधाय फलद्राक्षा उपभुज्य बाष्पयानमारुह्य तुन्दिलास्थानमधिगम्य परिचितान् दृष्ट्वा सायंसन्ध्यामुपास्य ततः प्रचलितः। समयच्यवनेन मोगलसरायतो वस्तुनेयान्तिमयानमा-(मालगाडी) रुह्य काशीं प्राप्य मातुलस्य मातुलान्याश्च चरणावभिवन्द्य गङ्गामवगाह्य यज्ञोपवीतधारणानन्तरं प्रातर्मध्याह्नकालक्रियमाणसन्ध्ये उपास्य गेहे कीलाटादिकं भुक्त्वा प्रसुप्तः सूर्योदयोत्तरस्नानमिति भोजनाभावः।

अपरस्मिन्नहनि स्नानादिनित्यकर्मभ्यो निवृत्य गोविन्दरावदत्तविंशतिरूप्यकाणि तद्भ्रात्रे वितीर्य गुरुवर्यमहामहोपाध्यायश्रीगङ्गाधरशास्त्रिणां सन्निदर्शनं विधाय ततः महामहोपाध्यायसुब्रह्मण्यशास्त्रिणां वामनाचार्याणां च दर्शनाय तद्वेश्मगमनम्। मातुलगृहं गत्वा मातुलान्याः वपुषि रोगाधिक्यमवेक्ष्य चित्तविह्वलतयाऽमवातलक्षणं विचिन्त्य सचिन्त इव स्थितः।

## कान्तिचन्द्रो दिवंगतः

( 16।1।1901 ) चन्द्राभ्रनन्देलामितख्रिष्टाब्दस्यादिममासषोडशतारिकायां सायंसन्ध्यामुपास्य निवृत्तभोजनादिव्यापारे शास्त्रिणं निशि सेवको रामकुमारः समागत्य नागपुरे जयपुरराज्यमुख्यामात्यकान्तिचन्द्रमुखोपाध्यायस्वर्गमनवृत्तमवेदयत्। वज्रपातसन्निभं वाक्यमाकर्ण्य मूर्च्छित इव स्तब्धोऽभवत्।

## मातुलीपरलोकवासः

परेद्युर्विहितस्नानसन्ध्योपासदनादिक्रियो मातुलानीरोगाधिक्यं निशम्य दृष्ट्वा च तदीयां स्थितिं जयपुरविद्यालयाध्यक्षसविधे सप्ताहावकाशाय तन्निवृत्तं संप्रेष्य भोक्तुं स्थितेषु सर्वेषु शोचनीयामवस्थामवलोक्य तदीयामभुक्त्वैवोत्थाय तामध आनीय प्राणोत्क्रमणे जाते सायंकालावधि समाप्त और्ध्वदेहिककृत्ये

स्नात्वा कुटुम्बिभिः सह समायातः सदनम् । दुःखाकुलितस्तन्मूर्तिं पतिपुत्राणां सम्मुखे सुमङ्गलामेवामन्यत तथापि गृहे कस्या अपि शासित्र्या अभावात् दुःखमन्वभवदेवं शास्त्री । ज्यायसस्तनूजस्य नारायणस्यासान्निध्यमपि दुःखायैवावर्तत । शैशवावस्थायामेव पित्रोः परलोकवासात् स्वपालयित्र्या वियोगः कष्टतरः संजातः ।

स्निग्धजनवियोगजन्यवैक्लव्यापनोदाय मनसः शान्तये च विद्वद्वर्यतात्याशास्त्रिणो महामहोपाध्यायगङ्गाधरशास्त्रिणश्च दर्शनेनोभयोपदेशेन चित्तस्थितिमनुकूलामकार्षीत् । ततश्च देवकृष्णवाक्येन हैमवतीमुद्रणाय हरिदासं प्राबोधयत् ।

**जयपुरप्रत्यागमः**

अस्यैव मासस्य त्रयोविंशतितारिकायां जयपुरं प्रस्थातुमनाः सप्ताहानकाशसमाप्तिसान्निध्यात् प्रातर्देवपूजां विधाय यामान्ते सर्वानामन्त्र्य श्यालकदत्तपृथुकान्नारिकेलपाकं यमुनया मातृस्वस्त्र्या प्रदत्तं समादाय नारायणरूपकेभ्यः पञ्चदशरूप्यकाण्यादाय प्रस्थितो घनपाठिनं गणपतिं च सत्कृत्य कृष्णेन सह वाष्पयानस्थानमेकाश्वयानेन कथमपि गत्वा नारायणश्यालकश्यामसाहाय्येनाजयपुरं भाटकपत्रं षडाणकाधिकनवभी रूप्यकैः क्रीत्वा यानमारुह्य काशीस्थाने शंकरनारायणौ दृष्ट्वा प्रचलितः प्रयागमेत्य महाराज्ञ्या मृत्युवृत्तमाकर्ण्य प्रचलितः । अर्द्धरात्रसमयेऽग्रवनमवाप्योषित्वा च प्रातर्यमुनायां स्नात्वा सन्ध्यादिनित्यकर्म समाप्य सम्बन्धिनः साक्षात्कृत्य ज्वालानाथेन कौलाटाद्यानाय्य संभुज्य दिलीपसिंहेन सह यानमारुह्य बदरीफलं क्रीत्वा पणेन निशि यामान्ते मक्खनलालेन सार्धं गृहमागमत् ।

परदिने समवेदनाप्रकाशाय स्वर्यातकान्तिचन्द्रमुखोपाध्यायानामाराममुपयातः । परलोकप्रयातप्रधानामात्यकान्तिचन्द्रमुखोपाध्यायात्मजेशानचन्द्रमुखोपाध्यायस्य ( हाथीबाबू ) राज्याभिषेकावसरे मक्खनश्यामसुन्दरगुप्ताभ्यां साकं बाङ्गारामं गत्वा व्यावहारिकपञ्चमुद्रा वितीर्य गेहमुपगतः शास्त्री । कान्तिचन्द्रमुखोपाध्यायेन सत्रा सम्पर्कातिशयात् प्रतिदिनमेवारामे गतागतं कुर्वाणः परिवारवर्गं शोकाकुलितं सान्त्वयामास ।

सप्तविंशतितारिकायां परीक्षाध्यक्षो गङ्गोपाध्यायः प्रवेशिकोपाध्यायपरीक्षासु जायमानास्वलवर्टहालनाम्नि स्थाने प्रबन्धकत्वेन पत्रं संप्रेष्य कार्यं विधातुमसूचयत् ।

ऊनत्रिंशत्तारिकायां बाङ्गारामात् भोजनार्थं प्राप्तानि षट्पत्राणि राधाबल्लभ-पञ्चम-नानक-नापित-पानीयानायकेभ्यो वितीर्य प्रेषितवानेतान् ।

## राज्ञा ईशानचन्द्रवर्णपरिवृत्तिः

अस्य वर्षस्य द्वितीयमासाष्टमतारिकायां जयपुराधिपः श्रीमाधवसिंहमहाराजः स्वर्गीयकान्तिचन्द्रमुखोपाध्यायनामारामम्मुपगम्य तदीयज्येष्ठात्मजेशानचन्द्रमुखोपाध्यायं पितृस्थानजीविकापदवीप्रदानेनानुगृहीतवान् । दिवसत्रयेऽवपर्यातेषु श्रीमाधवसिंहमहाराजः पितृशोकसूचकशुक्लोष्णीषपरिवर्तनाय शोकनिवारणहेतुभूतलोहितोष्णीषं प्रेषयामास । ततो मुखोपाध्यायो राजकीयकार्येषु भागग्रहणाय स्वकोषाधिकारपदे कार्यं प्रारब्धवान् ।

## मातुलानां शिवकैवल्यप्राप्तिः

वेदानन्ताङ्कभूमितेशवीयाब्दप्रथममासाष्टमतारिकायां लिखति शास्त्री "काशीतो निशीथोपक्रमे श्रीमन्मातुलचरणानां तडिद्वृत्तागमनं रोगाधिक्यं शीघ्रमेहि" इति तद्दृष्ट्वा वज्राहत इव भूत्वापि पुनस्तदैव गमनाय मतिं कृत्वाध्यक्षानुमतिलाभाभावे तत्र स्वोगमनस्थिरीकरणम्" एतद्वर्षदैनन्दिन्यां लिखति नवमतारिकायां द्राविडः "अध्यक्षानुमतिं काशीगमनाय लब्ध्वा सुरेन्द्रं दुर्गाप्रसादं च दृष्ट्वा गेहमेत्य क्रमानुसरणायाध्यक्षावेदनपत्रं लिखित्वोत्तरपत्रैः सह प्रेष्यान्तःपुरादागतायां भगिन्यामापृच्छ्य मदनाय रूप्यकपरिवर्तनायादिश्य (६५) पञ्चषष्टिरूपकाणि दत्वा सन्नद्धो गमनार्थंकयानेन बाष्पशकटस्थानमारुह्य बान्दीकुईस्थाने होराद्वयं स्थित्वा पुनरारुह्याग्रास्थानं निशीथे प्रविष्टः । तडिद्वृत्तद्वयं जयपुरात् प्रेषितम् अहं चलितो मध्याह्ने–इति काशीं प्रति, मातुलानां देहेऽस्वास्थ्यमिति काशीं प्रचलित इति उदयपुरं प्रति । दशम्यां तारिकायां रवौ लिखति–अग्रवनात् प्रस्थाय समये तुन्दिलास्थानं प्रविश्य तत्रोपस्थितां शकटीं विहायाशुगां शकटीं होराद्वयमनु समारुह्य स्नानसन्ध्यादि त्यक्त्वा काशीमेव दिवा चतु-

र्थयाममध्ये प्रविश्य कालभैरवसविधे रामशास्त्रितैलङ्गमवेक्ष्य गृहद्वारे वाजपेय्युपाख्यगङ्गाधराद् हृदयविदारिणीमशनिनिपातनिभां श्रीमन्मातुलचरणानां प्रातः सार्धसप्तवादनसम्भूतां शिवकैवल्यप्राप्तिमवगम्य कथं कथमप्यन्तःप्रविश्य प्रथमाह्क्रियां विधायागतकाशीनाथगणपतिकृष्णान्निरीक्ष्य किञ्चित्कश्मलदूषितचेतास्तडिद्वृत्तद्वयप्रेषणाय रूपकद्वयं दत्वा स्नानादिकमकार्षीत् । बाल्य एव शिवसायुज्यमाप्तयोः पित्रोरनन्तरं सुतनिर्विशेषं लालितः पालितः पोषितश्चासौ पितृकल्पमातुलाद्वियुक्तः शोकाकुलतां विचेतनताञ्च कथन्नानुभवेदाजीवनं कृतज्ञताभारमुद्वहन् । सप्तर्षिगृहं गत्वा स्मार्तकुण्डकारिकार्थज्ञानं विधाय दशाहस्नानज्ञापनाय गमनं क्षौरकरणञ्च द्रविडसम्प्रदाय इति । त्रियामायां समायातेषु सर्वेष्वात्मीयजनेषु शोकश्लोकवाचनम् । गोविन्दनारायणकृष्णानां श्लोकाः साधीयांस आसन् ।

वस्त्रविरेचनसद्भावादद्याभुक्तिरेव शरीरश्रेयसे निश्चित्यापि निजमृदुप्रकृतितया नारायणाभिधश्यालकानुरोधाद् भोजनं कृतवानेव परिणामतो विरेचनाधिक्यं संजातम् । अस्वस्थावस्थायामेव वाराणसीतो जयपुरमधिगम्य कान्तिचन्द्रमुखोपाध्यायानां गृहमगच्छत् । इतश्च भाउशास्त्रिणि देशमित इते तदीयप्रसूपरलोकप्रस्थानं परिज्ञाय परीक्षाभवनगमनावश्यकतां तदनुसरणापेक्षयाऽतिशयितं मन्यमानस्तामनुगन्तुमापितृवनं न प्राभवत् । आवश्यकशवयात्रानुसरणं परिहाय परीक्षाकार्यकरणमस्य कर्तव्यपालने दृढामास्थामभिव्यनक्ति ।

## सिद्धपुरुष-सम्पर्कः

भारतीबाबा इति प्रसिद्धसिद्धदर्शनम् । एकस्मिन्नवकाशावसरे महाविद्यालयस्य स्नात्वा गालवाश्रमात् प्रत्यावर्तमानेन द्रविडशास्त्रिणा मध्येऽयनं पुष्टिमार्गीयवल्लभसम्प्रदायप्रासादाद् बहिरजिरस्थोच्चारोहणवल्लघुकक्षमधिवसन्तं भारतीबाबानामधेयप्रथितं कञ्चन महात्मानमात्मनः समुत्पन्नैतद्विषयकालीकतासंशयापाकरणाय व्याकरणविषयकप्रश्नत्रयं चेतसि चिन्तयित्वा तन्निवासारोहणायाभ्यर्णमुपागन्तुमनसा दृष्टिपथमुपनैतुमकाम्यत । प्रथमसोपानपादन्याससमकालमेव दर्शनार्थं समवेतान्भक्तजनान् सम्बोध्याब्रवीन्महात्मा साधयत यूयं सम्प्रति शास्त्रचर्चा प्रचलिष्यति । ततो निष्क्रान्ते भक्तवर्गे प्रविश्य तदावासं समासीन एव

शास्त्रिणि पर्यायेण प्रश्नद्वयस्योत्तरं विविच्य प्रोवाच भवत्प्रितृप्रमूपासनवेलातिपातः स्यादिति पुनः प्रतिवक्ष्यामि तृतीयानुयोगं चित्तचिन्तितं ते कदापि। प्रतिवचननिशमनप्रसन्नान्तःकरणो व्यपेतशङ्कस्तदीययाथार्थ्यं विश्वसन् श्रद्धधानश्च ततः परमात्मालयमवाप्य शास्त्री नित्यकर्मणि नितरां ससञ्ज।

समतिक्रान्तेषु कतिपयवासरेषु महात्मयाथार्थ्यजातप्रत्ययं शास्त्रिणमनागतमालोच्यावशिष्टतृतीयप्रश्नोत्तरदित्सया साँगानेराभिधजयपुरीयगोपुराभ्यन्तरावस्थितमारुतिदर्शनतः प्रतिनिवर्तमानं द्रविडशास्त्रिणं वैकटिकविपणिस्थचम्पावतीमन्दिराभिमुखमभिवर्तमानमवेक्ष्य पृष्ठत एव शब्दापयित्वा तिष्ठन्नवशिष्टप्रश्नप्रतिवचः प्रोच्य पश्यति तस्मिन्नेवान्तर्दधे स महात्मा।

चमत्कारचणे महात्मनि सम्भूतप्रभूतश्रद्धः सङ्कटापन्नावस्थायां साधनान्तरमनवेक्षमाणः सस्माराऽनेकशस्तमेव सिद्धमहात्मानं शास्त्रिवर्यः।

कस्मिंश्चिदहनि विद्यालयावकाशे संहत्याखिलैः सखिभिः साकं नगराद् बहिः पुराणघट्टोपवने गोष्ठीः कर्तुं कामैरगम्यत शास्त्रिणा द्राविडेन। तत्र परिहासालापादिभिरुद्वेलानन्दथुमग्नमानसैर्वेलातिक्रमणमज्ञात्वा भोजनादिकार्यान्निवृत्य मन्दगत्याऽऽगामि। समागतैरखिलैर्गोपुरं सपक्षकपिहितकपाटमवेक्ष्य चिन्ताचितचित्तैरभूयत। शरारुजन्तुभीतिविकलान् सुहृदो विज्ञाय द्राविडमहोदयो गत्यन्तरमनालोकयन् तमेव महात्मानमचिन्तयत्। चिन्तनक्षणमेवोपस्थाय भगो शास्त्रिन्! कथङ्कारं स्मृतवानसि? शास्त्रिनिगदितन्निखिलन्निशम्य सकला एव यूयं चक्षूंषि निमीलयतायो विकलायामतीतायां नगरान्तर्गतेषु लोचनोन्मीलनायोदित्वाऽन्तर्हितो महात्मा। इयमेवास्ति महात्मनि श्रद्धातिशयस्य प्रतीकता। तच्चमत्कारचकितास्ते सर्वेऽपि शास्त्रिणं भूरि भूरि श्लाघमानाः स्वस्वस्वगृहान् प्रति प्रतस्थिरे। भवति महात्मनामनुकम्पाऽहेतुकी कुत्रचिदेव न सर्वत्र। महात्मानुकम्पाभावमुदीक्ष्य शास्त्री सदैव श्रद्धावनतशिरा अभूत्।

## गुदडीवाला बाबा

एवमेवापरः कश्चन महात्मा दादूदयालुसम्प्रदायानुयायी गणेशदासाभिधानो यं कन्थाधारकत्वाज्जयपुरजनता "गुदडीवाला बाबा" इति नाम्नैव व्यजानाद् व्यवाहरच्च। सर्वतुं कन्थापर्यावृतसंहनन एष दीर्घदेहः कृशकायोऽद्यतनवर्त-

मानप्राकृतिकचिकित्सालयभूमिष्ठोज्ज्वलघुकक्ष एवारण्ये हिंस्रजन्तुसमाकुले सानन्दं न्यवसदहोरात्रम्। द्रविडशास्त्री श्रुतदृष्टचरचमत्कारचुञ्चुं सिद्धमेनं महात्मानमपि सश्रद्धं सभाजयति स्म। महात्माऽपि शास्त्रिणि निर्भरं स्निह्यति स्म। सिद्धशिष्यशङ्करदासलिखितजीवनचरितभूमिकास्थशास्त्रिरचितानुष्टुभा ज्ञायते सम्मानभाजनमयं महात्मापि शास्त्रितल्लजस्य। तथा च पद्यम्—

**निर्द्वन्द्वो निःस्पृहः शान्तो गणेशः साधुतल्लजः।**
**सानन्दः सर्वदा कन्थाकौपीनामत्र-संग्रहः ॥ इति ॥**

सरयूपारीणमहर्षिकल्पराजमान्यपण्डितश्रीसरयूप्रसादमहोदयेन समं शास्त्रिणा गाढपरिचयः सम्पादितोऽतो दरभङ्गागन्तुकाममिमं बाष्पयाने समुपवेश्य गृहमागात्। अदसीयतनूभुवा पण्डितश्रीदुर्गाप्रसादेनामुं मनीषिवरिष्ठं मन्यमानेन पारम्परिकपरिचयवता साहित्यदर्पणः स्वरचितविशिष्टभूमिकासंवलितसटिप्पणीको निरीक्षितुमेतस्मै प्रादायि। प्रणिहितचेतसा समीक्ष्य समासादिततदीयसम्मायं दत्वा तस्मै कथनीयं कथयित्वा च पराववृते।

## गुरुभक्तिः

अनेकेतिहासलेखनप्रथितयशाः श्रीबलदेवप्रसादमहोदयो वाराणसेयः "काशी की पण्डितपरम्परा" भिधानस्वलिखितपुस्तके पण्डितेतिवृत्तकलेवरे श्रीयागेश्वरशास्त्रिणां सरयूपारीणानामितिवृत्तं लिखन्नन्तेसत्समुदायपरिचयक्रमे लिखति यद् द्रविडशास्त्री प्रधानान्तेवासिवर्गेऽग्रणीरेतेषाम्।

अध्यापनकार्यमनुतिष्ठन्नपि "गुरुर्ब्रह्मा गुरुर्विष्णुः" इत्यादिभिर्गुरोः सर्वदेवमयत्वमभिलक्ष्य प्रायशो गुरुदर्शनार्थं गुरुपूर्णिमायामवश्यमेवोप तिष्ठतान्तरायान्तराभावे। गुरुपूर्णिमादिवसाद् द्वित्रदिनेभ्यः प्रागेव काशीमासाद्य गुरुपूजायोजनानन्तरमपि चतुष्पञ्चाहान्यध्युष्य जयपुरं प्रति न्यवर्तत। बाधायां कस्याञ्चनानापन्नायां सनातनोऽयं नियमः प्राचलत्। वासरेऽमुष्मिन् विलम्बे सत्यागमनै पण्डितवर्याः श्रीयागेश्वरमहाभागा विक्लवीभूयासकृत्तद्गृहं गत्वाऽपृच्छन्नागतो वीरेश्वरः? शिष्यालोकनमन्तरेण कुतः शान्तिः सुलभा। वात्सल्यातिशयवान् गुरुर्यथा शिष्ये तथैव शिष्योऽपि गुरावतिशयितभक्तिभागभवत्। नियतवेलाया-

मनापन्ने वीरेश्वरवाण्ययानेऽनिर्वचनीयं वैकल्यमवहद् गुरुः । अहो कियदौत्सुक्यङ्कियती चातुरता शिष्यसमागमाय । यावज्जीवं गुरोरयं प्राचलत पर्यायः ।

## गुरोराध्यात्मिकचमत्कराः

द्रविडशास्त्री कदाचन प्रसङ्गावसरे कादाचित्कीं काञ्चन घटनां लेखकमश्रावयत् या यागेश्वरशास्त्रिणामाध्यात्मिकचमत्कारस्यापूर्वं महनीयं निदर्शनम् । एकदा द्रविडमहोदयो गुरुपूर्णिमाकार्यक्रमावसानानन्तरमपि कतिचन वासरान् काशीमेवाध्यतिष्ठत् । प्रत्यागमनदिन एव पूर्वाह्णे प्रणतिनिमित्तं प्रातःस्मरणीयचरणानामाससाद सदनम् । पण्डितवर्याः कतिपयक्षणेभ्यः पूर्वमेवात्माराधनकक्षान्निर्गत्य स्वीयाध्यापनकक्षे स्वकीयासनमध्यासत । चरणयुगलावनतमौलिः शास्त्रिमनोऽभिलषितन्निवेदयन्नाशिषमभ्यर्थयामास । तदहनि कापि घटनाऽनिर्वचनीयाऽघटत । विसृष्टशुभाशिषो यागेश्वरपण्डिताः स्वशिष्यान्तर्गताभिलाषसंपिपादयिषयाऽदसीयशिरसि स्वकीयकरकमलविन्यसनेन शुभाशिषा पुनर्युञ्जानाः स्वान्तेवासिशरीरमसकृन्निजपाणिपद्मेन परामृशन्ननेकशः स्वाध्यात्मचिन्तनसञ्चितज्ञाननिधिसञ्चिचक्रमिषामभिलक्ष्य परीक्षितसुपात्रभावः सत्क्षेत्रपतितां कृषिमिव फलवतीं व्यधुरन्यां भूमिमविज्ञाय । द्रविडशास्त्रिभाषितमासीद् यद् गुरुहस्तपरामर्शसमकालमेकविधा तडित् प्रविष्टेव मामकीनतनौ प्रतिभाति स्म च यद् वपुषः प्रत्येकप्रतीकपरमाणुरुद्बुद्धतां गत इति ।

सत्रानेन विलक्षणानुभवेन सदनं समेत्य जयपुरं प्रति कृतप्रस्थितिरवर्तत शास्त्री । ततः प्रभृति विद्यालयीयपाठ्याध्यापनानेहसि कस्याप्यपरिचितापठितागमस्यानधीतग्रन्थस्य वा विषयाकलने तदीयदुरूहदुर्ज्ञेया अपि पङ्क्तयोऽनायासमेव मनीषायां प्रतिफलिता इवाविद्यन्त । प्रतिभाति स्म चैवं यत्ताः कदाचनालोचितचराः स्युरिति । तदवबोधे च शास्त्रिणा न कोऽपि क्लेश आयासो वानुभूयते स्म । पूर्वोत्तरमीमांसयोश्चूडान्तग्रन्थानामभिप्रायस्तात्पर्यञ्चाध्ययनमात्रेणैवैतन्मानसमुकुरे प्रत्यभासिषाताम् । शब्दशास्त्रमेवाधीतचरं गुरोः परमलौकिकया यागेश्वरपण्डितानुकम्पया परया सकलनिगमागमनिष्णाततां जगाहे शास्त्रिवरः ।

गुरुकृपाया अपूर्ववृत्तमिदं श्रावयन् शास्त्रिवर्यो न कदाचनातृप्यत। इतिहासलेखकेन श्रीबलदेवप्रसादेन स्वयं हिन्दूविश्वविद्यालयीयपूर्वोत्तरमीमांसाचार्यपरीक्षायां वाक्परीक्षान्नयन्नयमीक्षितः।

प्रायः प्रतिहायनमेव व्यासपूजावसरे काशीं प्राप्यावश्यकस्नानसन्ध्योपासनादिनित्यकर्म समाप्य गुरुगृहमभ्येत्य सम्पूज्यार्चनीयांस्तान् साष्टाङ्गं प्राणमत्। विद्यमानानेव केवलन्नापितु ब्रह्मीभूतगुरुगृहानवाप्य तत्पादुका अभ्यर्च्यान्यानपि पूजनीयान् प्रणामादिभिः सदकार्षीद् द्राविडशास्त्री। गुरुभक्तिमनु दैनन्दिन्यामेवमापद्यते लेखः—

"नित्यकर्मभिनिवृत्य चन्दनं घृष्ट्वा पुष्पमालामादाय सितापुष्पाणि संगृह्य वैकुण्ठवासिपूज्यगुरुवर्यश्रीयागेश्वरशर्मावासं प्राप्य तदीयपादुकापूजनं विधाय तद्गृहस्थदेवकृष्णशर्माणं गुरुतनयञ्च प्रणम्य गृहमायाम्"।

"एतदनन्तरञ्च पूज्यगुरुवरश्रीगङ्गाधरशास्त्रिवेश्माबाप्य तदर्चा व्यधाम्"।


तस्मिन्नेव दिने मातुलचरणैः सह राजसभां समासाद्यानेकैः कैश्चन पण्डितैः समगंस्त। तत्र विद्यमानो विद्वत्कल्पज्योतिर्विदैलङ्गपण्डितो रामकृष्णश्च दुर्गाप्रसादं कटाक्षितवान् देवीशतकमभिलक्ष्य।

सम्पन्नप्राये वाराणसीगमनाभिलाषसन्दोहे स्वकीयाध्यापनादिनियतकर्तव्यनिर्वाहचिकीर्षयाऽविलम्बितमेव जयपुरं प्रति प्रतस्थे शास्त्री।

## अध्याप्यविषयावलोकनम्

सम्प्राप्य स्वावासमध्यापनादिकार्यं पूर्ववदेवावधानेन महता प्रारब्धवान्। स्वीकृतकार्योपेक्षावृत्तिरमुष्यान्तः कथमपि न स्वपदं विधातुमशकदत एवायमध्यापनात् प्राक् पाठ्यनियतपुस्तकालोचनमावश्यकं मन्यमानो नियमेन निकेतनेऽनुदिनमभ्यस्य वैशिष्ट्यं किमपि तत्रान्विष्याध्येतृवर्गं पर्यचिनोत्तेन ननान्वेषितविशेषेण।

सर्वेषामन्तेवासिनामितरेषाञ्च ज्ञानवृद्धिं व्युत्पादकतामपि स्पृहयताऽत्रभवता संस्कृतभाषाधिकारावाप्तये स्वकीयसत्परामर्शेन शिक्षाविभागाध्यक्षेण



वेदाष्टनिधिचन्द्रेऽब्दे वैक्रमे गणपोत्सवे ।
राजन्ति गुरवो मध्ये महाराष्ट्रियमण्डले ॥

न्निभालयता जयपुरीय-समस्त-पण्डितसमुदायमाहूय कापि सभा समायोजिता। तत्र सर्वतः प्रथमं सत्कृतो वासोऽलङ्कारादिभिः स्नातकश्चन्द्रधरो गुलेरी। समवेताश्चात्र सकला अपि सुधियः सम्मानिताः। अभूतपूर्वस्वशिष्यसम्मानमवलोक्य शास्त्री कथन्न हर्षनिर्भरतामासादयेत्। परिणामोऽयं शास्त्रिवर्य-जागरूकतायाः। अध्यापनमेवैकमात्रलक्ष्यन्नासीच्छास्त्रिणोऽपितु छात्राणामन्य-गतिविधीन् प्रति सतर्कतापि। स्नातककक्षायामधीयानस्य शार्दूलसिंहस्याध्ययनेऽन्तरायायाचेष्टन्तान्येऽपि तत्रत्याः शिक्षकाः प्रैरयंश्च तं संस्कृताध्ययन-विसर्गायानवरतं परन्न स विचलितोऽणुमात्रमपि स्वकीयदृढनिश्चयादिति महानामोदः शास्त्रिणः।

गीर्वाणवाणीप्रारब्धदैनन्दिनीलेखेऽब्धिनिधिवसुभूमिमितेशवीयाब्ददैनन्दिन्यामनुष्टुब्वृत्तमेवोररीकृतं शास्त्रिणा सर्वविधप्रवृत्तये। एवं सञ्जीवनगङ्गोपाध्यायशिक्षाविभागाध्यक्षानैहसि द्वयोः सौमनस्यसत्वाद् गङ्गोपाध्यायेन सम्पर्कातिशयभावादध्यापकत्वकालादेव प्रसन्नचेतसा विद्यार्थिवृन्द-समुन्नतिं कामयमानः शास्त्री कर्तव्यकर्मनिष्ठां पूर्णतया निरवहत्।

## धर्माचरणम्

एकदा नित्यनैमित्तिककार्येभ्यो निवृत्य भोजनायोपविष्टो मध्य एव रजस्वलाशब्दं श्रुत्वार्धभुक्त एवोत्थितः। "प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी" त्यादिधर्मशास्त्रीय-वचनेन चाण्डालीसमत्वप्रतिपादनात्तस्याः।

द्वादशाहे भुञ्जानान् ब्राह्मणांस्तथा धार्मिकम्मन्यमानान् दाक्षिणात्यानवलोक्याखिद्यत चेतोऽमुष्य धर्मात्मनः। एकदा पाठालयात् मक्खनलालेन सहामात्यगेहं गत्वा तत्र द्वादशाहे ब्राह्मणानां मोदकादिभिस्तर्पणं दाक्षिणात्यानां कोलाटेन च दृष्ट्वा "अहो ब्राह्मणानामीदृशी वृत्तिर्यद् द्वादशाहेऽपि भुक्तवन्तस्तत्रापि दाक्षिणात्यानां प्रवृत्तिरहो दौर्भाग्यं जनानाम्"।

"धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः" इत्यादि स्मृतिवचनेषु दृढप्रत्ययसत्वादनुदिनमात्मनो धर्मकृत्यं यथाविधि यथाकालमन्वतिष्ठत्। "यावज्जीवमग्निहोत्रं जुहुयात्", "उदिते जुहोति, अनुदिते जुहोति" इत्यादिविधिवाक्यैः

सायं प्रातरग्निहोत्रस्य कर्तव्यत्वेऽपि सायंतनाग्निहोत्राहुतिकाले कदाचनामात्य-गेहं गतां स्वधर्मपत्नीं यथासमयमपरावृत्तामवेक्ष्यातीव कोपाविष्टस्तामतर्जयत् समागतां क्रियालोपादुपावासीत्तदिनम् ।

धर्मप्रतिकूलाचरणमत्यन्तमेवान्तर्भवत आभीलमजीजनदत एकदाध्यापन-काले यानि मुधाकार्याण्यनुष्ठितानि तन्मार्जनाय प्रायश्चित्तात्मकमन्त्रजापमनु-ष्ठायात्मग्लानिमपाबीबहदेष । उपनीतैरेव द्विजैरुपाकर्मावश्यमनुष्ठेयमिति स्मृति-वचोऽनुरुन्धानेन गृहाध्यायिछात्राणामनध्यायो दिनत्रितयस्य व्यधीयत परन्तु महाविद्यालयाध्यायिछात्राध्यापनकर्म नियतरूपेण प्राचाल्यत । कर्तव्यपालनभि-योभयथापि धर्मशास्त्रवचनं निरवाक्षीच्छास्त्रिमहाभागो मध्यमार्गाश्रयणेन ।

धर्मशास्त्रानुकूलाचरणन्नान्यथयति स्मायमतः कदाचिच्छूद्रास्पर्शे सति न भुक्तवान् भोजनस्य निषिद्धत्वात् तत्स्पर्शे ।

एकदा भगिन्या कार्यवशादाकारितस्तदावासप्रासादमुपस्थाय तत्र पुष्प-वतीजलकुम्भस्पर्शकारणात् प्रतिनिवृत्य ततः स्नात्वान्ययज्ञोपवीतं पर्यधात् ।

क्षौरकर्मावश्यकतामनुभवन्नपि भौमादिवारवत् क्षयतिथावपि क्षौरकर्मणो निषिद्धत्वात् तद्दिने नाचरत् क्षौरकर्म । क्षयतिथौ स्त्रीसंसर्गो धर्मशास्त्रप्रतिषिद्धः परं गणपतिभार्याप्रथमसंसर्गमाकलय्य क्षयतिथौ मानसमेतस्य विपादावर्ते न्यप-तत् । वर्षारम्भे स्थालीपाकस्य शास्त्रविहितत्वादयमपि महामना आनन्दाख्यव-र्षारम्भे कर्तव्यतयानन्दप्राप्तये च स्थालीपाकेनेष्टवान् । तदनन्तरं च स्वधर्मपत्न्यै रुक्मिणीनामधेयायै प्रवालमालां प्रायच्छत् जपकरणाय ।

कदाचन यात्राप्रसङ्गेन जयपुरं प्राप्तौ तत्तद्दर्शनीयस्थानानि वीक्षमाणौ कालेजदर्शनार्थं कम्ब्रोजविद्यालयाध्यापकौ स्वकीयसभ्यतानुसारमुभावेव क्रमशः शास्त्रिपाणिपरिग्रहं विहितवन्तौ । वैदेशिकवैधर्मिकयोः स्पर्शनेन दूयमानमानसेन धर्मशास्त्रीयस्पृश्यास्पृश्यविचारे म्लेच्छसंसर्गस्य निषिध्यतया दैनन्दिन्यां लिखितं "कष्टं भो म्लेच्छसंसर्गः" भवतु । भारतीयाचारपरंपराविरुद्धाचरणेन धर्मशा-स्त्रीयव्यवस्थातिक्रमणजन्यानुतापं विधायापि सद्य समासाद्य सचैलं स्नात्वात्म-तुष्टिरलभ्यत ।

विषयासक्तिपरस्य प्रायशो महिलास्मृतौ जातायां रेतः स्खलति परं सप्ततिवर्षानन्तरं विषयासक्तिविरहेऽपि कदाचन यामिनीतृतीययामे सहसा रेतश्चस्खाल । स्खलनकाल एव प्रबुद्धोऽयं महानुभावो खिन्नमनास्त्वरितमेव समुत्थाय स्नानादिकृत्येनात्मानं संशोध्य नित्यकर्मानुष्ठातुं प्रवृत्तः ।

## व्यवहारज्ञानम्

सर्वविधव्यवहारकार्यचातुरीचणो द्रविडशास्त्री सत्यामावश्यकतायां परिचितानापद्ग्रस्तानवेक्ष्यापदुद्दिधीर्षया तेभ्यः प्रायच्छदृणमपि । व्यवहारे परस्परं मनोमालिन्यमूलकं वैमनस्यं वैरं वा न जायेतेति चिन्तयित्वाभरणादिकं तन्मूल्यपरिमितं निक्षिप्तवान् । ऋणार्पणात् प्रागाभूषणानि विन्यस्य तदीयां विशुद्धिं विज्ञाय मूल्यमभिज्ञाय च हेम्नः प्रत्यये जात एव व्यवहृतवान् ।

हिताभिलाषिण्यां स्वसरि स्नेहश्रद्धातिशयो भावुको यत् प्रतिहायनं यमद्वितीयावसरे स्वसृगृहेण संभुज्यारात्रिक्यां स्वर्णमुद्रां द्वाविंशतिरूप्यकाणि वोभयञ्च तस्यै प्रादात् । भुक्ते चास्मिन् स्वसापि वासोदानेनासभाजयदेनम् ।

एकता ग्रीष्मावकाशे काशीं गन्तुमनसोऽमुष्य स्वसृस्वास्थ्यविकृतिकारणात् काशीगमनं संशयितमेव । काशीनाथभ्रातरं समयोत्कृष्टज्योतिर्विदमभिज्ञाय भगिनीजन्मपत्रिकात आयुषो निर्णयं सुदृढमभिज्ञाय न कापि भीतिवार्तेति दैवज्ञवचनं समाकर्ण्यापगतसंशीतिरसौ काशीगमनकार्यक्रमं निश्चिकाय ।

एकदा कयाचित् प्रवृत्त्यामर्षाविष्टः "नाकार्यमस्ति क्रुद्धस्य नावाच्यं विद्यते क्वचित्" वाल्मीकिवचो विदन्नपि विस्मृत्यावेशवशात् पत्नीमताडयत् । ज्ञातभ्रात्राचरितभार्याघातवृत्ता भगिनी भ्रातरं कनीयस्तयाऽकार्यायातर्जयदकथयच्चाविमृश्य श्रेष्ठियोषिदुक्तमिथ्यावार्तां निशम्य निरागस्कां नितम्बिनीमरे ताडयँस्त्वमापन्नपथाः । स्वसारं सञ्जातकोपामभिज्ञायैवं प्रत्यवायधियाऽऽदिवसन्न किमपि भुक्तवान्न च पीतवान् नक्तं च भगिनीबोधितः कथमपि भोजनाय प्रवृत्तः ।

प्रतिदिनं प्रधानामात्यस्यारामं तदीयपुत्रादीनामध्यापनाय तदुक्तविषयजातपरामर्शाय गत्वामात्यसाक्षात्काराय समागतजनपरिचयाय प्रतीक्षणालये तिष्ठन्नेकदा क्षत्रियान्वयाहंकाराभिभूतेन समागतेन हरिसिंहवर्मणा कमप्यालाप-

मुद्दिश्यावमानितोऽसौ हिमवानिव धैर्यं धारन्नेवमुपेक्षितवान् "भवतु दास्यति दण्डमीश्वरः" । अपमानसहिष्णुता तरुणिमनि सत्यपि भवद्भाविगुणातीतयोगित्वस्याग्रिमसूचनादायिनी गीतोपनिषत्सु निर्दिष्टलक्षणद्वयेऽस्यापि निर्देशात् ।

## अपूर्ववस्तुदर्शनकौतूहलम्

लार्डकर्जनभार्या भारतभ्रमणाय स्वदेशात् प्रस्थाय भारतपरिसततया विश्वविश्रुतसौन्दर्यं जयपुरमवलोकयितुकामा समायात् । रत्नगर्भायामस्यां ललितलावण्यवतीगणनायां तृतीयकोटौ वर्तमाना लावण्यवतीति श्रुत्वा समुत्कण्ठितचेताः प्रचलदीशवीयहायनस्यैकादशमासचतुर्दशतारिकायां समायातां तामीक्षितुमगाद् द्राविडमहाभागोऽपूर्ववस्तुदर्शनकौतूहलं निर्वर्तयितुम् । कस्य सचेतसश्चेतो न स्पृहयति रमणीयरमणीरमणीयतावलोकनाय दैवहतकादृते ।

भवदीयः प्रियसुहृत् गङ्गाधरशास्त्री कालकवलितः । कण्टकरवृत्तान्तमुपाकर्ण्य गोसर्गकाल एव तद्गृहमगात् । घटनाया अमुष्या दैनन्दिन्यामेवमुल्लेखः— "गङ्गाधरस्य शरीरे पीडाधिक्यं श्रुत्वा काशीनाथप्रेषणम्, तेनागत्य निशि कथितमाकर्ण्य जीवने काठिन्यदर्शनम् । पुनरपि तस्मिन् तद्गृहं गते बालवाक्यात् पञ्चत्वप्राप्तिश्रुतिः । अहह दारुणो वज्रपातः, तस्य षण्मासस्य पुत्रः, द्वैवार्षिकी कन्या, युवतिर्जाया, प्रातः कृत्यं विधायैव गतो गङ्गाधरस्य गेहं ततो मनुष्याणामभावाद् वाहकोऽहमपि संजातः । महती क्लेशपरम्परा । मित्रस्य मरणम्, मनुष्याणामभावः, तस्य शरीरस्य भाराधिक्यं, दूरं श्मशानम् , सूर्यतापः, कण्टकव्यथा, तापेन तृषा, किमधिकं साक्षादसिपत्रवन इव क्लेशः ।" व्यवहारनिर्वाहाय कष्टान्यविगणय्य सर्वविधमपि तत्रत्यं कृत्यजातं निःशङ्कतयाऽकार्षीत् शोकाकुलचेता अपि ।

चिरकालेन राजगुरुसेवकस्य शिबिकावाहकस्य जीवणनाम्नो गोपीजनवल्लभमन्दिर एव वसतः कदाचन स्वभार्यया वध्वा च केशाकेशि मुष्टीमुष्टि उपानदुपानहि युद्धमवेक्ष्य केनापि दूरे कारयित्वा तूष्णीं स्थितः ।

संजातामर्षैर्मैथिलमहाभागैरन्यथाधारणायां कृतायामपि सौजन्यमेवास्य तत्रातो लिखति सम्मानवृत्तान्तमवबुध्य तदीयं "मधुसूदनस्य वैयाकरणत्वेन

पीतवस्त्रलाभ उत्तमा खलु मैथिलेषु प्रतिष्ठेयम्" । ज्ञानवतो विदुषो न सनातनो वैरभावः, तात्कालिक एवेत्युपरितनेन लेखेन प्रतीयते ।

## विविधशास्त्रज्ञानम्

### रत्नपरीक्षाज्ञानम्

विविधविद्याभ्यासङ्गासक्तः शास्त्री द्राविडोऽविदितविद्यान्तरविवित्सया कदाचन स्वसखमेकं वैकटिकं रत्नपरीक्षा कथङ्कारं कार्येत्यप्राक्षीत् । पुनश्च ततो रत्नपरीक्षापुस्तकमादाय तदध्ययनपरो ववृते । वैकटिकानां सम्पर्कातिशयात् रत्नप्रभावेण ग्रहादिजन्यदोषनिवृत्तये विविधारिष्टप्रशमनाय चाधिव्याधिग्रस्तान् लोकान् तत्तद्रत्नपरिधानाय समादिशत् ।

### ज्योतिषशास्त्रज्ञानम्

वेदचक्षुर्भूतस्य ज्योतिषस्य ज्ञानमन्तरेणान्धत्वमेवानुभूयात्मनो लोके तद् व्यपोहितुमनास्त्रिस्कन्धज्योतिषस्यानेकग्रन्थानधीत्यापूर्वां प्रवीणतां प्राप । एतदीयज्योतिषज्ञानमालोच्य स्वपितृस्नेहभाजनतया पितृकल्पमेनं मन्यमानो ज्योतिर्वित्पुङ्गवः श्रीदुर्गाप्रसादद्विवेदमहोदयः संस्कृतपाठशालाज्योतिषाध्यापकः पञ्चनवत्युत्तराष्टादशशततमखिष्टाब्दस्य माघमासस्य त्रयोदश्यां तारिकायां शास्त्रिणा नक्तमाभाष्य "सूर्यसिद्धान्तसमीक्षां" प्रदाय गृहं गतः । गमनानन्तरमेष शास्त्री रात्रावेव तद्विरचितसूर्यसिद्धान्तसमीक्षामाद्यन्तमलुलोकत् । ततः परं गणितफलितचमत्कारं कर्णाकर्णि विदन्तोऽधिकारिणो वर्षजन्मपत्रादिनिर्माणाय निर्बबन्धुः । अतिशयपरिचयशालिनोऽपीदमीयज्ञानमद्भुतं मन्यमानाः शास्त्रिवर्यान् तथैव प्रार्थयामासुः । प्रधानामात्यकान्तिचन्द्रमुखोपाध्यायस्य महताग्रहेण तदीयज्येष्ठात्मजस्येशानचन्द्रस्य जन्मपत्रं निर्माय प्रददौ । एतत्फलस्वरूपमेव विश्वसन्नीशानचन्द्रः प्रतिवर्षं स्वकीयं वर्षपत्रं द्राविडशास्त्रिमहोदयेनैव निरमापयत् । वर्षपत्रनिर्दिष्टफलस्य समये समये सत्यतामनुभूयेशानचन्द्रः परमप्रमोदमापन्नः शास्त्रिवर्यान् प्रशशंस ।

### औषधज्ञानम्

एकस्मिन् वासरे किञ्चिद् विश्राममुपलभ्य सायन्तनसन्ध्योपासनादिकर्मभ्यो निवृत्तीभूय केनापि कार्येण प्राड्विवाकपदमध्यासिनं सुरेन्द्रनाथं साक्षा-

त्कर्तुमभ्यगादसौ शास्त्री। ततः परावृत्य दोषाऽऽगच्छन् प्रतीहारेस्वावासस्यान्ध-तमससत्वात् सहसाहिन दष्ट उन्मत्तवदक्रियत। साधारणतया नित्योपयोगि-भेषजज्ञानसत्वात्तत्कालमेव गुडमारकनामकमौषधमानाय्य सर्पदंशव्यथातो मुक्तिमवाप।

**वाराणस्यां ग्रीष्मावकाशः**

कदाचन जाते ग्रीष्मावकाशे वाराणसीं प्रस्थितः स्वशिष्येण मुकुन्दवल्लभेन सार्धम्। वाराणस्यां भवदागमनन्निशम्य स्वस्वकार्यसम्पादनाय सम्बन्धिनोऽन्येपि च द्रष्टुकामा भवन्तं समया समागच्छन्निति दैनन्दिनीलेखेनाधस्तनेन प्रतिभाति—"अत्र काव्यानुशासनं द्रष्टुं कृष्णः समायातः, वेदान्तसारपाठारम्भो मुकुन्दस्य, कौमुद्यारम्भो मञ्छयालकस्य, शिवरहस्यदर्शनम्, ललितास्तवशोधनम्। घनपाठिनाऽष्टसहस्रद्राविडेन गेहमागतेन दीक्षितवंशजेन काण्वेन च संवादो लौकिकः शास्त्रीयश्च। कदाचन हिन्दूकालेजप्राचार्येण पृष्टानां प्रश्नामुत्तरं लिखित्वा प्रैषयत्।

ग्रीष्मावकाशकालं वाराणसीवासेनाध्यापनसंशोधनादिकर्मभिर्गमयित्वाऽमोघतयासन्नग्रीष्मावकाशसमाप्तिमभिज्ञाय जयपुरं प्रति प्रस्थातुमना अभूत्। जयपुरागमनानन्तरमध्ययनाध्यापनादिक्रमः पूर्ववत् प्राचलत्। स्वशङ्कापनिनीषया प्रागिव परिचितापरिचितैरागमनं प्रारब्धम्। पुरुषोत्तमशास्त्री भवदीयागमनवार्तान्निशम्य स्वशङ्कामपनेतुं समायातः—"पुरुषोत्तमशास्त्रिण आगमनम्, "विपरीतार्थविदो हि योषितः" इत्यस्यार्थपृच्छा चक्रवाकसादृश्यकथनञ्च"।

मन्नालालगौडप्रकाशिताष्टपञ्चाशदुत्तरैकोनविंशतिशततमविक्रमाब्दपञ्चाङ्के "दधीचिगौतमादीनां शापेन दग्धचेतसा" मित्यादिश्लोकमुद्धृत्य ब्राह्मणत्वाभावः प्रतिपादितोः दाधीचानां ततः सर्वैरेव दाधीचैः सम्भूयाभियोगः कृतस्तत्खण्डनपुस्तकान्यपि सप्रमाणं लिखितानि तेषां प्रामाण्यायान्यतमस्य मदनमोहनरूपनारायणौ समागत्यैतदीयसम्मतिग्रहणायाश्रावयताम्। दैनन्दिन्यामेतद्विषयकोल्लेखः — "मदनमोहनरूपनारायणयोरागमनं दाधीचाञ्जनदर्पणश्रावणञ्च"।

**धर्मशास्त्रज्ञानप्रौढिः**

धर्माचरणप्रगाढास्थाशीलत्वेऽपि धर्मशास्त्रीयविशिष्टज्ञानसत्वात् व्रतादीनां निर्णयः शास्त्रानुसारमन्यविद्वद्भिरुद्धमपि प्रादीयतानेन । यथा जन्माष्टमीव्रतविधानानन्तरं पारणा कदा कर्तव्येति विषये शास्त्रिणामेवं निर्णयः "अद्याष्टमी ३८।४५ सोमवारश्चेति "तिथ्यन्ते पारणा" इतिवचनान्निशि पारणा, अशक्तानां तु यामत्रयोर्ध्वगामिन्यामितिवचनात् प्रातरेवेति— अस्माकं पारणा निश्चैव ।

एवमेव पञ्चनवत्युत्तराष्टादशशततमे (1895) शवीये वर्षे नवमदिनाङ्के गणेशपूजामहोत्सवः पञ्चाङ्गे लिखितः परं शास्त्रिवर्यो लिखति— "पञ्चाङ्गे श्वो लिखितापि गणेशपूजा धर्मशास्त्रानभिज्ञत्वमूलिका, धर्मशास्त्रानुसारेण पूजाव्रतादिकमद्यैव" एवंविध एव लेखो मातृनवमीमुद्दिश्य लिखितो— "मातृनवमी, अनध्यायो राज्येऽद्य केवलरामवाक्येन, न धर्मशास्त्रेण ।"

**वृष्टिज्ञानम्**

लौकिकशास्त्रीयवचनानि बहुधा श्रूयन्ते यद् रोहिण्यां यदा वृष्टिर्भवति तदा दुर्भिक्षं जायते । शास्त्रिवर्यैराषाढ्यां पूर्णिमायां वायुपरीक्षया वृष्टिविचारो विहितः, तत्र ते लिखन्ति—"पूर्वाषाढायां गर्जना मेघानां वृष्टिश्च संजातेति न दुर्भिक्षचिन्तेति शम्" ।

**शास्त्रिवर्यस्य पुत्रजन्म श्वशुरालये**

षट्षष्ट्युत्तरैकोनविंशतिशततमविक्रमवर्षे माघमासकृष्णपक्षैकादश्यां रविवासरे एतदनुसारं गगनावनिनिधीन्दुमित (1910) ख्रिष्टाब्दीयद्वितीयमासषट्तारिकायां पुत्रजन्मजन्यहर्षातिरेकमाप्नुवन् लिखति— "अद्य गारुडाग्रामे आत्मनः पितृगृहे सौभाग्यवती पत्नी सुन्दरीदेवी निश्यन्ते श्वशुरवरघटिकायां पञ्चोत्तरं पलपञ्चके गते पुत्रं प्रासूत धनुर्लग्ने । एतस्य कालस्य निश्चयस्तु पश्चाद् भविष्यति । मासस्यास्य नवमतारिकायां बुधवासरे पुत्रजननवृत्ततडित् प्राप्तेति लेखः" ।

कालान्तरे शिक्षाविभागाधिकारिणो भवदीयपरामर्शेनैव कार्यमकार्षुः । तात्कालिको निदेशकः शिक्षाविभागस्य श्रीमक्खनलालमहोदयोऽत्यन्तमेव

प्रभावितोऽभवत् सम्मानमपि च व्यधाद् द्रविडशास्त्रिण:। श्रीबदरीनाथ-शास्त्रिणो लक्ष्मणपुरविश्वविद्यालये जाते नियोगे शास्त्रिपरामर्शेन भार्गवश्चतुर्वेदमागन्तुमवोचत्तद्रिक्तस्थाने विचार्योत्तरञ्चैतस्य द्रविडशास्त्रिणे देयमित्यपि। प्रसङ्गममुमधिकृत्य गिरिधरशर्मा चतुर्वेद: निर्दिशत्यात्मकथायां, लेखोऽयं हिन्दीभाषायां लिखित: सोऽविकलमुद्धृतो नीचैस्तथैव—

"कालान्तर में शिक्षाविभाग के अधिकारी आपकी सलाह से ही कार्य किया करते थे। तत्कालीन निदेशक श्री मक्खनलालजी आप से बहुत अधिक प्रभावित थे और सम्मान किया करते थे। बदरीनारायण शास्त्रीजी के लखनऊ विश्वविद्यालय में नियुक्त होने पर मक्खनलालजी ने शास्त्री जी की सलाह से गिरिधरजी को उनके स्थान पर आने के लिये कहा और इसका उत्तर शास्त्रीजी को ही देने के लिये कहा।" लेखोऽयमात्मकथाद्विषष्टितमे पृष्ठे विद्यते—

गिरधरशर्मा ने श्रीवीरेश्वरशास्त्री को दूसरे दिन जाकर इस प्रकार उत्तर दिया—उस स्थान पर मेरे मित्र सूर्यनारायण जी का अधिकार था, इसलिये मैंने श्रीवीरेश्वरशास्त्रीजी से मिलकर यही उत्तर दिया कि सूर्यनारायणजी की और मेरी घनिष्ठ मित्रता है इसलिये उनको प्राप्त होनेवाले स्थान में मैं बाधक नहीं होना चाहता। वीरेश्वरजी ने इस पर मेरी बहुत प्रशंसा की, किन्तु मेरा यह कर्तव्यपालनमात्र था।

अपरदिने श्रीगिरिधरशर्मा चातुर्वेद्य: श्रीद्रविडशास्त्रिसदनमासाद्य स्वकीयमुत्तरमित्थं प्रददे शास्त्रिणे। महाराजकालेजसंस्कृताध्यापक-श्रीबदरीनाथशास्त्रिविसृष्टस्थाने मदीयपरमसुहृद: श्रीसूर्यनारायणशर्मव्याकरणाचार्यस्याधिकारसत्तया तदीयाधिकारे बाधको भवितुं नाभिलषामि। उत्तरमिदमाकर्ण्य शास्त्रिमहोदयोऽतीव श्लाघितवान् माम्, परं मदीयपूज्यपितृचरणस्य वार्धकेनात्रागन्तुमीहमानोऽपि कर्तव्यपालननिर्वाहायोपरितनमुत्तरं प्रादाम्। शास्त्रिवराग्रहे सति तदन्तेवासितया तदनुरोधं स्वीकुर्यादेवैष महाभाग: इति द्योत्यते।

श्रीगिरिधरशर्मणा प्रतिषेधे विहिते एतत्पदप्राप्तये शिक्षाविभागनिदेशक:

श्रीमक्खनलालभार्गवः स्नातकपरीक्षोत्तीर्णमुभयभाषाभिज्ञं श्रीजगतीप्रसादभार्गव-मेवात्र न्ययुङ्क्त ।

श्रीरूडमलदाधिमथमहाभागो माध्यम ( Inter ) कक्षायां संस्कृतमधीयानोऽबोचदेवं यदस्मान् जगतीप्रसादभार्गवः संस्कृतमध्यापिपत् स्नातककक्षाऽवरकक्षाध्यायिनः ।

अस्य वर्षस्य सप्तमासचतुर्थतारिकायां सोमवासरे आषाढमासकृष्णपक्षद्वादश्यां सप्तषष्ट्युत्तरैकोनविंशतिशततमविक्रमाब्दे शिक्षाविभागविद्यामन्दिराध्यक्षः श्रीसंजीवनगङ्गोपाध्यायस्ततोऽपाकृत्य सर्वसंख्यानावसथे नियोजितो वेतनेऽपि नैयून्यं जातं दशाधिकत्रिशतीम् । एतदीयस्थाने मक्खनलालभार्गवस्य नियोगोऽकारि पूर्णेन चत्वारिंशच्छतत्रयेण । सानुशयो लिखति— "निरपराधच्यावनैनाधिकारिणः पापदृष्टिस्त्वं सर्वैरनुभूयते ।" भार्गवाध्यक्षत्वकाले बावल्याबटङ्को बदरीनाथशास्त्रिमहोदयः संस्कृताध्यापको लब्धस्नातकोत्तरपरीक्षासाफल्यो भविष्यत् समयसमुन्नतिमनुचिन्तयन्सेवामत्रत्यां विहाय लक्ष्मणपुरविश्वविद्यालये स्नातकस्नातकोत्तरकक्षाध्यायिच्छात्राणां नियुक्तिमाससाद ।

### तृतीयपत्नीपरलोकवासः

आसन्नद्वाविंशतिवर्षपर्यन्तं तृतीयोपयमनानन्तरसञ्जातसम्पदादिसुखमनुभवतोऽस्य निरपत्यस्य मृतापत्यतया कुटिलकरालकालगत्या वसुग्रहमुखाङ्कोर्वीमितवैक्रमवत्सरीय ( 1968 ) मधुमाससितपक्षद्वितीयातिथावीशवीयवर्षस्यैकादशोत्तरैकोनविंशतिशततमस्य ( 1911 ई० ) चतुर्थमासद्वितीयतारिकायां ( 2-4-11 ) कृतपरलोकप्रयाणा संसारासारतामवबोधयन्ती शून्यवादाभ्यासाय प्रेरयद् द्रविडशास्त्रिणम् ।

द्विपञ्चाशद्वर्षदेशीयवयस्कोऽसौ द्रविडशास्त्री चतुःकृत्वोद्वाहायानेकसम्बन्धिबाधवैर्निर्बन्धे वाराणसीस्थवैद्यत्र्यम्बकशास्त्रिकृतं पाणिग्रहणमुदाहृत्य सप्ततिवर्षवयसि, परमयं महाभागो विवाहत्रितयविधावपि जायासुखाभावं दैवदुर्विपाकमेव मन्यमानः सर्वथा निषिषेध ।

वंशविच्छेदविरहायात्मीयैर्दत्तकपुत्रग्रहणाग्रहं विहितं धर्मपत्नीत्रयजातौरससुतक्षयं दैवप्रकोपं जानानस्तिरश्चक्रे ।

नन्देन्दुनिधि - धरणिमितेशवीयाब्दप्रथममासद्वितीयतारिकायां (2-1-1919) केनापि कार्येण महामहोपाध्यायद्विवेदिसदनं गतः शास्त्रिमहोदयस्तदीयसाक्षात्कारमकृत्वैव प्रत्यागतोऽर्थनाप्रसक्तत्वात्तस्य। शिक्षाविभागाध्यक्षपदं फतेहपुराद्दिनचतुष्टयेनालाभि।

महामहोपाध्यायदुर्गाप्रसादपण्डितप्रेषित - सप्तशतीसर्वस्वपुस्तकं प्राप्तं तदीयतातपादसम्पादितं लक्ष्मणपुरात् प्रकाशितम्। म. म. पं दुर्गाप्रसादपण्डितवरेणाभ्यर्थितयोर्वाक्यपदीयसरस्वतीकण्ठाभरणाभिधपुस्तकयोः प्रेषणं शास्त्रिवरेणाकारि।

वसन्तप्रारम्भदिवसनिमित्तमभ्यङ्गं विधाय पारितोषिकरूपेण शास्त्रिणा प्रतिजनं सर्वेभ्यो मन्दिरकार्यकर्तृभ्यो मुद्राद्वयी प्रदत्ता राजती। प्रबलतो वर्षस्य तृतीयमासाष्टादशतारिकायां विभावर्यां समागतो मदनशर्मा प्रश्नवरः संजीवनगङ्गोपाध्यायो मक्खनलालद्वारा मन्त्र्युपमन्त्रिणावपि महामहोपाध्यायपदवीलाभपरिणामनामनिर्देशाय प्रेरणीयाविति प्रोवाचेति शास्त्रिणमवोचत्—"अहो अनौचित्यं, किं ममेदानीमेतया पदव्याधिकरोत्यत्रान्य एव नाहम्" इति। परेऽहनि शास्त्रिवरो मदनशर्मणोद्वेजितः पूर्वदिने पाठशालां गत्वा संपाठ्य च निरुक्तं रामनिवासारामगर्भगृहविद्यमानपरीक्षास्थानमुपगम्य शिक्षाविभागाध्यक्षमक्खनलालेन मन्त्रयित्वा प्रश्नवरमदनशर्मणः पाण्डित्यं संचिन्त्य खिन्नमनस्कः शास्त्री सद्म प्रापत्।

श्रीज्ञानचन्द्रपुत्रेण श्रीसातकोडीशर्मणा गवे प्रेषितानि शकटभारतृणानि लब्धवान् द्रविडः। गौडजातीयस्य गोविन्दशास्त्रिण इदमीयशिष्यस्य नवनगरस्थ-(ब्यावर) सनातनधर्मपाठशालायां नियुक्तिमवगम्य संतुतोष द्राविडमहाभागः।

वाराणसीतश्चन्द्रधरगुलेरिप्रेषित-काठकसंहिताखण्डत्रयं विंशत्युत्तरैकोनविंशतिशततमख्रिष्टाब्दाद्यमासत्रयोविंशतितारिकायामधिविन्नं (23।1।1920)।

षष्टिवर्षायुषोऽप्येतस्य कियानभिनिवेशो ग्रन्थसंग्रहे। वर्षस्यैतस्य जूनमासत्रयोदशतारिकायां (13।6।1920) मक्खनलालभार्गवो न्यायाधीशपदभारमग्रहीत्। मयकूटादागतो (मेरठ) वाङ्गो नवकृष्णरायमहाभागो भार्गवे न्यायाधीशे

सति प्रवर्तमानख्रिष्टवत्सरीयसितम्बरमासस्यादिमे दिने ( 1।9।1920 ) शिक्षा-विभागाध्यक्षपदे विद्यामन्दिराध्यक्षपदे च न्ययोजि ।

एकषष्टिवर्षमितं वयोऽवसाय्य यारच्छिकराज्यसेवानिवृत्तिकामो भूनेत्राङ्केन्दुमितेशवीयवर्षस्य ( 1921 ) मार्चमासद्वितीयदिनाङ्काद्दूरीकृताम्यर्थनः सेवाकार्याद्विश्राममलभत । राज्यकोषतो द्वात्रिंशन्मुद्रामितमासिकवेतनं नियतीकृतं राजकीयसेवानिवृत्तिनियमानुसारममुष्य । ततोऽपि दशमांशं दानरूपेण निक्षिप्तवान् । धर्मशास्त्रीयनियमस्यातिक्रमणभिया "दाने तपसि शौर्ये च यस्य न प्रथितं मनः । विद्यायामर्थलाभे च मातुरुच्चार एव सः" इति शिष्टवचनस्यापि सम्माननीयत्वाद् यथाशक्ति दानमपि न परिहृतवान् ।

बहुलपरिग्रहो जनः कष्टायते, विचिन्त्यैतत् सर्वमप्याभरणादिबहुमूल्यवस्तुजातं विक्रीय कानिचिद् वस्तूनि दीनानाथेभ्यः कतिचन च सेवकवर्गाय वितीर्य स्वल्पपरिग्रहोऽयं संव्यानोपसंव्याने द्वे एव वाससी सर्वदा धारयन् हेमन्तकालोपयोगाय रल्लकनीशारौ सुरक्षितावस्थापयत् । शिरस्त्राणपादत्राणयोस्तु चर्चैव न ।

सांसारिकसर्वसुखाद्विरज्यमानो वानप्रस्थप्रतीकाशं जीवनं यापयितुमेषणात्रयं त्यक्तुमनाः सङ्गृहीतस्वभुजार्जितरिक्थराशिं परोपकारकार्ये नियोजयितुमचीकमत । गृहस्थाश्रममधिवसतोपार्ज्यमानधनस्य दशमांशं यथाशास्त्रं सत्कार्ये विनियुञ्जानेन शास्त्राचारो निर्वाहितो द्रविणभोगेन सत्रा । "दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य" । तृतीयाश्रमवर्तितया भोगस्यानौचित्यम्मन्यमानेन गृहस्थाश्रमभोगावशिष्टस्य वसुनस्तृतीयां गतिं शङ्कमानेनाभिभाषकैरात्महितैषिभिश्च परामृश्य विद्यादानमेव निखिलदानोत्कृष्टं विन्दमानेन विद्याविकासस्थल्यां वाराणस्यां स्वशाखीयकृष्णयजुःसंहितायाः शाश्वतस्थित्यभिकेन त्रिनेत्राङ्केन्दुमितेशवीयेऽब्दे सितम्बरमासस्याष्टतारिकायां (8।9।1923) कृष्णयजुर्वेदपाठशाला प्रतिष्ठापिता ।

चिरस्थायित्वविधित्सया यस्याः प्रबन्धकसंस्थाने भाविकाले सम्यक् सञ्चालनाय सदस्याः प्रतिष्ठिता उत्तरदायिनो विश्वसनीयाश्च मनोऽनुकूला निर्वाचिताः । ते च यथा—

1. वाराणसेयमाण्डलिकः (जिलाधीशः)
2. काशीरामशर्मा
3. पं० वीरेश्वरशास्त्री द्राविडः
4. चन्द्रशेखरशर्मा
5. वेङ्कटेशशास्त्री
6. विजयचन्द्रो जयपुरस्थः
7. श्यामसुन्दरशर्मा
8. गोपीनाथः
9. श्यामाचरणः

नवसदस्याः सम्भूय यथासमयमस्या अधिवेशनमकार्षुः। एकस्याध्यापकस्य चन्द्रशेखरस्य कृष्णयजुर्वेदतैत्तिरीयशाखापरिनिष्ठतस्य मासिकवेतनं निर्धार्याध्यापनाय नियुक्तिः कृता। कृष्णयजुर्वेदतैत्तिरीयसंहिताध्यायिछात्रेभ्यश्छात्रवृत्तिप्रदानस्यापि प्रावधाननुष्ठितम्।

यादृच्छिकसेवानिवृत्तोऽयं निश्चिन्तः स्वकीयदिनचर्यायां स्वल्पं साधारणं परिवर्तनं विधाय यथावदखिलान्नियमान् पालयाम्बभूव। निशीथोत्तरचतुर्वादनवेलाप्राप्तजागर्यो निवृत्तशौचस्नानादिक्रियः सन्ध्याभगवत्पूजनादिनित्यकर्मनिवृत्त आसूर्योदयं साँगानैराभिधगोपुरान्तस्थहनूमद्दर्शनात् परावृत्त्योष्णपेयं पायंपायमौषधभावेन "स्वाध्यायोऽध्येतव्यः" इति वचनेन ब्रह्मयज्ञं स्वशाखीयतैत्तिरीयसंहितापाठात्मकमनुष्ठायागन्तुकैः सह संलप्य माध्यन्दिनसन्ध्यादिसम्पादनायायासीत्। "न पचेदन्नमात्मने" इति स्मृतिवचः परिपालयन् पाकक्रियां निर्वर्त्य बलिवैश्वदेवसम्पादनाय, भगवते नैवेद्यार्पणं कृत्वा तत्सेविकायै भोजनार्थं दत्वा स्वयमभुङ्क्त। विहिताहारक्रियो नीचैरागत्यास्वाप्सीत्।

द्वादशवादनतोऽनुष्ठाय किमपि रहस्यमन्त्रजपादिकृत्यं द्विवादनान्तरमध्ययनार्थमागताञ्जिज्ञासून् विविधविषयानध्याप्य समायातेभ्यः पौरेभ्योनेककष्टनिवारकमन्त्रतन्त्रादीन्निर्दिश्य परामर्शार्थमुपस्थितैः परामृश्य च चतुर्वादने सति सायन्तननित्यकर्मनिवृत्तये शौचस्नानादिभिर्निवृत्य पाकक्रियानन्तरं समाप्तसन्ध्यावन्दनभगवदारातिकः स्वल्पमभ्यवहृत्याधस्तादागतः स्वीयैराप्तैः

संलप्य प्रधानछात्रानध्यापिपत् विपठिपूनशेत च जाते नववादने । क्रमोऽयमहरहः यथानियमं पर्यचलदृतुभेदेन परं कालपरिवर्तनमवश्यमेव व्यधात् । निदाघकाले नक्तमध्यापयन्न कमपि छात्रमावश्यकतावर्जं पतङ्गकीटादिहिंसाभीतः ।

रात्रौ ग्रीष्मर्तौ शयनसमये क्लेदयित्वा शरीराच्छादनोत्तरीयं निष्कोष्य च तदाच्छन्नतनुरस्वाप्सीत्तदनु च निशीथे शुष्कतापन्ने तस्मिन् पुनरार्द्रीकृत्य निष्पीड्य च निद्रासुखमनुबभूवाचतुर्वादनम् । प्रबुध्य च नित्यकार्यं यथावन्निरवर्तयत् ।

## श्रीश्यामसुन्दरपुरोहितः प्रथमो विभक्तशिक्षाविभागाध्यक्षः

(सितम्बरमासः 1923 ई०) अग्निनेत्राङ्कभूमितेशवीयवर्षे तात्कालिक-शिक्षामन्त्रिणा श्रीगोपीनाथमहाभागेन पदद्वयं जयपुरमहाराजश्रीरामसिंहस्थापि-तशिक्षाविभागप्रारम्भदिनादारभ्यैकेनैवोह्यमानं विभज्य बाङ्गश्रीनवकृष्णराय-महोदयो महाराजकालेजप्राचार्यपद एव निवेशितः वहिर्विद्यमानस्थानाहूतपण्डित-श्रीश्यामसुन्दरपुरोधोवर्यः शिक्षाविभागाध्यक्षपदमध्यारोपितः ।

जयपुराभिजनोऽयं महाभागः प्रारंभत एवात्रत्यविद्यालयेष्वधीयानो जय-पुरमहाराजकालेजतः स्नातकोत्तरकक्षायामधीत्य गुरुवरश्रीवीरेश्वरशास्त्रिण एम. ए. परीक्षां संस्कृतविषयिणीं समुत्तीर्योपाधिमिममगृह्णात् । गुरुपादपद्मसौरभ-घ्राणेन सततमात्मानमतोषयन्मधुप इव । हिन्दूविश्वविद्यालयेऽपि किञ्चित्कालं श्रीमदनमोहनमालवीयमहोदयैः परीक्षासंचालकपदे नियोजितोऽसौ पूर्वमितः । हिन्दूविश्वविद्यालयसंस्थापकैः श्रीमदनमोहनमालवीयमहाभागैश्चतुर्विंशत्यधिकै-कोनविंशतमखिष्टाब्दे पुण्यतीर्थस्थले प्रयागे संयोजयिष्यमाणधर्मपरिषदि विचा-रार्थं भागग्रहणायामन्त्रणपत्रं प्रेषितं यदिदमीयवैदुष्यज्ञापकसंस्कृतभाषामाध्यम-मेवाश्रयत् । ज्ञायतेऽनेन यत् संस्कृतविदस्तदानीमपि संस्कृतज्ञैः सह पत्रव्यवहारे संस्कृतस्यैवोपयोगमकुर्वन् । पत्रमविकलं तत् प्रस्तूयते—

## मदनमोहनमालवीयानां पत्रम्—

दिनाङ्क 11-1-1924

श्रावणमासे वाराणस्यां गगनवसुनन्दमहीमितवैक्रमवत्सरे हिन्दूमहासभा-सम्मिलितविद्वद्भिरार्यवंशीयानां सर्वोन्नतिसाधनभूतधर्मरक्षार्थं समुन्नत्यर्थं चैतस्य

धर्मसम्बन्धिप्रश्नानां निर्णयार्थं परिषदाह्वानं कर्तुं महासभासमितिरादिष्टा। समित्या तीर्थराजे प्रयागे धर्मपरिषदोऽन्तरमेव माघकृष्णषष्ठ्यां जनवरीमासस्य सप्तविंशतितारिकायां परिषदियं सज्जिता भविष्यति त्रिदिनपर्यन्तं विषयविचारणाय। तत्र बहुमानपुरःसरं प्रार्थये भवन्तं तिथिष्वेतासु सभामागमनेनालङ्कुर्वन्त्विति।

## शिक्षाविभागव्यवस्थापनम्—

सत्रेऽस्मिन् प्रारब्धे शिक्षाविभागाध्यक्षपदाधिष्ठितः श्रीश्यामसुन्दरशर्मा दयनीयां शिक्षाविभागदशां विशृङ्खलताञ्च विद्यालयमहाविद्यालयविद्यमानामपोहितुमयतताश्रान्तम्। महामनसानेन परिवर्तनेन साकमेव पदविभागव्यवस्थां सुचारु सम्पाद्य वार्षिकवृद्ध्या सत्रा वेतनमानशृङ्खलापि सुनियोजिता तत्तत्पदानुरूपा। विद्यालयमहाविद्यालयान्तरापेक्षया संस्कृतकालेजस्थितावत्र विशेषेण ध्यानमदायि। संस्कृतकालेजे परम्पराप्रचलितशुक्लयजुर्वेदातिरिक्तावशिष्टवेदत्रयीपदानि नवीनानि सृष्ट्वा तदध्यापनप्रबन्धोऽपि विहितस्तत्तद्वेदविदध्यापकनियोगेन। शुक्लयजुर्वेदीयप्राध्यापकपदे महाराष्ट्रियगणेशशास्त्रिवैदिकः ससम्मानं समाहूय तत्पदमध्यासितः।

प्रातःस्मरणीयपितृचरणानां साहित्यवेदान्तशास्त्रद्वयाध्यापनभारं लघूकर्तुंकामव्याजेन वेदान्तशास्त्रप्राध्यापकपदं पृथक्कृत्य लवपुरतः समाहूय सुहृत्-सङ्काशं चातुर्वेदगिरिधरशर्ममहाभागं तत्पदे प्राध्यापकत्वेन प्रत्यतिष्ठिपन्-निजनैपुण्यान्महामहोपाध्यायदाधिमथपण्डितश्रीशिवदत्तमहाभागस्य लवपुरीयप्राच्यविद्यालयाध्यापननिरतस्यात्मसम्मानरक्षाशङ्कामुत्पाद्य "प्राप्यचलानधिकारान् शत्रुषु मित्रेषु बन्धुवर्गेषु नापकृतं नोपकृतं न सत्कृतं जगति किं कृतं तेन"? भणितिमिमां पूर्णतया निर्व्यूढवानेषः।

आवश्यकान्यन्यान्यपि नवपदानि तत्कालमेवाध्यापनायासृज्यन्तानेनात्र सामान्यसंस्कृतपदमध्यासितो भट्टश्रीमथुरानाथशास्त्रिमहोदयः स्वसुहृत्सौजन्येन। आङ्ग्लभाषाध्यापनाय च सेवानिवृत्तो गोपीनाथ पी० ए० डी० निजसहायकसंचालकपदात् प्रतिष्ठापितः परम्परायातवैद्यश्रीनरहरिभट्टमपोह्य चतुःपुरुषानुगमपि तदीयस्थाने श्रीनन्दकिशोरभिषगाचार्यो न्ययोजि।

महाराजकालेजे व्याकरणाचार्यः श्रीमदनलालप्रधनवरमहोदयः प्रवक्तृपदे न्ययोजि। नवं संस्कृतविद्यालयीयनिरीक्षकपदं सृष्ट्वा कतिपयदिनानन्तरं व्याकरणाचार्यमहोदयस्तत्पदे स्थानान्तरितो रिक्तपदे च श्रीमाधवप्रसादशास्त्रिमहोदयस्य नियोजनमकारि। व्यपगतेषु कतिषुचिन्मासेषु भट्टमथुरानाथशास्त्रिमहोदयो महाराजकालेजप्रवक्तृपदे स्थानान्तरं लम्भितो माधवशास्त्रिमहोदयश्च संस्कृतकालेजे स्थानान्तरेण प्रवक्तृपदे संस्थापितः।

परंपरायातशिक्षाविभागनिदेशक एव विभागीयपरीक्षासंचालनकार्यमपि निरवहत् परं स्वकीयविश्वासपात्रं कमपि तत्कार्यसहयोगिनं विधाय समीचीनतया परीक्षासञ्चालनं कुर्वन्नास्त।

अस्मिन्नेव व्यतिकरे महामहोपाध्यायपदभाजः श्रीदुर्गाप्रसादमहाभागान् संस्कृतकालेजाध्यक्षान् सेवातो निवर्त्य महामहोपाध्यायगिरिधरशर्मचातुर्वेदान-धिकारहरणेन वरिष्ठानामध्यक्षपदे प्रत्यतिष्ठिपत्। संस्कृतकालेजीयदीक्षान्तसमारोहप्रारंभ एतदुपज्ञ एव। प्रथमदीक्षान्तसमारोहे दीक्षान्तभाषणविधायकाः सरनाइट-पदविभूषिताः शिक्षामन्त्रिणः श्रीमन्तो गोपीनाथपुरोहितमहाभागा आसन्। पितृचरणाश्च सुश्लिष्टपद्यमालाभिः प्रतिवर्षं यावज्जीवमागन्तुकानां स्वागतसत्कारमकुर्वन्।

शास्त्रिमहोदयः स्वर्गीयामात्यकान्तिचन्द्रमुखोपाध्यायात्मजश्रीज्ञानचन्द्रमुखोपाध्यायप्रदत्तसम्मानसूचकरायबहादुरपदवीलाभं श्रुत्वा सभाजितुमेनमगात्।

शिक्षाविभागाध्यक्षेण श्रीश्यामसुन्दरपुरोहितेन कमपि विषयमुद्दिश्य पत्रमवापि शास्त्रिणा।

मलसीसरसामन्तभूरसिंहनिमन्त्रणमवाप्य गतः शास्त्री रूपसिंहं सपुत्रपौत्रमवलोक्य तेनोपदीकृतं बीकानेरनगरनिर्मितं महाकम्बलं स्वीकृतवान्।

राज्यसेवानिवृत्तेर्न कोऽपि नियमो यावत्कार्यविधानसामर्थ्यं तावदायुषोऽन्तिमावस्थायामपि सेवाकर्मासक्त्या कुर्वन्ति स्म। शक्तो वाऽशक्तो वा सर्वस्यापि कृते सेवाकार्यविश्रान्तेरायुःसीमा नासीन्निर्धारिता।

वेदाक्षिनन्दशशाङ्कमितेशवीयाब्दे (1924) राजमन्त्रिपरिषदा सेवाका-

र्यंनिवृत्तेरायुःसीमा निर्धारिता सर्वस्यापि सेवाकार्यंरतस्य कृते तदनुसरतानेनापि महाभागेन शिक्षाविभागस्य कृतेऽपि नियमोऽयं प्रारब्धः।

वत्सरस्योपरिनिर्दिष्टस्य मार्चमासे चौकडीग्रामसामन्तेन ज्ञानवृद्धिभेदविषयिणी चर्चाजायत।

पञ्चविंशत्यधिकैकोनविंशतिशतमख्रिष्टहायनस्य जनवरीमासद्वितीयदिनाङ्के ( 2-1-1925 ) लिखितं शास्त्रिणा—

"दीक्षान्तसमारोहापरदिवसे पण्डितसभायां वैदिकगणेशभट्टगिरिधराचार्ययोर्व्याख्यानमुत्तममन्येषां मध्यममिति।

अस्मिन्नेवान्तराले जयपुरपरिवृढेन श्रीमन्माधवसिंहमहाराजेन दत्तकतयाऽपत्यकृतकरवादीसरदासामन्तात्मजं महाराजकुमारं मोरमुकुटसिंहाभिधं फरवरीमासस्यैकोनविंशतितारिकायां दस्राक्षिनवभूमित ( 19-2-1922 ई० ) ख्रिष्टाब्दस्याध्यापयितुमाकारितो वाराणसीवासचिकीर्षापदेशेन न्यषेधीत्।

कान्तिचन्द्रमुखोपाध्यायानां सद्मनि प्रतिवर्षं जायमानरथोत्सवदुर्गापूजनै तत्परलोकवासात् राज्ञोऽसम्मततया नाभूताम्। रीतिरियं युक्तैव "राजा मित्रं केन दृष्टं श्रुतं वा -' दृष्ट्वेदं निर्विण्णः शास्त्री लिखति 'मन्त्रिणि मृत एवैवं समुचितं वा राज्ञः, भवतु, कोऽहमेतस्य।'

जयपुरमहाराजश्रीमन्माधवसिंहभूपतिकृताह्वानेन राजसभां गतो द्राविडो विक्टोरियाराजराजेश्वर्याः स्मारके यथाशक्ति सहायताकरणं मम प्रीतिकरमिति राजाज्ञां श्रुत्वा राजकीयैः सर्वैरेवोत्तममध्यमाधमैर्विन्यस्ते देये पञ्चमुद्रादानं प्रत्यश्रृणोत्। गृहमागतो मक्खनलालसूर्यनारायणश्यामसुन्दरप्रभृतिभिः संभाष्य स्थितः।

शिक्षाधिकारिभिः शिक्षाविभागे तत्तद्विषयाधिगतपरमार्हतीकास्तत्तद्विषयाध्यापनाय नियोज्यन्त इत्यास्ते वास्तविको नियमः परमन्यथाभावमवलोक्य चेखिद्यमानचेताः शास्त्रिमहोदयः सानुशयं विषण्णः।

एकदा सायन्तनीं सन्ध्यामुपास्य संजीवनमेघनादयोर्महालेखालयेऽध्यक्षो-

पाध्यक्षस्थाननियोगं निशम्यारामे गतागतं कृत्वागत्य सुप्तस्यापि न नेत्रपथे निद्रोपस्थिता चिराय ।

प्रत्नप्रधानमन्त्रिणो मुखोपाध्यायस्य परद्वत्सरे परलोकमितस्यालयोपेक्षां शासनाचरितामालोक्याभीलार्तिमन्वभवदेष शास्त्री स्नेहातिशयादात्मीयत्वाच्च ।

सेवानिवृत्ततया सर्वथा स्वतन्त्रः सन्नपि परोपकारभावनया सहयोगचिकीर्षया च संस्कृतकालेजीयपरीक्षासंचालकमहाराजाकालेजीयार्थशास्त्रप्राध्यापकश्रीविट्ठलवामनताम्हनकरस्य परीक्षाकार्यसाहाय्यमनौपचारिकतया सर्वविधं व्यदधात् । वर्षस्योपरितनस्य मईमास ( १५ । ६ । २० ) पञ्चदशदिनाङ्के ताम्हनकरप्रदर्शितपरीक्षापरिणामपरिवर्तनविषये स्वसम्मतिं प्रदर्श्य परीक्षापरिणामः प्रकाशं गमितः । जूनमासे मध्येमार्गं महामहोपाध्यायपदालङ्कृतेन शिवदत्तमहाभागेन "गाङ् लिटि," सूत्रस्थकारिका पृष्टा । द्वित्रदिनानन्तरं शिवदत्तशर्मा महामहोपाध्यायः प्रबोधितो "गाङ् लिटि" सूत्रस्थकारिकाग्रन्थम् ।

वैयाकरणशिवराममध्यमात्मजस्य सोमदेवस्य विषूच्या पक्षाघातेन चाकालमृत्युना दुःखितः शास्त्री । भार्याशिरोभूषणकण्ठभूषणानां विक्रयेण प्राप्तरूप्यक( **Rs.** 1615·72 ) ( १६१५ ≡।। ) परिज्ञानं विट्ठलशर्मणः पत्रेण । एकीकृतैकोनत्रिंशच्छतरूप्यकाणि कौसीदपत्रक्रयार्थं श्यामसुन्दरशर्मणः सविधे प्रेषितानि ।

पुण्यपत्तनसुराणादिसकाशादवाप्तैकोनशतत्रिसहस्ररूप्यकेषु राजकीयव्यावहारिकपत्रक्रयार्थं नवशतमवशिष्टसहस्रद्वयरूप्यकाणां परावर्तनं श्यामसुन्दरशर्मणः ।

महामहोपाध्यायाः पं० शिवदत्तशर्ममहाभागाः समागत्य "नानाभूय नानाभावं नाना-भूत्वेति" काशिकादत्तोदाहरणेषु स्वीयां विप्रतिपत्तिमूचिरे ।

अस्यैव वर्षस्य सप्तममासपञ्चविंशतितारिकायां शिक्षाविभागाध्यक्षनवकृष्णरायस्य कुमार्या अभिनन्दनाय तन्निकटे गतवान् द्राविडः ।

अष्टममासदशतारिकायां मन्त्रसंहितायाः प्रश्नद्वयं गोविन्दभट्टसमीपे प्रैषयदेष महामनाः ।

त्रयीलोचननन्दोर्मिमितेऽस्मिन् खिष्टहायने जनवरीमासषट्तारिकायां ( 6-1-1923 ) संस्कृतोपाधिपरीक्षापरीक्षकनामानि प्रष्टुं समागतविट्ठलताम्हनकराय नामानि निर्दिष्टानि । फरवरीमासे समागतप्रश्नपत्रसंशोधनपरीक्षणकार्यमकरोदयं शास्त्री ।

वेदान्ते शास्त्रिपरीक्षाविचाराय ताम्हनकरः समाययौ ।

3-1-1923

राजकीयसेवाविश्रामग्रहणानन्तरं शास्त्रिमहोदयो द्वित्रमासं चतुष्पञ्चमासं वा कदाचन जयपुरे कदाचन च स्वकीयकार्यकलापमुद्दिश्य द्वित्रमासपर्यन्तं चतुष्पञ्चमासपर्यन्तं वा वाराणस्यां स्थितिमकल्पयत् । तत्र त्रयोविंशत्यधिकैकोनविंशतिशततमे खिष्टाब्दे जनवरीमासस्य तृतीयतारिकायां लिखति दैनन्दिन्यां जयपुरस्थः—श्यामसुन्दरशर्मणा रामगोपालेन सहागतेन तैत्तिरीयपाठशालीयकार्यमुद्दिश्य संवादः । परीक्षकविश्वविद्यालयविषयविचारो दीनानाथदेवालये ।

अस्यैव मासस्य पञ्चमतारिकायां माधवपण्डितमाहूय सन्देशकथनं विट्ठलपण्डितद्वारा मासिकलाभस्तेनैव साम्राज्यकोशपत्रप्रेषणं श्यामसुन्दरसविधे ।

अष्टमदिनाङ्के गोपीनाथवर्मणो व्यवहारे यवनेन नन्दकिशोरसिंहेन च व्यावहारिकनियमोल्लङ्घितश्रेष्ठिरामनाथगुप्तस्यागमनं च स्वसंकटकथनाय ।

नवम्यां तारिकायाम्— वस्त्रयोर्नष्टयोर्यद्यपि मूल्यं बहु परं दयार्द्रतया १३।।।-)।। ग्रहणं गोविन्दनारायणशर्मद्वारा ।

एकादश्यां तारिकायाम्— श्रीकल्याणसिंहस्य बी. ए. शेखावतस्य गृहे गमनं गोपीनाथवस्त्रव्यापारिणा सह ।

द्वादशदिनाङ्के— फलैः सौभाग्यद्रव्यैस्तिलशर्कराभिश्च कञ्चुकखण्डेन च लवङ्गीति प्रसिद्धकौशेयप्रावरणप्रेषणं कल्याणसिंहस्य सविधे भार्यार्थम् ।

षोडशदिनाङ्के— ताम्हनकरागमनं वेदान्तशास्त्रिपरीक्षाविचाराय ।

सप्तदशदिनाङ्के— ससुवर्णतन्तुरचितकाशीप्रावरणं ताम्हनकरभार्यार्थं सफलतिललड्डुकानां च प्रेषणम् ।

ऊनविंशदिनाङ्के— सम्राजो गोपीनाथशर्मण आगमनं पुस्तकं वैशेषिकदर्शनस्यादातुम् ।

त्रयोविंशदिनाङ्के — न्यायसिद्धान्तमञ्जरीपूर्वभागो दुर्गाप्रसादशर्मणो द्विवेदस्य सविधे प्रतिश्रुतः प्रेषित ओंकारशर्महस्तेन ।

चतुर्दशदिनाङ्के—चन्द्रशेखरशास्त्रिणः सपत्नीकस्य काशीं गन्तुमागमनम् । सम्राड् गोपीनाथशर्मणः सविधे छाजुशर्महस्तेन प्रशस्तपादभाष्यन्यायकिरणावलीसंवलितवैशेषिकदर्शनपुस्तकस्य प्रेषणं प्रतिश्रुतस्य ।

सप्तविंशदिनाङ्के— चन्द्रशेखरपत्न्यै कौशेयशाटी - प्रावरणनिचोलानां दानम् ।

ऊनत्रिंशदिनाङ्के— चन्द्रशेखराय कार्पासपूरिताङ्गरक्षकदानं कौशेयप्रावरणस्य च ।

अस्यैव वर्षस्य फरवरीमासस्य प्रथमदिनाङ्के— ब्रह्मपुरीं गत्वा कृष्णलालगुर्जराय पञ्चानां मुद्राणां दानं गोप्रतिनिधिभूतानाम् ।

फरवरीमासस्य द्वितीयदिनाङ्के — जगतीप्रसादाय भार्गवोपाधये रामनारायणसकाशाच्छतद्वयमुद्राणामृणरूपेण दापनं शतमनु रूप्यकैकवृद्धया ।

षष्ठदिनाङ्के — प्रदोषे भट्टपर्वणीकरगृहे गत्वा रामभट्टतैलङ्गेन संवाद्य भट्टपर्वणीकरस्य सौभाग्यवत्यै साशीर्वादं पादवन्दनिकं दत्वा स्थानं प्रत्यागतः ।

(1-1-24) चतुर्विंशत्यधिकैकोनविंशतिशततमेशवीयवर्षस्य प्रथममासस्य प्रथमदिनाङ्के शास्त्री लिखति—

वैदिकश्रीप्रभुदत्तशर्माग्निहोत्री महामहोपाध्यायपदव्या सम्राजा भूषित— इति चातुर्वैद्य विजयचन्द्राचार्यस्य वाक्येन परां मुदमगमम् । द्वितीये दिनाङ्के— वैदिकमहाशयसभाजनाय तदग्निहोत्रशालागमनम् । षष्ठतारिकायाम् — पत्रे श्यामसुन्दरगोपीनाथक्षत्रिययोः प्राप्ते । महाराजसंस्कृतकालेजे यजुर्वेदस्य प्राध्यापकस्तदा कोऽपि नासीत्— अवलोक्यैतत् शिक्षाविभागाध्यक्षपदमधितिष्ठता श्यामसुन्दरपुरोहितमहोदयेन स्वकीयगुरुः शास्त्रिमहोदयो गणेशगोडशेमहोदयं तत् पदमलङ्कर्तुं पत्रेण प्रार्थयितुं निवेदितः ।

सप्तमदिनाङ्के — गोडशे गणेशभट्टो दृष्टः माघशुक्ले जयपुरं गन्तुं प्रत्यश्रौषीच्च ।

अष्टमदिनाङ्के— मौखिकपरीक्षाविषयसूचकपत्रोपगमो विश्वविद्यालयादुत्तरप्रेषणं च परीक्षाकार्याध्यक्षसविधे ।

दशमदिनाङ्के— आयव्ययाध्यक्षस्य पत्रं रूप्यकविषयकं प्राप्तम् ।

एकादशदिनाङ्के — काशीविश्वविद्यालयपरीक्षाध्यक्षसविधे पत्रप्रेषणम् ।

द्वादशदिनाङ्के –रजिष्ट्रार हि.यु. डाइरेक्टर जयपुरसविधे पत्रयोः प्रेषः ।

चतुर्दशदिनाङ्के— गोडसेस्थानाय तडिद्वृत्तं श्यामप्रेषितमुपागतम् ।

अष्टादशदिनाङ्के —शिक्षाविभागाध्यक्षसविधे तडिद्वृत्तं प्रेषितम् ।

द्वाविंशदिनाङ्के —श्यामस्य पत्रं प्राप्तं, रामघट्टजटापाठ्यधिकृतपाठालये वैदिकपरीक्षारम्भः । गोविन्दशास्त्रिणोऽन्नसत्रादपकृष्टं मैसूराधिपेन ।

द्वात्रिंशदिनाङ्के— उत्तरं श्यामस्य सविधे प्रेषितम् ।

षड्विंशतितारिकायाम्— बटोदरराजस्य महारुद्राभिषेके दाक्षिणात्यानां तदनुयायिनां ब्राह्मणानामार्त्विज्यास्वीकारोऽत्याश्चर्यंकरः ।

( 6-2-1924 )

विश्वेश्वरशास्त्रिपरिचयाय पत्रप्रेषणं गिरिजाप्रसादसविधे लक्ष्मणपुरे ।

( 13-2 ) प्रेषितं निवेदितं पत्रं प्रश्नपत्रैरष्टभिः सहितं परीक्षाध्यक्षसविधे ।

14-2 समितिविश्वविद्यालये मीमांसाशास्त्रनिबन्धाय ।

21-2 विश्वविद्यालयपत्रं 4-7 मारिचमासे समेति ।

17-2 विश्वविद्यालये प्रभुदत्तानुपस्थित्या न विचारः ।

( 1-3-1924 ) अध्यक्षाय जयपुरपाठशालायाः सन्देशप्रेषः । काशीसंस्कृतपरीक्षाध्यक्षसविधे तृतीयवर्ष-चतुर्थवर्ष-प्रथमपत्र-परिणामपत्रे द्वयपत्रं परीक्षोत्तरणपत्राणां पुटकं च प्रेषितानि ।

10-3 अवशिष्टपरीक्षापत्राणां पुटकं निवेदितम् ।

11-3 पिलानीग्रामाद्विजयचन्द्रस्य पत्रं प्राप्तम् । पुटकं मुद्रणाय दत्तम् । काशीविश्वविद्यालयस्य ।

12-3 मुद्रणसंस्थापत्रेण ताम्हनकरप्रेषितं दृष्ट्वा पुनरनुसन्धानाय पत्रप्रेषणम् ।

14-3- एकादशप्रश्नपत्राणां शोधनं, विश्वविद्यालयपत्रयोः प्राप्तिः ।

18-3-1924 उमेशकविराजः प्रश्नपत्रेभ्योऽनुबद्धोऽपि श्वो दातास्मीत्यवोचत् ।

19-3 उमाचरणकविराजस्य द्वयोः प्रश्नपत्रयोरेकपुटकेनानयनम् ।

21-3 पत्रं महामहोपाध्यायदुर्गाप्रसादशर्मणः प्राप्तम् ।

3-4 हरिनारायणो भावनो भोजनेन सत्कृतः । पाठशालापूर्वसभावृत्तस्यपत्रं व्यंकटेशशास्त्रिणे दत्तम् । शिक्षाविषयकपत्रं कविराजस्य सविधे प्रेषयितुम् ।

4-4 चिन्हस्वामिसविधे कविराजसविधे च पत्रयोराधानपरीक्षाविषययोः प्रेषणम् ।

10-4 निरीक्षकस्य पाठशालादर्शनाय गमनं विजयचन्द्रपण्डितेन सह ।

17-4 कविराजसविधे रूप्यकप्राप्तिपत्रं विजयहस्तेन प्रेषितं, परीक्षाप्रबन्धाभावसूचकं पत्रं कविराजात् प्राप्तम् ।

21-4 कलेक्टरप्रासादे चन्द्रशेखरशास्त्रिकाशीरामपण्डितव्यंकटेशैः सह प्रस्थायायव्ययादिलेखं प्रदर्श्य सम्मतिं लब्ध्वान्यान्यपि कार्याणि संसाध्य गृहमागतः ।

22-4 जयपुराद्राजनिवेदिते पत्रे बाष्पयानागतोत्तरपुस्तकप्राप्तिपत्रप्राप्तिः ।

25-4 आचार्यपरीक्षोत्तरपुस्तकानि नव दृष्टानि ।

26-4 शास्त्रिपरीक्षोत्तरपुस्तकानि एकविंशतिर्दृष्टानि । उपाध्यायस्य पत्राणि १-१८ दृष्टानि तत्र त्रयोऽनुपस्थिताः ।

28-4 दृष्टानि १६-३६ तत्र द्वावनुपस्थितौ।

29-4 उत्तरपुस्तकानि सर्वाणि दृष्टानि योग्यताङ्कान् लिखित्वा पत्रे संस्थाप्य प्रेषितः परीक्षापरिणामः।

1-5-1924 उत्तरपुस्तकानि परीक्षाया जयपुरं प्रेषितानि मूल्यमदत्वा।

2-5 मदनमोहनमाथुरस्थानं गत्वा जन्मपत्रिकाः प्रदाय परावृत्तस्तद्-यानेन।

3-5 विट्ठलसविधे बाष्पयानेन प्रेषितस्योत्तरपुस्तकस्य प्रापकपत्रं जयपुरे प्रेषितं पुस्तावसथव्ययमदत्वा।

7-5 पण्डितकाशीरामानन्तरामशर्मणोर्गृहं गत्वा कृष्णयजुर्वेदपाठशाला-वितरणपत्राण्यानीतानि निवेदनपत्रं च।

९-5 अपररात्रे तुरीययामे उत्थाय श्रीगङ्गामवगाह्य गृहमेत्य तक्रमापीय जयपुरं प्रति प्रस्थाय बाष्पयानस्थानमुपस्थाय श्रीगङ्गामवतीर्य प्रातःसन्ध्यो-पासिता।

10-5 उदयोत्तरं समाप्य सन्ध्यां यानं बाष्पस्यारुह्य मोगलसरायमेत्य माध्याह्निकमुपास्य द्वितीययामादौ उपाहारं कृत्वा प्रचलितो बाष्पयानेन। इटावायां सायंतनीं सन्ध्यामुपास्य टूडलायामाग्राया बान्दीकुईयानानां परिवृत्ति कुर्वन् जयपुरमेत्य गृहमेत्य प्रातस्तनविधिमवसितवान्।

14-5 गोपीनाथमहामहोपाध्यायशिवदत्तशर्मभिः सम्मेलः।

15-5 म० म० शिवदत्तपण्डितैस्समागतैः संभाषा। चातुर्वर्ण्यशिक्षायाः पञ्चानां श्लोकानां सव्याख्यानां संदर्शनम्।

17-5 महामहोपाध्यायपण्डितशिवदत्तोपायनीकृतं पुरुरूपनिरूपणपुस्तकं प्राप्तम्।

21-5 गोपीनाथो बी.ए. परीक्षायां द्वि. श्रे. उत्तीर्णः।

27-5 काशीविश्वविद्यालयाध्यक्ष-ध्रुवसविधे मदनाचार्यस्य परिचयाय पत्रप्रेषणम्।

R. SK S. LIBRARY
Acc No..6662


3-6 सम्राजः पञ्चमजार्जस्य जन्मदिवसोत्सवे बहुशलिकानिवासि-गोपीनाथशर्मण उपमन्त्रिण उद्याने सम्मिलय संभाषा ।

4-6 म० म० स्थानं गत्वा नियमावल्यां पाठ्यपुस्तकनिर्णयं सम्पाद्य परावृत्तः ।

10-6 छात्रनिवासाधिपाय ठक्कुरश्रीकल्याणसिंहाय सविधे पत्रोत्तरं प्रेषितम् । भीकोजीपन्तस्य गोपीनाथशास्त्रिसविधे आगते पत्रे कृष्णयजुर्वेद-पाठशालामुद्दिश्य ।

15-6 श्यामस्य पाठ्यपुस्तकविचारायागमनं सर्वाणि पत्राणि अत्रैव संस्थाप्य गमनं दुर्गादत्ताय देयमिति कथयित्वा ।

16-6 कल्याणस्यागमनं तैत्तिरीयारण्यकप्रथमभागेन सह दत्वा गुप्त-हस्तेन प्रेषणं, संप्राप्ताय दुर्गादत्ताय एकं विहाय सर्वपत्रदानं च मदनाचार्या-श्वासनम् ।

17-6 महामहोपाध्यायदाधिमथागमनं, श्यामकृतदौष्ट्यवर्णनं च, तैत्तिरी-यारण्यकपूर्वभागप्राप्तिः ।

21-6-24 ओंकारगुप्तनैयायिकवेदान्तसाहित्य - व्याकरणाचार्याणामा-गमनम् । आन्तरश्रेणिप्रवेशिकयोः परिणामागमः । आन्तरे 48 मध्ये 20 प्रवेशे 78 मध्ये 40 उत्तीर्णाः । विद्याधरः प्रथमश्रेण्याम् ।

24-6 प्रातः श्यामस्य उपाधिपरीक्षाविचारायोपस्थितिः ।

30-6 म० म० श्रीनाथाभिधैः श्रीदुर्गाप्रसादशर्मभिः श्रीवीरेश्वरकृष्ण-यजुर्वेदपाठशालामुद्दिश्य कृपाश्लोकं समञ्जलं सदाचारव्यवहारावाश्रित्य सचित्र-पटे लेखयित्वा प्रेषितमिति अनुगृहीतोऽस्मि ।

2-7 पुस्तकं शतपथस्य भगवद्दासस्य पठनाय दत्तं विजयचन्द्राय, पञ्च-सप्ततिश्चोरिता ।

6-7 काशीविश्वविद्यालयादध्यक्षप्रेषितं तद्द्वृत्तं प्राप्तं सोत्तरपत्रं तत उत्तरमपि प्रेषितं २४ गुरौ आगच्छेयं विश्वविद्यालय इति प्रेषितमपि रविवासरे द्विगुणं भाटकमिति परावर्तितं ततः श्वः प्रेषिता ।

7-7 तद्विवृत्तं प्रेषितं २४ तारिकायामागन्तास्मीति।

12-7 श्यामस्यागमनं सिरसीग्रामपाठशालास्थापनोत्सवदर्शनाय स्व आगमनं निमन्त्रयितुम्। परीक्षा काशीविश्वविद्यालये २६ जुलाई सत्रे दिवसे इति पत्रं प्राप्तम्।

30-7 भगिनीमन्दिरं रामघट्टस्थं जयपुरीयाभ्यां दर्शितम्। मासद्वयस्याध्यापकपुरस्कारः ५० रूप्यकाणि, छात्रवृत्तिर्मासद्वयस्यैवाशीतिरूप्यकाणि च, स्थानस्य दत्तावशिष्टं देयं सप्त च दत्तानि चन्द्रशेखरशास्त्रिणे लेखस्तु प्रथमतारिकायां परश्वो भविष्यति।

2-8 चरकलघुकौमुद्योः पाठारम्भः।

6-8 पत्रं जयपुरं प्रहितं जयकृष्णदासेन परावृत्यागतं प्राप्तम्।

8-8 मीमांसाविद्यालयस्य प्रवेशपत्रं कार्यविवरणपुस्तकं च प्राप्ते। ईशानचन्द्रमुखोपाध्यायज्येष्ठभगिनीस्थानगमनं वृत्तप्रश्नश्च।

13-8 पत्रं प्रयागस्थकोशाध्यक्ष–सविधे पाठशालानिधिवृद्धिप्रेषणायाङ्गलभाषाक्षरैः प्रेषितम्। मनीआर्डर द्वारा रूप्यकाणि मासिकानि सपत्राणि प्राप्तानि।

25-8— पत्रे राजकीयकोषाध्यक्षस्य विट्ठलस्य च प्राप्ते।

26-8—विचार्य पुस्तावसथे प्रत्युत्तरं प्रयागस्थकोशाध्यक्षसविधे प्रेषितम्।

2-9-24— विश्वेश्वरशास्त्रि को उधार दिलाया चन्द्रशेखरशास्त्रीजी से १५ दिन के करार से।

5-9— अद्य निशि मीने २८ अंशे वर्षप्रवेशः लग्नेशो नवमे द्वितीयेश एकादशे तृतीयेशः पञ्चमे सूर्येशः षष्ठे पञ्चमेशोऽष्टमे षष्ठेशः षष्ठे एकादशेऽशोऽष्टमे राहुकेतू षष्ठद्वादशयोः।

6-9 – श्रीमद्भगवति आत्मवीरेश्वरे रुद्राभिषेको गङ्गाधरभट्टेन कारितः।

11-9— पत्रं काशीकोषाध्यक्षसविधे विश्वविद्यालयीयमुद्रामुद्रितं प्राप्य परावर्तितं घाणेकरद्वारा सदःपत्रं तत्रत्यम्।

12-9— विश्वविद्यालयीयपरीक्षापुटकं प्राप्तं सेवकेन ।

14-9— विश्वस्वामिशास्त्रिणः समागमः ।

15-9— विश्वविद्यालये मीमांसापुस्तकविषयको मध्यमपरीक्षोद्देश्यको विचारः पूर्ववत् स्थितः ।

17-9— काशीराजकीयकोषाध्यक्षसविधे पत्रप्रेषणं पुनः ।
काशीकोषाध्यक्षस्य पत्रं प्राप्तं, काशीकोषाध्यक्षः पुनरुत्तरितः ।

19-9— विश्वविद्यालयपत्रप्राप्तिः उत्तरप्रेषणञ्च ।

20-9— विश्वविद्यालये प्रेषितपत्रे तारकाविस्मृतिमार्जनाय पुनः पत्र-प्रेषणं ततः पत्रप्राप्तिश्च ।

22-9— हनुमद्घट्टे शुकदेवमठे गतागतेन परीक्ष्य योग्यतानिश्चयः ।

23-9— राजनिवेदितपत्रं काशीसंस्कृतविद्यालयाध्यक्षप्रेषितं परीक्षाविषयकं प्राप्तम् । काशीकोषाध्यक्षस्योत्तरमपेक्षितार्थमुपागतम्, शास्त्र्याचार्यपरीक्षोत्तरपुस्तकं दृष्ट्वा लिखित्वा लेख्यं सपुस्तकद्वयं निबध्य पुटकं दत्तं प्रत्यक्षं रजिष्ट्रारायं ।

24-9— विश्वविद्यालये मीमांसाछात्रं परीक्षितुं गमनं परीक्षणमादाय लेखपत्रदानं शेषाद्रिदर्शनं च । प्रयागकोशलेखाध्यक्षस्य सविधे प्रेषणं पत्रस्य ।

30-9— काशीराजकीयसंस्कृतपाठशालीयपरीक्षापत्रनिर्माणम् ।

1-10-24— पत्रं महामहोपाध्यायदुर्गाप्रसादपण्डितस्य रूपकाणि राजकीयनिवेदितद्वारा, पत्रं परिचयाय सुब्रह्मण्यशास्त्रिणे रामभद्रझापण्डितेनालवरस्थेन दत्तम् ।

4-10— परीक्षानियोगपत्रं विश्वविद्यालयाध्यक्षसकाशात् प्राप्तं संस्कृतपाठशालाध्यक्षान्निमन्त्रणपत्रं च पूर्वनिर्मितपत्रं प्रेषितं संस्कृतकालेजाध्यक्षस्य कविराजस्य सविधे ।

7-10— राजकीयकोषाध्यक्षस्य रूप्यकाणां ३२।। प्राप्ति सूचकस्य पत्रं प्रेषितम् ।

12-10— प्रयागकोषाध्यक्षसविधे 4000/=रूप्यकपत्रार्थं स्मारणम् ।

14-10— काशीविश्वविद्यालयमीमांसातृतीयपत्रशास्त्र्याचार्यस्य निर्माय पुटके न्यस्य मुद्रितम् ।

15-10— मनीआर्डरद्वारा ३४) जयपुरात् प्राप्तम् ।

17-10— पुटके न्यस्तं प्रश्नपत्रं राजनिवेदितं कृत्वा परीक्षाध्यक्षसविधे प्रेषितं तत्र व्यय आणकत्रयस्य ।

18-10— प्रातरेव कविराजायाध्यक्षात् प्राप्तं पत्रं प्रदर्श्य हनुमद्घट्टं गत्वा चिन्नस्वामिशास्त्रिणं दृष्ट्वा श्यामाचरणदेनाम्ना पत्रं लिखित्वा तस्य छात्रेण कृष्णभूतिशर्मणा प्रेष्य गृहमागत्य माध्याह्निकं कृतवान् ।

19-10— हनुमद्घट्टं गत्वा श्यामाचरणदेसकाशादानीतं नियमपुस्तकं कविराजसविधे प्रेष्यादिविश्वेश्वरे रामवल्लभीं दृष्ट्वा संभाष्य गृहमागतः ।

21-10— पत्रं प्रयागगणनाध्यक्षस्याध्यक्षत्वे प्रमाणपत्रायोपदिश्य देयमिति कोषाध्यक्षाय प्रेषितस्य प्रतिलेखयुतम् ।

22-10— काशीरामजीसविधे पुस्तकद्वयं प्रतिलेखाय दत्वाऽग्रिमवर्षकर्तव्यटिप्पणं च ह्यः पत्रं च प्रदर्श्यागतः ।

24-10— रामचन्द्रवलवन्तद्रविडस्य बटवाहस्थानाद्राजनिवेदितं पत्रं प्राप्तं गोविन्दशास्त्रिणे दातुं विन्ध्याचलस्य दत्तान्यपि रूप्यकाणां राजपत्राणि नवनवते रूप्यकाणां परावर्तितानि कारणमनुक्त्वा गोविन्दशास्त्रिणः ।

25-10— नियमपुस्तकं पण्डितश्रीकाशीरामाय संस्कृतपाठशालानिरीक्षकाय दत्तं द्रष्टुं विचारयितुम् ।

28-10— पत्राणि पाठशालीयसदस आगामिनि सोमवासरे भाविनः प्रसिद्धिसूचकानि कलेक्टर पण्डितकाशीरामगोपीनाथश्यामाचरणश्यामसुन्दरचन्द्रशेखरशास्त्रिभ्यः प्रेषितानि तत्र पुस्तावसथद्वारा १९१, २०२, २०३, २०४ प्रेषितानि । काशीकोशाध्यक्षपत्रं प्राप्तम् ।

29-10— नियमावलिर्विजयचन्द्रस्य हस्ते प्रतिलिपयेऽनध्यायसूचीसहिताधीनीकृता ।

31-10-24— राजकोशं गत्वा कोशाध्यक्षात् पत्रं प्राप्य इम्पीरियल-बैङ्कनामकात्तद्रूपकाणां शतपञ्चपत्राणि अष्टौ अणवतश्च प्राप्य गृहागतः ।

2-11-24 पत्रं श्यामाचरण दे इत्यस्य सदसि नोपस्थातुं शक्नोमि परीक्षा-दिनत्वादिति ।

3-11— कलेक्टरसंज्ञकाधिकारिप्रासादे गोपीनाथकाशीरामचन्द्रशेखरवेंक-टेशैः सह सभामुपस्थाय प्रबन्धविषयचर्चां विधायागामिषण्मासे कर्तव्यविषय-विचारः समजायत ।

5-11— काश्यामद्य पञ्चगङ्गाघट्टे रामनगरराजपत्न्या रजताधिकसु-वर्णाभ्यां तुलादानं कृतमिति भिक्षुकाणां महान् हर्षः ।

6-11— तुलादानधनेन वैदिकेभ्यः पञ्च प्रत्येकं पण्डितेभ्यो दश रूप-काणि प्रदत्तानि रामनगरराजपत्न्येति श्रुतम् । तैलङ्गदेशपुटकं प्राप्तं दुराचार-कथामधिकृत्य ।

7-11— प्रयागकोशाध्यक्षस्य पत्रं प्राप्तम् ।

8-11— प्रयागकोशाध्यक्षपत्रोत्तरं प्रेषितम् ।

11-11— काशीविश्वविद्यालयं गत्वा श्यामाचरणगुप्तेनाभाष्य पुरस्कार-विषयं महाशयो मालवीयो दृष्टश्चिरं संभाषितः । श्रीविजयचन्द्रशर्मणा चित्र-स्वामी दृष्टस्तेन सहैव गतश्च ।

14-11— विश्वविद्यालयकार्यजातपुटकानि प्राप्तानि ।

17-11–मथुरादास गणेशदास का ५६०) का सर खत और इम्पीरियल बैङ्क का पास बुक जिसमें ६२०) जमा है वह रा० रा० वेंकटेशराव द्रविड को पाठ-शाला का खर्च होगा उसके वास्ते दिया अमानत खाते वास्ते ।

जयपुरं प्रति तुलालग्ने वृषनवमांशे प्रस्थानं कृष्णदीक्षितस्योकोपाह्वस्य। गृहे स्थापितं पाण्डुरङ्गगणपतिहस्ताभ्यां जयपुरं प्रति पत्रं प्रेषितम् ।

20-11— पत्राणि कलेक्टरश्यामाचरणगणेशदासानां सविधे प्रेषितानि वेंकटेशशास्त्रिहस्तेन ।

21-11— दुर्दैवात् काशीतः प्रस्थाय प्रभाते महावाष्पयानेनाधिकभाटकं दत्वा जयपुरमागतोऽश्वरथेन स्वामिना प्रेषितेन गृहमागतः।

22-11— परिकर्मणालङ्कृत्य श्रीभगिनीहस्तेन भुक्त्वा निद्रितः।

23-11 — सुखपूर्वकं जयपुरं प्राप्त इति अन्यावपि संदेशौ कथयितुं पत्रं प्रेषितवानस्मि चन्द्रशेखरसविधे।

25-11— आयुष्मतो गोपीनाथस्य गृहे भोजनमद्य।

26-11— पत्रं प्रयागगणनाध्यक्षसविधे वेंकटेशनाम्ना कुसीदं कृष्णयजुर्वेद-पाठशालीयं प्रेषणीयमिति गुप्तेन प्रेषितम्।

28-11— पत्रमुत्तरार्थपत्रेण सह दुर्गादत्तस्य जयपुरात्काशीं गत्वा परावृत्तं प्राप्तम्।

29-11— पत्रोत्तरं दुर्गादत्तसविधे प्रेषितम्।

10-12— श्यामः पुरोहित आगत्य संस्कृतसभायां प्रधानाध्यक्षत्वे नियोक्तुं स्वाभिप्रायमदर्शयत्। नाहमत्र योग्य इति प्रावोचम्। रामप्रसादः पुरोहितश्चत्वारि नारङ्गकाणि उपायनमादात्।

12-12— मयराष्ट्रात् खाचरियावासाच्च पत्रे प्राप्ते ततो मयराष्ट्रपत्रं मदनाचार्यसविधे प्रेषितम्।

उपरितनदैनन्दिनीसमुद्धृतं वृत्तमस्य वैदुष्यं जनसम्पर्को व्यवहारप्रावीण्यं कार्यक्षमतात्रस्यवाराणसेयसंस्कृतकालेजहिन्दूविश्वविद्यालयीयविविधविषयाणां लेखवाचिकपरीक्षापरीक्षकनिर्वाचनमस्यानालस्यपरामर्शदानमित्यादि वैशिष्ट्य-प्रामाण्याय।

जौलाईमासस्य त्रयोविंशतितारिकायां राजसभायां सर्वेषामुपायनं ग्राह्य-मिति निर्णये शास्त्रिमहोदयोऽपि रूप्यकद्वयानयनायोक्तो दत्तवान् द्वयीम्।

जयपुरीयोच्चन्यायालयन्यायाधीशश्रीराधामोहनमाथुरात्मजश्चिरायुर्हर-गोविन्दमहोदयो वाराणस्यां स्वास्थ्यविभागाधिकारि "हैल्थ आफीसर" पदम-वाप्य स्वकीयपितृव्येन मनमोहनमाथुरेण द्रविडशास्त्रिदर्शनेच्छयाऽगन्तुं पत्रम-

लेखयत् । पत्रमिदं हिन्दीभाषालिखितं संस्कृतानभिज्ञत्वात् । श्रद्धातिशयः कीदृशः शास्त्रिणं प्रति यदन्यत्र स्थितोऽपि व्ययभारमुपेक्ष्य दर्शनं मुख्यममन्यत । पञ्चविंशत्यधिकैकोनविंशतिशततमखिष्टवत्सरे लिखितं पत्रमिदं (१९२५) ।

सेवानिवृत्तावपि हिन्दूविश्वविद्यालयीयपरीक्षाणां गवर्नमेन्टसंस्कृतकालेज-परीक्षाणाञ्च परीक्षकास्तत्रत्यैः परीक्षासञ्चालकैः ससम्मानं निर्वाच्यन्ते स्म । एतावदेव न मीमांसादिविषयाणां निबन्धपरीक्षकत्वेनापि निर्वार्यंते स्म । निबन्ध-लेखकानां मौखिकपरीक्षार्थमाकारितोऽसौ काशीमगच्छत् । विश्वनाथदर्शनेच्छया परिचितजनदिदृक्षया च हिन्दूविश्वविद्यालयीयपरीक्षाविभागनिदेशकैर्मीमांसा-निबन्धपरीक्षायै समाहूतः शास्त्रिमहोदयो मार्चमासस्य नवमतारिकायां पञ्च-विंशत्युत्तरैकोनविंशतिशततमेशवीयहायनस्य (९ । ३ १९२४) वाराणसीयानाय कृतप्रस्थानो वाराणसीं प्राप्य मीमांसानिबन्धपरीक्षां मौखिकीं समपादयत् ।

प्रवर्तमानखिष्टाब्दीयप्रचलन्मासस्याष्टादशतारिकायां विश्वविद्यालय-सम्बद्धकृष्णयजुर्वेदीयपाठशालाधिवेशने संस्थानस्याधोलिखितसदस्याः समुप-स्थिताः—

1— काशीमण्डलप्रबन्धकः ( कलेक्टरः )
2— काशीराम शर्मा
3— वीरेश्वरशास्त्री द्रविडः
4— श्री चन्द्रशेखर शर्मा
5— श्री वेङ्कटेश शास्त्री
6— श्री विजयचन्द्रो जयपुरीयः
7— श्री श्यामसुन्दर शर्मा
8— श्री गोपीनाथ शास्त्री
9— श्री श्यामाचरणः

श्रीवीरेश्वरशास्त्रिसंस्थापितकृष्णयजुर्वेदपाठशालाधिवेशनानन्तरं मासद्वयं काशीमध्युष्य मईमासस्याष्टादशतारिकायामसौ जयपुराय काशीतः प्रस्थानम-कार्षीत् । जयपुरमवाप्य पूर्ववत् सर्वकार्यजातमात्मनोऽध्ययनार्थमागतानामध्याप-नादिकं यथावत् प्रारभत ।

**विभिन्नसंस्थानां सदस्यता परीक्षकता च—**

जयपुरराज्यान्तर्गतग्रामवासिनां साक्षरताहेतोः ग्रामेषु संस्थापितविद्यालयीयपाठ्यक्रमनिर्धारणसमितौ सदस्यत्वेन वृतोऽयं शास्त्री स्वीयान् विचारान् प्रकटयाञ्चक्रे। तत्सङ्केतो दैनन्दिन्यामित्थं कृतः—

" ग्रामीणशालायां प्रचारयिष्यमाणपुस्तकविषये विचारः सभाश्च " इति। कालिकतास्थसंस्कृतसमितिसञ्चालितकाव्यतीर्थपरीक्षायाः परीक्षकत्वं निरवहत्।

पञ्चनदविश्वविद्यालयसंचालितप्राज्ञविशारदशास्त्रिपरीक्षाणां तथा च काशीगवर्नमेन्टसंस्कृतकालेजपरीक्षासु विविधविषयाणां परीक्षका अभूवन् द्राविडमहाभागाः। किञ्च वाराणसीस्थहिन्दूविश्वविद्यालयपरीक्षास्वप्यनेकविषयाणां परीक्षकत्वेन निर्वाचिता आसन्। जयपुरस्थसंस्कृतकालेजपरीक्षासु केवलं परीक्षका एव नाभवन् सत्परामर्शेणैतेषां सञ्चालनमपि विदधुरनौपचारिकरूपेण।

**सत्परामर्शः—**

अन्येऽपि ये नागरिकाः स्वकीयविविधशङ्कासमाधानाय समायातास्तदीयं समाधानं विविधैर्मन्त्रादिजपैरन्यैश्चाभिमन्त्रितधूपादिदानैरभिचारापाकरणमन्त्रादिभिश्च कृत्वा सन्तोष्य प्रेषयामास। परीक्षासंचालकपदे भवदीयान्तेवासिनो जगतीप्रसादभार्गवस्य विनियोगे जाते परीक्षाकार्यधुरं सर्वामपि निरवहन्ननौपचारिकतया बोधयंश्च तं नैपुणीं तत्रासादयत्। ख्यातिजुषो वाराणसेयान् विशिष्टान् विपश्चित्प्रवरांस्तत्तत्परीक्षासु परीक्षकत्वेन निरधारयत् येन परीक्षाणां योग्यता च सम्यक् प्रवृद्धा ज्ञाता स्यात्। षड्विंशत्यधिकैकोनविंशतिशततमेशवीय ( १९२६ ) हायनदैनन्दिनीमाश्रित्य विविधविषयवार्तोल्लेखः।

सप्तषष्ट्यात्मके वयसि विद्यमानस्यापि द्रविड़महाशयस्य धर्मनिर्वाह-परायणता लोकानां धर्माचरणादर्शोपस्थापिका। प्रथममासारम्भे लिखति "ब्रह्मयज्ञात्मक-स्वाध्यायभूतयोः संहिता ब्राह्मणयोः पारायणारम्भः।"

परामर्शार्थमाङ्गलमहाविद्यालयाध्यक्षपदमध्यासीनो बाङ्गो नवकृष्णरायमहोदयः समागत्य वार्तालापं व्यदधात्। खाचरियावास-सामन्तः स्वकीयवर्षार-

म्भमहोत्सवे गुरुमहाभागानाशीर्वादप्राप्तिकामनया समाहूतवान् । लोकव्यवहारप्रवीणः पूज्यपादो गुरुवरः परिधानीयवस्त्रादिपरित्यागमाकलयन्ननुष्णीषगमनं लोकाचार-विपरीतमवगच्छन् केवलं फलान्येव सम्प्रेष्याशिषायुनक्तम् ।

कृष्णयजुर्वेदतैत्तिरीयशाखाप्रचारविषयैतत्पाठालयाध्यायिछात्रेभ्यः वितरीतुमेतदीयभगिन्या श्रीमत्या गङ्गादेव्या त्रयोदशमुद्राः समर्पिताः ।

काशीविश्वविद्यालयाध्यक्षप्रेषितरूपकपत्रमेकं शास्त्रिणावापि । यस्मिन् गताब्दपारिश्रमिकपञ्चाशदुत्तरैकादशशतमुद्राप्राप्तेरुल्लेखोऽवर्तत ।

म० म० श्रीदुर्गाप्रसादद्विवेदमहाभागाः स्वरचितचातुर्वर्ण्यशिक्षोपोद्घातविचारार्थमुपस्थिताः स्वयमेव । म० म० श्रीदुर्गाप्रसादद्विवेदेनालोकनाय दिलीपसिंहहस्तेन प्रहितश्चातुर्वर्ण्यशिक्षोपोद्घातः सम्यक् समीक्ष्य परावर्तितः शास्त्रिमहोदयेन ।

ज्योतिषाचार्यगिरिजाप्रसादस्याध्यापनाय संस्कृतविद्यामन्दिरे नियोगमाकर्ण्य राजसभायामेतदीयपितुर्निश्चन्ततता परं शास्त्रिमहोदयः संशयितवानेवात्र ।

माधवसिंहनृपतिप्रयाणानन्तरं तदीयविश्वासपात्रं कारागारनिपातितो बालाबक्षजीनामा ततो निर्मुक्तः शास्त्रिणो भगिन्या दर्शनाय दोषा समागतः शास्त्रिणा स्वयमालोकितः ।

काशीप्रस्थानायोद्यतस्य वैदिकविजयचन्द्रस्य सदनमासाद्य शीतनिवारकाङ्गरक्षकावुद्दिश्य दत्त्वा पत्रं लिखितवान् । श्वशुरालये श्वश्रूपत्रेण चौर्यवृत्तं विदित्वातीवाखिद्यत शास्त्री ।

कर्णपुरपाठशालाध्यक्षो मध्यमपरीक्षाप्रश्नपत्रनिर्माणप्रार्थनापत्रं काश्यां प्रेषितवांस्तत्र शास्त्रिवर्यानुपस्थितया जयपुरं परावर्तितम् ।

मथुरापाठालयाध्यक्षेण प्रेषिते परीक्षापत्रं पुटकञ्च कर्णपुरपाठशालाध्यक्षप्रेषितपरीक्षापुटकञ्च काशीतः परावृत्तान्याप्तानि । मासत्रयात्पूर्वप्रेषितपत्रस्योत्तरं प्रयागविभागसम्राट्प्रतिनिसभानिर्णीतविषयात्मतया शास्त्रिसविधे प्रेषितम् ।

परीक्षापत्राणामर्धभागं परीक्ष्य श्वो होलिकासद्भावादद्यैव पाटलकुसुमानि पिष्टातकफलानि मधुराणि चानाय्य स्थापितानि द्राविडमहाभागेन ।

अद्य जयपुरे होलिकोत्सवे सम्मिलितुं योधपुराधिपतिः सपरिवारवर्गः समायातः । परं जयपुरपरिवृढः पराधीनपाशपतितो नागन्तुमशकदिति सर्वे जनाश्चेखिद्यन्ते ।

काशीराजकीयपाठशालासम्प्राप्तवैदिकमध्यमपरीक्षापत्राणि समीक्ष्य स्थितः शास्त्री चातुर्वेद्यरामकृष्णागमनेन कार्यान्तरसम्पादनपरोऽभवत् । अनन्तरञ्च परीक्षितोत्तरपुस्तकपरिणामपत्रं काशीस्थराजकीयपाठशालापरीक्षाध्यक्षसविधे सम्प्रेषयामास द्रविडमहाभागः ।

काशीं प्रति प्रस्थातुकामस्य वेङ्कटेशशास्त्रिणो हस्ते वीरेश्वरकृष्णयजुर्वेदपाठशालासम्बद्धं प्रयागसम्राट्प्रतिनिधिपत्रं दत्तं शास्त्रिणा ।

यौवनपुरसामन्तो नरेन्द्रसिंहमहोदयोऽद्य महासभाया विद्याविभागाध्यक्षो जातः सेवानिवृत्तिमासिकमुद्राः प्रदातुमागताय विट्ठलशर्मणे वैदिकमध्यमायाः पत्रत्रयीं वैदिकशास्त्रिणश्चैकं पत्रं पुटकद्वारा काशीप्रेषणाय दत्तवान् द्रविडः ।

हिन्दूविश्वविद्यालयपरीक्षाध्यक्षप्रेषितमीमांसाछात्राश्वमेधिकनिबन्धस्याद्य त्रिंशत् पृष्ठानि दृष्टानि शास्त्रिणा । द्विषष्टिपर्यन्तं पृष्ठानि द्वितीयदिवसेऽस्याश्वमेधिकनिबन्धस्य । काशीं प्रति प्रेषितपुटकस्य परीक्षायाः प्रस्तावसममधिकारिदत्तं प्राप्तिपत्रं विट्ठलशर्मणा दत्तमनवधानेन कुत्रापि स्खलितमश्वमेधिकनिबन्धावसाने पत्रत्रयमेवावशिष्यते । द्राविडाक्षरज्ञानाभावेन श्यामसुन्दरप्रेषितपत्रं मदनाचार्यद्वारा परावर्तितम् । आश्वमेधिकनिबन्धं सर्वं समीक्ष्य साभिप्रायं प्राहिणोत् योग्यताङ्काश्च द्विशते सार्धशतं दत्ताः । मध्ये सुन्दरेण समायातेन बहुलं सम्भाषणं विहितं शास्त्रिणा । पर्यटनोत्तरं प्रदोषकाले समागतेन मदनाचार्येण सह बहुतरा संभाषाभवत् ।

काशीस्थकृष्णयजुर्वेदपाठशालायाः कृते स्वतन्त्रनिजभवनक्रयविचारार्थं माथुरराधामोहनलालन्यायाधीशोद्यानं गत्वा भवनक्रयविषये तेन सम्मन्त्र्य तत्कालमेव सार्धचतुर्दशशतकैः सह मनुगतानि चतुस्त्रिंशदधिकानि रूप्यकाणि

वितीर्य भवनक्रयार्थं पाठशालायाः सार्धषट्शतानि पञ्चदशभिर्दिनैर्दास्यामीति प्रतिश्रुतवान् स समाकर्ण्यतन्न्यायाधीशनियोगविषयञ्च शुभमस्तु सुहृद इत्याशंसमानो गृहमायातः शास्त्रिवरः।

विश्वविद्यालयीयसभ्यकार्यपत्रमलाभि शास्त्रिणा। पशुशालाप्रश्नोत्तरं श्रुत्वा विचिन्त्याधिकारनाशो यथा न भवेत्तथोत्तरपत्रनिर्माणं विधेयमिति लाडूराममुपदिश्य सूर्यवक्षं चोपादिशदेषः। पाठशालीयभवनक्रयविषयकचर्चायै मलसीसरसामन्तभूरसिंहारामं गतस्तस्येन्द्रप्रस्थगमनं निशम्य परावृत्तः कारागारद्वारे वर्णकास्तुतिक्रयाय गोविन्दनारायणमवतार्य स्यन्दनात् स्वसदनमाससाद। गोविन्दनारायणानीते क्रीते वर्णकास्तुती दृष्ट्वा काशीप्रेषणाय निवेशिते।

काशीं प्रस्थातुकामो द्रोणदीक्षितः स्वकाशीगमनवृत्तमाचचक्षे श्रुत्वेति शास्त्री चन्द्रशेखरशास्त्रिणे दातुं वर्णकास्तुती प्रददौ। तस्यान्नगरे निवासाय ज्वालानाथनाम्ना पत्रमपि व्यतारीत्।

रात्रावागतो ताह्मनकरो नवकृष्णरायवाङ्गो विद्यालयाध्यक्षो विश्वविद्यालयीयप्रबन्धसमितिमध्ये सदस्यतामलभतेत्याख्यातवान्।

भागिनेयस्य गोपीनाथस्य प्रयागविश्वविद्यालयीयप्रथमाब्दिकस्नातकोत्तरपरीक्षोत्तीर्णतामाकर्ण्य परमानन्दमलभत शास्त्रिवर्यः।

स्वशिष्यस्यायुष्मतः श्यामसुन्दरपुरोहितस्य प्रसवित्री गदग्रस्ता सार्धमासा सुवासिनी परलोकप्रस्थितेति विदित्वा लिखति शास्त्री "अहो तस्याः सौभाग्यम्"।

आङ्ग्लमहाविद्यालयीयार्थशास्त्रप्राध्यापकपदात् राजकीयसेवानिवृत्त्या सार्धमेव शिक्षाविभागाध्यक्षायत्तपरीक्षासञ्चालनकार्यात् पृथग्भूते विट्ठलवामनताह्मनकरमहाभागे संस्कृतविद्यालयनिरीक्षकपदनियुक्तवर-स्वप्रश्रयपात्रव्याकरणाचार्यमदनशर्मप्रशनवरं शिक्षाविभागाध्यक्षः परीक्षासञ्चालनसहयोगिनमकृतात्मनः श्यामसुन्दरमहाभागः। द्वयोरेवानयोर्गुरुत्वेन मान्यत्वाद्विशेषतः परीक्षासम्बन्धिकार्यजातं शास्त्रिपरामर्शेनैव व्यधीयतात एव कदाचन मदनाचार्यो नक्तमुपस्थाय पाठकाले परीक्षाप्रश्नपत्रं समर्प्य संशोधनाय सम्भाष्य चाव्रजत्।

व्यवहारनिर्वाहदृशा पुरोहितश्यामसुन्दरस्य मातृवियोगजन्यदुःखमार्जनाय गतो द्रविडमहाभागस्तदीयपित्रा गोपीनाथशर्मणापि संभाषणं कृत्वागतः।

द्विवेददुर्गाप्रसादशर्मणा महामहोपाध्यायेनाकारितस्तदावासे समुपस्थाय चिरायालप्य स्वावासमाजगाम।

जयपुरमहाराजसभासदस्यपण्डित - श्रीगोपीनाथशर्मपुरोहितानामारामे साक्षात्कृत्य तान् सम्भाष्य च तैः समायातो द्राविडशास्त्री यामावसाने।

पाठसमाप्तौ जातायामशीतिनां समागतो व्याकरणाचार्यो मदनलालशर्मा प्रश्नवरो गिरिजाप्रसादविषये सम्भाजितमेवाश्रावयत्। भगिनिपादैर्गोपीजन-वल्लभमन्दिरे श्रीमद्भागवतपारायणमकार्यत गणेशशास्त्रिणा।

कृष्णयजुर्वेदीयपाठशालाकार्यनिमित्तं काशीगमनमावश्यकं मन्वानोऽसौ शास्त्री सर्वमपि नित्यकर्म शारीरमपि निर्वर्त्य पूज्यश्रीमद्भगिनीपादानामशीर्वादं गृहीत्वा प्रस्थाय च माध्यन्दिने बाष्पयानकृतारोहो बान्दीकुईस्थाने वर्तकं दृष्ट्वा दुग्धं पीत्वा मदनमोहनेन सह चलित्वा भरतपुरे पुरुषोत्तमानुपस्थानेनाग्रास्थान-मेत्य ततो यानान्तरमारुह्य प्रतस्थे प्रयागाय। प्राप्तप्रयागो गोपीनाथमायुष्मन्तं द्रष्टुकामो न्यायविद्याछात्रावासं गत्वा श्रीगोपीनाथस्यातिथ्यमङ्गीचकार शास्त्रि-महाभागः। प्रयागस्थानस्थं मथुराशालिदगन्तृयानमारुह्य काशीमवाप्य श्रीगंगास्नानं माध्याह्निकं कर्म चानुष्ठितवान्। ततो मईमासान्तं पाठशालीयाय-व्ययलेखं समापितवान्। मध्याह्नात् परतो वेङ्कटेशास्त्रिणमाहूय सम्भाष्य चाङ्ग्ल-भाषायां लेखितुमायव्ययपुस्तकं तस्याधीनीकृतवानेष। स्वोभाविपण्डितसभो-पस्थानाह्वानपत्रं विषयाध्यक्षस्य प्राप्तवानयं द्राविडशास्त्री। काशीविश्व-विद्यालयपरीक्षाध्यक्षपत्रं चतुर्दश्यां रविवासरे वेदाचार्यपरीक्षाग्रहणाय लब्ध्वो-पस्थातुं न शक्यतेऽस्मिन् वासरे लिखित्वोत्तरपत्रं छात्रस्य गणपतिशर्मणो हस्ते वितीर्य प्राहिणोत्।

नित्यकर्मोत्तरं दिसम्बरमासादारभ्य मार्चमासान्तं यावदुपस्थित्यादि छात्राणां गणयित्वा विन्यस्तवान् पुस्तके तुरीययाममध्ये वेङ्कटेशेन लेखितं समितिकार्यम्। वेदश्रौतविषयकवाचिकपरीक्षानयनाय महामहोपाध्यायप्रभुदत्त-वेदाचार्येण सार्धं विश्वविद्यालयमुपगम्य छात्रपरीक्षामादाय पञ्चसप्ततिर्योग्य-

ताङ्काः दत्तास्ततः परावृत्य रामः पाठकोऽर्थसंग्रहं धर्माधिकारी कौमुदीं नरहरिमुक्तावलीं पाठिताः शास्त्रिणा ।

काश्मीरवास्तव्यः काशीवासपण्डितः समागम्य द्वौ नारङ्गकौ चत्वारि कदलीफलानि परिचयप्रदानेन सहोपायनीकृत्य संलापानन्तरमयासीत् । ब्रह्मचारी कश्चन समेत्य योगप्रश्नान् पृष्टवान् यथामति शास्त्रिवर्यं उपादिक्षत् । पण्डितराधाप्रसादशर्मणा पत्रं सम्प्रेष्य सूचितो द्राविडशास्त्री यद्द्विवासरे मयि समायाते विश्वविद्यालयीपरीक्षाग्रहणाय प्रवर्तितव्यं भवता ।

श्रीरेश्वरकृष्णयजुर्वेदपाठशालाया गतमासव्ययवृत्तिदानाय रूपकाणि पञ्चसप्ततिश्चन्द्रशेखरशास्त्रिणे समर्पितानि शास्त्रिमहाभागेन । शास्त्रिणा प्रतिहायनं चौखम्बा संस्कृत सीरीजतः क्रीयमाणपुस्तकेषु पूर्वावशिष्टानि नवपुस्तकानि कानिचिदन्यान्यपि प्रत्नवर्षपुस्तकानि लब्धानि । आगामिदिवसे जयपुरगमननिश्चये जाते वस्तूनामत्रत्यानां पुस्तकानाञ्च यथारक्षं सन्निवेशोऽक्रियत । दिनतुरीययामे पूर्वनिश्चयानुसारं शास्त्रिमहोदयः मध्यमश्रेणियानमधिरुह्य सिकरौलस्थाने मनमोहनलालमाथुरं जयपुरन्यायाधीशराधामोहनलालमाथुरभ्रातरं साक्षात्कृत्य प्रयागमार्गेणाग्रास्थाने निशीथात् परतः प्रत्यूषे यानादवतीर्णो जयपुरे ।

परीक्षाध्यक्षायत्तपरीक्षासञ्चालनकार्यसहयोगप्रदायिप्रश्नवरमदनलालशास्त्री विभावर्यां जयपुरसंस्कृतपदवीपरीक्षापरिणामप्रदर्शनाय समुपस्थितः । परीक्षापरिणामं दर्शयित्वा प्रहरान्ते गतवानाचार्ये शास्त्रिणि च न समीचीनं परीक्षाफलम् ।

श्रीकल्याणसिंहवर्मा खाचरियावाससामन्तः प्रभाते समागत्यास्मदायादानां कलहं व्यवहारञ्च शास्त्रिणे प्रोवाच । महामहोपाध्यायदुर्गाप्रसादसविधे सभाष्यं तैत्तिरीयसंहितासप्तमकाण्डमैतरेयारण्यकञ्च महाव्रतीयमागमपुंश्चलीसंवादप्रकरणमवलोकयितुं तदभ्यर्थितं चन्द्रशेखरहस्तेन प्रैषयत् । प्रश्नवरश्चन्द्रशेखरव्याकरणाचार्यः पुस्तकद्वयीं दर्शयित्वा परावर्त्याग्निहोत्रप्रकरणं पृष्ट्वार्धरात्रारम्भे जगाम ।

शिक्षाविभागाध्यक्षः श्यामसुन्दरशर्मा पुरोहितः समायातो विविधविषयकं सम्भाषणं कृत्वाव्राजीत्, प्रचलतख्रिष्टाब्दस्य षष्ठमाससप्तदशतारिकायां महा-

महोपाध्यायपण्डितदुर्गाप्रसादस्य ज्योतिषोपाध्यापकपदे दुर्गादत्तस्य च प्रधानाध्यापकपदे विनियोगः संजातः। इति श्रुत्वा प्रसन्नोऽयम् ।

महामहोपाध्यायः शिवदत्तशर्मा स्वरचितसरलकौमुदीभागद्वयमुपहारीकृतवान् द्राविडशास्त्रिणे । खाचरियावासासामन्तः श्रीकल्याणसिंहवर्मा स्वसेवकेन सह काशीस्थवीरेश्वरकृष्णयजुर्वेदपाठशालीयभवनक्रयार्थं क्रियमाणधनसंग्रहे सार्धशतं रूप्यकाणि प्राहिणोत् । प्रश्नवरमदनाचार्यः साम्राज्याधिकारिणा पण्डितगोपीनाथपुरोहिताय Sir सूर्यनारायणबागड़ाय च रायबहादुर इति दत्ते पदे लब्धे प्रोवाचेत्थम् – "साधु" । गुजरमलहस्तेन शास्त्रिणा गोपीनाथपुरोहितपण्डिताभ्यर्णं सभाजनपत्रं प्रेषितम् ।

सभ्रातृको महामोपाध्यायशिवदत्तशर्मा समेत्य स्त्रीविषयकं लेखं वितीर्यागमत् । शिक्षाविभागाध्यक्षः श्यामसुन्दरशर्मा पुरोहितः सदस्यपदवीनिमित्तमभाषत । श्रीमदमात्यपुरोहितगोपीनाथशर्मसविधे सम्प्रेषिताभिनन्दनप्रत्युत्तरपत्रमविविन्नं शास्त्रिणा ।

चातुर्मास्यारम्भमुपलक्ष्य पुराणवाचनमुपक्रमितव्यमिति सञ्चिन्त्याध्यात्मरामायणस्य वाचिताः पञ्च सर्गाः बदरीनाथशास्त्रिश्यालेन साकं पुस्तकान्यादाय वितीर्य च लक्ष्मणपुराभियानायाप्राक्षीच्छास्त्रियामायां यामान्ते ।

साहित्यवेदान्ताचार्यो बिहारीलालशर्मा समायातस्तेन सार्धं वार्तालापः समभवद् द्रविडशास्त्रिणः। समाहूतौ मदनाचार्यो रूडमलश्च समागतौ। पारणोत्तरमुपस्थितो विट्ठलवामनताम्ह्नकरमहोदयः पाठशालीयविद्यामन्दिरैक्यं नवकृष्णबाड्गाधिकारे गमनञ्चोभयोर्न्यवेदयत् । मदनाचार्यप्रश्नवरेण चिरं संभाषमाणः शास्त्री समाकर्ण्य चैतदतुदत्, अनुशायितवानेवमसमीक्ष्यकारिणः श्यामसुन्दरस्य कृत्यस्यायं भोगः ।

नित्यादि सर्वं कृत्यं समाप्योत्सर्जनाकरणप्रायश्चित्तं कृच्छ्रमुत्सृज्यकामोऽकार्षीन्मन्त्रमिमं जपित्वा मध्याह्ने स्नानमाधायोपवीतादि परिधाय सन्तर्प्यर्षीनुपाकर्माकरणप्रत्यवायं कृच्छ्रं कृत्वा रक्षाबन्धनोत्तरं सर्वेभ्योऽपि दक्षिणाः प्रदत्ताः शास्त्रिमहाभागेन ।

अधोगृहे सर्पः प्रविष्ट इति श्रुत्वा परिशोधने कृते न किमप्यवलोक्य लिखति "भवतु सर्वेषामेव गृहं खलु"।

श्रीहीरालालशास्त्रिणा प्राहीयत सन्देशः केनापि पुरुषेण यन्नाद्यतनोऽवकाश इति। प्रवर्तमानेशवीयाब्दस्य नवममासनवमतारिकायामशृणोद् द्राविडमहाभागो यदत्र संस्कृतपाठशालायां गिरिजाप्रसादो ज्योतिषाचार्योऽध्यापिपदिति साधु।

श्रीहीरालालशास्त्रिणाभ्यर्थितः शास्त्रिमहोदयस्तृचाकल्पोक्तं सूर्यनमस्कारप्रयोगपुस्तकप्रतिरूपकं विधाय पत्रद्वारा तदन्तिके प्रेषितवान्।

महामहोपाध्यायश्रीगिरधरशर्मा व्याकरणाचार्यः संस्कृतपाठशालाध्यक्षस्तत्सविधवर्तिमहाराष्ट्रमण्डलगणेशमन्दिरोत्सवे धर्मशब्दार्थविषयं विभागं चोद्दिश्य व्याख्यानमदात्। विद्याविभागविचारसदस्याध्यक्षस्य प्राप्ते पत्रे सूचनैषं यत् प्रश्नानामुत्तरं पृष्टानां वर्तमानख्रिष्टाब्दनवममासत्रयोविंशतितारकापर्यन्तमपेक्षितमिति।

जयपुरशिक्षाविभागाध्यक्षः श्यामसुन्दरशर्मा चिररात्राय तिष्ठन् विधाय वार्तालापं गतवान्।

काशीस्थराजकीयकालेजपरीक्षाध्यक्षस्य कविराजस्यान्तिकं प्रेषितानि प्रश्नपत्राणि पुटके सन्निवेश्य लाक्षया मुद्रयित्वा प्रतिज्ञापत्रेण साकम्।

जयपुरोच्चन्यायालयीयप्रधानन्यायाधीशस्तदीयसेवकेन प्रतारितः शीतलाप्रसादो वाजपेयी।

श्रीशानचन्द्रशर्मणां सदनं रक्षापुरुषाणां शतमरुणदिति श्रुतं शास्त्रिणा। आगामिदिवसभाविन्यां संस्कृतपाठशालासभायामागमनामन्त्रणमवाप्तं शिक्षाविभागाध्यक्षस्य परं कस्यामपि सभायां न गच्छामीति नात्रापि गमिष्यामीति निश्चयः। प्रश्नवरो मदनाचार्यो यात्रावृत्तं कथयित्वा संस्कृतपाठशालीयोत्सववृत्तञ्च निवेद्य विलम्बेनैव नक्रमयात्। गोविन्दगोपीनाथाभ्यां सम्भाषणप्रसङ्गे पाठशालीयोपायनोत्सवे श्री १०८ महाराजो मानसिंहश्चातुर्येणादस्य एव सदः प्राविशदिति समाकर्णितवानेष शास्त्री।

भावनहरिनारायणः प्रधानाध्यापकः समायातश्चिराय श्यामसुन्दर-पुरोहितमुद्दिश्य सम्भाषणमकार्षीत् । मदनाचार्यप्रश्नवरः सम्भाषितः शास्त्रिणा-नङ्गीकृतं च प्राश्निकत्वम् । जयपुरशिक्षाविभागाध्यक्षपदमधिरूढः श्यामसुन्दर-पुरोहितः समुपस्थितः संस्कृतविद्यालयपाठ्यक्रमसमितिं नेतुं शास्त्रिणं परं कारणन्निर्दिश्य प्रेषितवांस्तं शास्त्री ततो मदनाचार्यमपि ।

शास्त्रिदर्शनार्थमागतेन ओकमहाभागेन सार्धमुपगतो लाह्मनकरोऽवोचदयं महोदय आङ्ग्लाचार्यपदवीमलभतेति श्रुत्वा शास्त्रिवर्यो मधुरमर्पितवानकथय-च्चायमोको हि तत्त्वज्ञाने आङ्ग्लदर्शनशास्त्रे आङ्ग्लभाषायाञ्च–'मास्टर आफ आर्ट' इति पदवीमारूढ इति विद्वत्तमो जयपुरे । एकदा गोविन्ददर्शनार्थ-मुपयातः शास्त्री दूरत ओझाचन्द्रदत्तं संकेतेनैव सम्भाष्य गोविंदमन्दिरे रुष्टे-र्जनैरालप्य समायातः । काशीविश्वविद्यालयपरीक्षकत्वपत्रमवाप्योत्तरं सम्प्रेष्य व्यश्रमत् ।

मदनाचार्यप्रश्नवरो मध्याह्नकालादनन्तरमागतः संस्कृतपाठशाला-नियमावलीवाचनं कृतवान् प्रदर्शितदोषाणां टिप्पणीं च । ह्यस्तन एव समये समुपस्थितो मदनाचार्यो योग्यताङ्कपरिवर्तनदर्शनार्थम् ।

समाहूय मदनाचार्यमन्यस्मिन्नहनि श्यामसुन्दरशर्माणं दिदृक्षे इति कथनाय प्रबोध्य विसृष्टवान् द्राविडः । स्नानानन्तरमुपस्थितो मदनाचार्योऽपि परीक्ष्य प्रश्नान् द्रष्टुं शिक्षाविभागाध्यक्षप्रार्थनामनूद्य तदङ्गीकारानन्तरं गतवान् । श्यामसुन्दरप्रेषितं जन्मपत्रपुटकमवाप शास्त्री । सम्यगालोच्य कथयिष्यामिति चोक्तवान् । द्रक्ष्यमाणप्रश्नपत्राणां पुटकमानीय निशि मदनाचार्यमहोदयो वीरेश्वरशास्त्रिसविधे न्यस्तवान् ।

मदनाचार्यप्रश्नवरेण सह शास्त्रिणा सन्दिष्टः शिक्षाविभागाध्यक्षो यत फतेहपुरगमनाय प्रार्थितोऽपि शास्त्री शीतेन गमनमशक्यं मामकीनमिति निषिषेध । काशीविश्वविद्यालयीयदीक्षान्तसमारोहामन्त्रणपत्रं लब्धं शास्त्रिणा प्रतिष्ठापत्र-दानोत्सवे सम्मिलितुम् ।

शिक्षाविभागाध्यक्षः श्यामसुन्दरशर्मा निषिद्धोऽपि फतेहपुरं नेतुं समागतो मध्यन्दिनै परं शीतकाल इति कथयित्वा फाल्गुने मासि गमनं स्वीकृत्य विसृष्टः

स। मदनाचार्यो रात्राववशिष्टैकपत्रदानाय समायातः। जयपुरीयसंस्कृतपरीक्षाप्रश्नपत्राणामवलोकनं कृतवान् शास्त्री। श्यामसुन्दरपुरोहितस्य स्वान्तेवासिनः कृते तत्प्रार्थनया तृचाकल्पोक्तसूर्यनमस्कारप्रकरणं लिखितं शास्त्रिणा।

उपरितनदैनन्दिनीलेखनिकरेण प्रतीयते यत् षट्षष्टिवयस्कस्यापि शास्त्रिणः कीदृशी कार्यकरणशक्तिरमूल्यसमयस्योपयोगिता परोपकारपरायणता यातायातस्फूर्तिस्तत्रापि विविधविषयाणां स्मृतिः परीक्षाया औचित्यमन्यत् किं जयपुरीयसंस्कृतपरीक्षाणामनौपचारिकतया सर्वथा संचालनमित्यादयो गुणा वेविद्यन्ते स्म।

1927 वर्षे उन्मोचितसेवावृत्तिः श्यामसुन्दरशर्मा पुरोहितोऽर्गलपुरविश्वविद्यालये सिद्धिनयननिधिभूमिते( 1928 )शकीयवर्षे परीक्षासंचालकपदमध्यासितस्तत्रत्यैरधिकारिभिः। पुनरपि समये समागत्य द्रविडशास्त्रिभिः शास्त्रचर्चां स्वसन्देहशङ्कासमाधानपूर्वकमकार्षीत्। प्रयातेऽर्गलपुरमेतस्मिन् महोदये श्रीपन्नालालमाथुरमहानुभावो जयपुरराजकीयशिक्षाविभागाध्यक्षपदमध्यारोपितः। महाभागेन न किञ्चित् परिवर्त्तनं परिवर्धनमाचरितं विद्यालयमहाविद्यालयेषु।

वस्वब्धिनिधिचन्द्रमितेशवीयहायनै ( 1928 ) पितृपादानुग्रहलब्धशास्त्रीपदवीकोऽदसीयपङ्क्तिलेखकोऽयं जन्तुरप्राधान्येन शब्दानुशासनमधिजिगांसुः सुपक्वेन्द्रवारुणीसंकाशान्तःकरणैर्व्याकरणशास्त्रवेदिभिरनङ्गीकृतेदमीयाध्यापनकार्यैर्निराशीकृतोऽनन्यगतिकतया तातचरणप्रचोदितो द्रविडशास्त्रिचरणाभ्यासमापेदे।

कतिचिद्दिनानि सुपरीक्ष्य ससमयमध्ययनार्थमागन्तुमादिशच्छास्त्रिवर्यः। समयश्चैवंविधो मध्याह्ने द्वादशवादनवेलायां नियमेनोपस्थातव्यं जाते जातु पञ्चकलाविलम्बेऽपि नियतमनध्यायो भावी। उररीकृतसकलसमयानुपालनः प्रतिवारं निदाघकाले निर्दिष्टानेहसि वाराणसेयमध्यमपरीक्षाद्वितीयखण्डनियतसिद्धान्तकौमुदीपाठ्यांशाध्ययनाय शास्त्रिपादानुपासि। विगते किञ्चित् काले समजनि जनोऽयं शास्त्रिप्रसादभाजनम्। वाराणसेयपरीक्षोत्तरपुस्तकपरीक्षणकाले समाहूयोत्तरपुस्तकपरीक्षणप्रकारेणावगतीकृतवानिमम्। एवमन्येष्वपि गोपनीयकार्येषु सत्सु समादिशच्छास्त्रिवर्यस्तत्-तत-सम्पादनाय।

वैदिकसूर्यनारायणमुकुन्दवासुदेवप्रभृतयोऽन्येऽपि बहवोऽध्ययनाय समागंसत । स्नातककक्षाध्यायिनस्तदुत्तरकक्षाध्यायिनो वैद्यश्यामलालारनजयुगलकिशोरादयो राजकीयसेवासक्तो ब्रह्मभट्टसूर्यनारायणोऽपि ।

शिवप्रतापशर्मा वेदाचार्यो निरुक्तमध्येतुमायात् । शास्त्रिवर्यस्य नवनेत्राङ्कोर्विमित ख्रिष्टाब्दस्य ( 1929 ) दैनन्दिनकार्यकलापोल्लेखः ।

कदाचनैतदीयान्तेवासी श्रीश्यामसुन्दरशर्मा पुरोहितस्तुरीययामेऽह्नः समेत्य काशीहिन्दूविश्वविद्यालयीयधार्मिकपाठालयाध्यक्षपदमुररीकर्तुं न्निर्बबन्ध । परं ज्येष्ठस्वसृचरणसेवारतत्वान्न शक्यमेतदुत्तरप्रेषणं वरमिति निश्चिकाय । तृतीयदिवसे श्यामसुन्दरपुरोहितश्चांसलकरं समादाय समायातश्चांसलकरस्य संवादः शास्त्रिणाविद्यत ।

प्रतिषेधात्मकोत्तरप्रेषणनिश्चयानन्तरमपि श्यामसुन्दरमहोदयसम्मत्या विश्वविद्यालयीयधर्मविभागाध्यक्षकार्यकरणे भगिनिसेवाया अवश्यकर्तव्यतामात्मपरमकर्तव्यमभिजानतात्मवार्धकेन चाशक्त इति सकारणं निषिषेध ।

झालरापाटनराजगुरुर्नवरत्नगिरिधरपण्डितः श्यामसुन्दरप्रश्नवरेण सह पुत्रदुहित्रोर्विवाहे श्वोभाविनि निमन्त्रयितुमागमत् ।

पण्डितसूर्यनारायणेन साकं सायमागतस्य श्यामसुन्दरपुरोहितस्य चातुर्वेण रामकृष्णचातुर्वेदसहोदरस्य स्वर्गीयविजयचन्द्रवैदिकस्य भार्यामुद्दिश्य प्रतिज्ञापत्रलेखो रामकृष्णस्य कृते सम्पन्नः । लेखोऽयं द्रविडशास्त्रिसविधे साक्ष्यार्थमानीतः साक्षित्वस्वीकृतिसूचकहस्ताक्षरैरलङ्कृतः शास्त्रिणा ।

आङ्ग्लप्रभावादर्थोपार्जनमेव संसारसर्वस्वं मन्यमानाः प्रारम्भत एवाङ्ग्लभाषाध्ययननिरताः संस्कृताध्ययनपराङ्मुखा राजकीयसेवानिवृत्तावन्तिमवयोयापनार्थं वैराग्यमेव शिश्रयिषवोऽनुशयवन्तो वेदान्तविषयमध्येतुं शास्त्रिवर्यं समाश्रयन् । शास्त्रिमहाभागश्च तदीयसंस्कृताध्ययनोत्साहं समेधयन् प्रारम्भिकज्ञानाय बख्शीसिंहहिम्मतलालदवेमहोदयादीन् परिभाषाप्रभृतिग्रन्थानध्यापयत् सरलेन पथा ।

लक्ष्मणशास्त्रीद्रविडप्रहितो गोपीनाथधर्माधिकारी मुद्रितपत्रे आदाय वैवाहिकनियमप्रतिबन्धार्थं हस्ताक्षराणि कारयित्वा सम्राट्प्रतिनिधिसभायां

प्रेषयितुं समायातः । राजकीयनियमातिक्रमणानौचित्यमिति प्रत्याख्यातवान् द्राविडमहोदयः । गुरुपूर्णिमापर्वणि वासुदेवजगदीशसभ्रातृकनन्दकिशोर-रामकृष्णगोविन्दव्रजमोहनशर्माणो गुरुपूजननिमित्तमायाताः परं शास्त्रिमहोदयः समायातानेतान् सर्वान् स्वगुरुचरणानां रानडे इत्युपाह्वबालशास्त्रिणां छाया-चित्रार्चनाय समादिदेश । महति निर्बन्धे कृते तदनन्तरं स्वकीयपूजां कारयामास दक्षिणादिकं च नाददे ।

जयपुरराजकीयमहाराजकालेजाङ्ग्लभाषाप्रधानाध्यापको दत्तमहोदयो भवदीयवैदुष्यमात्मप्रश्नसमाधानपरमाकर्ण्य संप्राप्य च शास्त्रिवरान् धर्मदर्शन-विषयिणीं चर्चामचर्करीच्चिराय सन्तुष्टमानसः पुनरागमनसमयं पृष्ट्वागतः । नक्तं सिद्धान्तकौमुदी-वैदिकप्रक्रिया-पाठः समजनि ।

जयपुरसंस्कृतविभागीयपरीक्षासञ्चालको जगतीप्रसादभार्गवोऽदसीयान्ते-वासी जयपुरसंस्कृतपरीक्षापरीक्षकाणामिदमीयपरामर्शमन्तरेण न नियमनम-कार्षीत् । दत्तमहाशयो जातुचिदागत्याध्यासवादस्वरूपं "जन्माद्यस्य यतः" इति ब्रह्मसूत्राद्यसूत्रार्थं पृष्टवान् प्रश्नोत्तर-प्रदानेन सन्तोष्य च प्रेषयामास तम् । काशीहिन्दूविश्वविद्यालयीयनिमन्त्रणपत्रं जायमानसभायामुपस्थातुमलभत शास्त्रिवर्यः ।

लब्धावसरो दत्तमहाशयः समेत्य प्रतिपत्तिविधिमुद्दिश्य पृष्टवांस्तस्मिन्नेव प्रसङ्गे विशिष्टाद्वैतस्वरूपमानुषङ्गिकतया प्राप्तमपि सम्यक् प्रबोधयामास । साङ्ख्यमतखण्डनसंवादो दत्तमहाशयेन सार्धमवृतत । जिज्ञासितस्य वेदान्तदर्शन-सूत्रत्रयस्यार्थं सम्यग्विविच्यावेदयद्दत्तमहाशयं पुनश्चैकदानन्दाधिकरणविषयिणी जिज्ञासा समुचितोत्तरेण दत्तमहोदयस्य शान्तिंनीता शास्त्रिणा ।

गोपीनाथधर्माधिकारिमहोदयो मुक्तावलीशब्दार्थप्रवचनेन सम्यग-वगतीकृतः ।

उपाध्यायशास्त्र्याचार्यपरीक्षासामान्यपत्रपरीक्षकश्च शास्त्रिमहोदय एव प्रायशोऽवर्तत । प्रश्नपत्रसंशोधनकार्यमेतदायत्तमेवाभवत् । परीक्षाफलमपि भव-दीयपरामर्शानन्तरमेव प्रकाश्यते स्म । छात्राश्च योग्यतापन्ना एव सफलताश्रिया-लिङ्गिताः ।

महामहोपाध्यायपदभाग्गिरिधरशर्मा पण्डितो निबन्धविषयकं संवादं कर्तु-मागतः संस्कृतकालेजाध्यक्षः।

वाराणसेयगवर्नमेन्टसंस्कृतकालेजाप्तवेदान्ताद्वैतसिद्धिप्रश्नोत्तरपुस्तकद्वयं समीक्ष्य योग्यताङ्कदानम्। मध्याह्ने च हिन्दूविश्वविद्यालयपरीक्षासञ्चालक-प्रेषितस्य विशिष्टाद्वैततृतीयप्रश्नपत्रनिर्माणाय पत्रस्याप्तिः।

जयपुरराज्यज्योतिर्विन्नारायणशास्त्रिण आगमनम्। ततश्च श्रीमत्या राजदेव्यारोग्यहेतोर्देवाराधनं कर्तुं पृष्टवान्, रविवासर आगत्य प्रष्टव्यमित्युक्तं शास्त्रिणा।

व्याकरणाचार्यो मदनलालशर्मा प्रश्नयत एतदीयशिष्यो लक्ष्मणपुरविश्व-विद्यालयाध्यापकस्थाने मया गन्तव्यन्न वेति पृष्टवांस्तदा शास्त्रिमहोदयोऽब्रवीन्ना-स्ति विशेषलाभस्तर्हि किमर्थं गमनं पुनरपि यथेच्छसि तथा कुरु इत्युक्तवान्। रात्रौ जगदीशजयचन्द्रशिवप्रतापाः समायातास्तेषु शिवप्रतापस्य निरुक्तपाठोऽ-जायत।

जगतीप्रसादो जयपुरीयसंस्कृकालेजपरीक्षासञ्चालको भवते निवेदयामास जैनदर्शनप्रश्नपत्राणां प्रथमद्वितीयानां पञ्चमस्य तृतीयांशभागस्य च निर्माणं कर्तुम्। भवता प्रेषितेषु पुस्तकेषु कार्यमिदं कर्तुं शक्नोमि नान्यथा।

चतुर्थमासस्याङ्ग्लस्यैकादशतारिकायां परीक्षासञ्चालकेन भार्गवेण प्रेषि-तानां सर्वेषां प्रश्नपत्राणां परीक्षणं विधाय विरुद्धस्यैकस्य पत्रसमीकरणं कृत्वा समागताय जगतीप्रसादाय प्रत्यर्पणम्।

वाराणसेयहिन्दूविश्वविद्यालयीयमौखिकपरीक्षार्थं जयपुरतः प्रस्थाय वारा-णसीप्रापणम्। प्रचलतः खिष्टवर्षस्य चतुर्थमासपञ्चविंशतितारिकायां प्राभा-तिकमनु विद्याधरवाणेकराभ्यां सार्धं विश्वविद्यालयमवाप्य मौखिकपरीक्षातो निर्वृत्य प्राच्यविभागाध्यक्षं ध्रुवोपाह्वं दृष्टवान् शास्त्री।

(१९३२) द्वात्रिंशदुत्तरैकोनविंशतिशततमखिष्टवर्षदैनन्दिन्याधारेण कार्यकलापोल्लेखः—

श्यामसुन्दरशर्मपुरोधोवर्यः स्वसुहृदायुर्वेदविभागाध्यक्षश्रीलक्ष्मीरामस्वामिनिर्बन्धेन शास्त्रिवर्यं साक्षात्कृत्यायुर्वेदीयपरीक्षाविषयकवार्तालापं कर्तुं पूर्वं समयं निर्णीय तदनुसारं स्वामिलक्ष्मीरामेण सह शास्त्रिवर्यसेवायामुपस्थितः। ततश्च लक्ष्मीरामेण साधुना पुरोहितश्यामसुन्दरेण सार्धमायुर्वेदीयपरीक्षासम्बन्धेन सम्भाषणादिकं वृत्तम्।

अस्मिन्नेव दिने मुम्बापुरीतोऽश्वत्थामाचार्यप्रेषितराजनिवेदितपुटकं यस्मिन् दशरूपकस्य काव्यप्रकाशप्रथमखण्डस्य पुस्तके पत्रं चैकमवर्तन्त प्राप्तानि। द्विसप्ततिवर्षवयस्कस्यापि पुस्तकसङ्ग्रहः कियानीप्सितः। जयपुरीयसंस्कृतपरीक्षाध्यक्षो भार्गवः संशोधनाय प्रश्नपत्रपुटकानि वितीर्णवान्। वैद्यलक्ष्मीरामस्वामिना श्यामसुन्दरपुरोहितेन सूचितविषयं पत्रसहितं प्रदाय भार्गवाय विसृष्टः स शास्त्रिणा नक्तं ब्रह्मभट्टसूर्यनारायणसकाशाद्वैद्यराजश्यामलालस्यामयाधिक्यमाकर्णितवान्। परीक्षाध्यक्षप्रत्तप्रश्नपत्राणि संशोध्य स्थापितवान्।

वाराणसेयनारायणशास्त्रिखिस्तेपत्रावगतवृत्तान्तस्तत्रत्यजैनदर्शनविदुषां त्रयाणां नामनिर्देशपत्रं जयपुरपरीक्षाध्यक्षभार्गवजगतीप्रसादस्यान्तिके संछादनपुटके संस्थाप्य विश्वस्तान्तेवासिजगदीशाचार्यहस्तेन प्रैषयत्।

महाराजकालेजविद्यामन्दिरप्राङ्गणे भूतपूर्वशिक्षाविभागाध्यक्षपन्नालालमाथुरस्याध्यापकवर्गेणाभिनन्दनायोजनमक्रियत। तत्र च पानं भोजनं प्रतिच्छायाचित्रग्रहणमपि जातम्।

श्रीगणेशनारायणसोमानीमहोदयेनान्तेवासिचरेण याचितस्य मिताक्षरापुस्तकस्य प्रेषणं जगदीशद्वारा दर्शयितुम्। काशीतो रामचन्द्रशर्मणानीतपत्रं गृहगृहमूलस्थापनादिवृत्तयोरभ्यन्तरे चन्द्रशेखरगणेशदासयोः पत्राणि समालोक्य शास्त्री निश्चिन्ततां जगाहे। गृहविक्रयादिवार्तयात्मीयावोकवामनमहोदयौ शास्त्रिणा परिचितीकृतौ।

परीक्षाध्यक्षो भार्गवो मध्याह्ने समेत्य कानिचित् परीक्षापत्राणि निर्मातुमनुरुरोध द्राविडम्। नित्यकर्मावसानानन्तरं भार्गवसद्म समासाद्य न्यायशास्त्रद्वितीयपत्रविषये परीक्षाध्यक्षं प्रबोधितवान्। स्वीकृतपरीक्षाध्यक्षानुरोधः शास्त्रि-

वर्यः साहित्याचार्यशास्त्रिणोर्द्वे पत्रे प्रेषितवान् । द्वितीयपत्रे जैनदर्शनशास्त्रिचतुर्थपत्रं निर्माय्याध्यक्षसविधे प्राहिणोद् द्रविडमहानुभावः ।

जयपुरराजकीयसंस्कृतपाठशालायां दीक्षान्तसमारोहस्तत्र शास्त्र्याचार्यपरीक्षोत्तीर्णेभ्यः पदवीपत्रसौवर्णराजतपदकप्रदानम् । जगदीशाचार्यस्य सौवर्णलाभः प्राथम्यादुत्तीर्णेषु सर्वाधिकयोग्यताङ्कहेतोः, प्रधानवक्तृताविषये निन्दाश्रुतिः शास्त्रिणः । दक्षिणावर्तशङ्खं परीक्षयितुं ज्योतिर्वित्सन्तुलालशर्मणा समं कोडीवालबिहारीलालपुत्रः श्रेष्ठी समायातः । हलदियावटङ्कनरसिंहप्रसादगृहादुपहारवस्तूनि प्राप्तानि तेषां वितरणं शास्त्रिणा कृतम् । नरसिंहप्रसादाय स्नातककक्षाध्यायिनेऽभ्यासाय परीक्षार्थं शाकुन्तलपुस्तकं दत्तम् ।

जयपुरसंस्कृतपरीक्षाप्रश्नपत्राणामध्यक्षप्रत्तानां संशोधनाय समागताय तस्मै संशोध्य प्रत्यर्पणम् । काश्मीरकः किचलूपाङ्खः कैलाशनाथः शिक्षाविभागाध्यक्षपदे नियुक्तः । पूर्वाह्णोपक्रमे जगतीप्रसादपण्डितेन सह काश्मीरकपण्डितस्य विद्याधिकारिणः परिचयाय गमनम् मिथो भाषणादिपरितुष्टस्य शास्त्रिणः स्वस्थानप्रत्यावृत्तिः । श्यामसुन्दरशर्मा पुरोहितोऽङ्गीकृतकार्यं निष्ठया सम्पादयन्नवशिष्टसमये विद्याव्यासङ्गवता रामानुजसम्प्रदायदीक्षिततया च साम्प्रदायिकग्रन्थान् प्रायशः पठितवान् । एतदुपक्रम एव शास्त्रिवर्यानुग्रहभाजनतयास्मादेव पुस्तकान्यावश्यकानि पठितुमगृह्णात् । शास्त्रिवर्यस्तदभिलषितसिद्धित्रयपुस्तकं श्रीमदोकमहोदयस्य गृहे गत्वाग्रवन( आगरा )स्थाय श्यामाय प्रदेयमिति दत्वा प्रयागच्छत् ।

संप्राप्तलिखितोत्तरपुस्तकानि समीक्ष्य योग्यताङ्कांश्च परिणामपत्रे लिखित्वाऽद्य विशल्यापणैः प्रत्यावर्तितानि ।

विद्याविभागाध्यक्षस्य प्रायाणिकसत्कारस्य कृते शनिवासरे क्रियमाणसत्कारसमारोह उपस्थितिमपेक्षमाणानामाह्वानपत्रं समायातम् । मनोरमाशब्दरत्नयोर्जगदीशस्य ब्रह्मभट्टयुगलयोश्च काव्यप्रकाशनवमोल्लासस्य च प्रारम्भः । प्रधानविद्याधिकारिणः कैलाशनाथपण्डितस्य प्रायाणिकसत्कारसमारोहसम्मिलितानां संस्कृतविद्यामन्दिराध्यापकानामुपानद्गूढपादानां भोजनेन नरेन्द्रेण तिरस्कारः, त्रिपुष्करपदार्थं सम्यग् बोधयित्वा दुर्गादत्ताचार्यं प्राहिणोत् ।

राजगृहे वसन्तोत्सव इति मुख्यराजगृहद्वाराच्छ्रीदेहलीतो राजमार्गे हास्तिकयात्रा, पिष्टातकवर्णितसलिलप्रक्षेपादिपूर्वकं श्रीमहाराजस्य माण्डलिकैर्गुरुभिरमात्यैः सह। वसन्तोत्सवोऽयमद्योनपञ्चाशद्वर्षानन्तरमभूत्। सायन्तने समये सामात्यस्य स्वशिष्यखाचरियावासग्रामाधीशस्य कल्याणसिंहवर्मण आगमनम्। वधूवरयोः कुण्डल्योः मेलापकमवलोक्य सम्भाषणम्। वाराणसीवासकालसम्पादितस्य त्रिपरिच्छेदात्मकसरस्वतीकण्ठाभरणस्य द्वे पुस्तके महाभाष्यनवाह्निकस्यैकं शेखरश्चैश्वर्या विषम्याश्चैकैकं दत्तं जगदीशाय। जयपुरराज्यशिक्षामन्त्रिपदकार्यधुरं बिभ्राणो यौवनपुराधिपतिः शास्त्रिणमाहूय ज्वराक्रान्तोऽपि सम्भाषणं कृत्वा सत्कृतवान् श्रीनरेन्द्रसिंहवर्मा। संस्कृतपरीक्षाकेन्द्रस्थानगतनिरीक्षकाणां नीतिरीतिप्रकारं प्रतिबोधितो जगतीप्रसादः शास्त्रिणा। परीक्षास्थानेऽद्य प्रतिषिद्धप्रवेशश्चातुर्वेदः संस्कृतकालेजाध्यक्षो गिरिधरशर्मेति प्रवादश्रवणम्। चातुर्वेद्योऽयं नियममतिक्रम्य गतदिने परोह्यश्च परीक्षास्थाने प्रविष्टः।

राजभवनेऽनेकेषान्नृपतीनां विवाहोत्सवसमुपस्थितानां सत्कृतिहेतोर्बृहन्नलिकाघोषः।

संप्राप्ताचार्योत्तरपुस्तकानि संप्रेक्ष्य प्रातर्मध्याह्ने चाचार्यपञ्चमपत्रोत्तरपुस्तकानां समापनं कृतं सम्भूय ह्योऽद्य त्रयोदशोत्तरपुस्तकानि दृष्टानि। पुनश्च साहित्याचार्यस्य त्रयाणां प्रश्नपत्राणामुत्तरपुस्तकानि प्रेषितानि वेदाचार्यस्यापि।

आचार्यपरीक्षोत्तरपुस्तकानि समालोक्यानन्तरं शास्त्रिपरीक्षोत्तरपुस्तकानां परीक्षणमारब्धं विंशत्युत्तरपुस्तकानि दृष्टानि। अस्मिन्नेवान्तराले काशीहिन्दूविश्वविद्यालयपरीक्षापत्रपुटकावाप्तिः। उत्तरपुस्तकानि दश दृष्टानि। विंशतिरन्यैद्युः समालोकितानि। रात्रौ प्रहरान्ते सपत्नीकस्य महाराजस्य शीतप्रदेशादागतस्य प्रवेशः। पञ्चविंशत्युत्तरपुस्तकानि निरीक्ष्य परिणामलेखपत्रं जगतीप्रसादभार्गवहस्ते गत्वाऽर्पितम्। काशीविश्वविद्यालयीयमीमांसापरीक्षायाः द्वे उत्तरपुस्तके दृष्ट्वा परिणामं लिखित्वा प्रेषणाय पुटकीकरणम्।

जयपुरमहाराजो मानसिंहो निजभार्याद्वयसहितो ग्रीष्मतापमुपशमयितुकामो नीलगिरिमयासीत्सापत्यः। पुरमधिवसतोऽपि क्रीडातिरिक्तं न राजकार्ये

प्रवृत्तिरिति गमनं साम्प्रतमेव नपुंसकपतेर्जीवनान्मरणमेव वरमिति वर्तत एवाभाणकः।

भगिनीपौत्रो गोपीनाथशास्त्री स्वपितामह्याः प्राथमिकवर्षकर्तव्यश्राद्धदानादिकं किमपि नाकार्षीदहो विद्यामाहात्म्यम्।

शास्त्रिणो द्वयमपि महते कष्टाय राज्ञो राजकार्योपेक्षा राजगुरोर्गोपीनाथस्य श्राद्धदानाद्युपेक्षा च। यथा राजा तथा प्रजा किंवदन्तीयमन्वर्थात्र।

विद्योपाध्यायः कश्मीरं प्रति प्रस्थित इति श्रुतिः। खाचरियावासग्रामाधिपः कल्याणसिंहवर्मा कन्याजन्मपत्रमेलापकनिमित्तमायातस्तस्मै प्रत्यर्पणं जन्मपत्रद्वयासम्मतत्वेनायुष्यविषये संशयप्रकाशनं कृत्वा। भूतपूर्वशास्त्रिवर्यान्तेवासी मदनलालशर्मा प्रश्नवरो व्याकरणाचार्य फतेहपुरस्थचमडियाशेखावाटीसंस्कृतमहाविद्यालयाध्यापकपदकार्यकरणायाप्राक्षीत् परं शास्त्रिवर्येण न कापि स्वीया सम्मतिः प्रदर्शिता। झालरापाटनवास्तव्यो नवरत्नगिरिधरशर्माऽजयमेरुपरीक्षायां स्वकीयपुस्तकनियोगविषये पत्रं लिखित्वा प्रार्थयत।

वाराणस्यां प्रतिष्ठापितकृष्णयजुर्वेदपाठालयाय क्रीतस्य सद्मन ऋणापकरणाय पञ्चविंशतितारिकायां दत्तवान् द्रविडमहोदयः स्वकीयोत्तराधिकारिणमनवेक्ष्यात्मश्वसुरपूर्वपुरुषपर्यायायातगारोडग्रामस्थभूखण्डविक्रयादुपनतं पञ्चदशशतमुद्रात्मकद्रव्यराशिम्। जयपुरराज्यशिक्षामन्त्रिमहोदयो यौवनपुरसामन्तः श्रीनरेन्द्रसिंहः संस्कृतशिक्षापरामर्शार्थं समुपस्थितः पाठशालाध्यक्षः श्वेतः सायं वाष्पयानेन समायातः काश्मीरदेशात्।

बी. ए. उपाधिधारकः श्रीहीरालालशास्त्री स्वसहकारिणा सह प्रातः समेत्य क्रियमाणस्वावलम्बनोद्योग-पुस्तकं विचारार्थं दत्तवान्। विभागीयपरीक्षाणामाङ्गलभाषादीनां परिणामप्रकाशानन्तरं जगतीप्रसादः परीक्षाध्यक्षः समयनियमाय समागच्छत् सरमाकान्तशर्मा नियमपरिशोधनाय च।

श्यामसुन्दरपुरोहितस्य वेदान्तपरिभाषायाः पाठः प्रारब्धो जगदीशोऽपि तत्पाठं श्रोतुं प्रवर्तितः। जगतीप्रसादः परीक्षापरिणामपुस्तकं दर्शितवान् परिणामप्रकाशनाय। गुरुपूर्णिमायाः सत्वादद्य श्रद्धालवः शिष्याः श्यामसुन्दरजगदीश-

वासुदेववैद्ययुगलकिशोरशिवप्रसादखेतानगोविन्दव्रजमोहनगोविन्दरामशास्त्रिभारद्वाजसूर्यनारायणप्रमुखाः पूजानिमित्तं समायाताः। आङ्ग्लपाठकास्तु न कमपि पूजयन्ति। शास्त्राध्यायिष्वपि बहवो वदनं पिदधाना नागतास्तत्रापमानं मन्यमाना अयमस्ति कलिकालप्रभावः। पुरोहितश्यामपण्डितेन साकं संस्कृतविद्यामन्दिरप्रबन्धविषये विचारः। दिलीपसिंहस्याध्ययनार्थमागमनेनाध्यक्षोपाध्यक्षयोरागमनाभावो ज्ञातः शास्त्रिणा।

रविवारस्य गृहारम्भे निषिद्धत्वात्र रविवारे गृहारम्भः कार्य इति श्यामपण्डितो बोधितः।

विद्याधिकारिणः पुरुषः समेत्य विद्याधिकारिणो ठक्कुराध्यक्षयोरागमनसमयनिश्चयं पृष्टवान्। ठक्कुरविद्याधिकारिणावुभावेव निश्चितसमये समुपस्थितौ। संस्कृतमहाविद्यालयस्य प्रबन्धविचारो मुहूर्तं यावत्ताभ्यां समं समभूत्। संस्कृतपाठशालीयदोषविचारसम्भावना।

श्यामसुन्दरपुरोहितेन शिक्षाविभागाध्यक्षबुद्धिर्विपर्यासितेति समाकर्ण्य शास्त्री संस्कृतपाठालयोन्नतिविचारो वृथैवेति निश्चिकाय। वेदान्तपाठसमाप्तिरागामिदिवसे। श्यामसुन्दरपुरोहितस्य संस्कृतपाठालयवर्तमानमित्राणामध्यापकाध्यक्षाणां कृते महानुपक्षापः। चोरानेव सिंहासनमारोपयितुमनाः।

वेदान्तपरिभाषायाः पाठसमापनम्। जगदीशाचार्यस्य जनैः पुराणघट्टोपवने मित्रानुरोधेन विधीयमानभोजनोत्सवे पितृभ्रातृचरणाग्रहेण व्यासोपवने शास्त्रिवर्यस्याश्वयानेन यातायातमभूत्। भोजनसंविधानञ्च गोपीजनवल्लभमन्दिर एव प्रेषितम्। राजकुमारजन्मोत्सवेऽभिनेयमुत्तररामचरितमिति विद्याधिकारिण आज्ञेति विद्याध्यक्षपत्रेण प्रेरितो गिरिधरो महाराजसंस्कृतकालेजाध्यक्ष आश्विनशुक्लाभिनेतव्यनाटकार्थमद्यारभ्यैवाध्ययननाशारम्भमकार्षीत्। नर्मसचिवानां प्राबल्येनोत्तमकार्यनाशः।

परीक्षाध्यक्षजगतीप्रसादवाहनेन भूतपूर्वामात्यगोपीनाथशर्मपुरोहितारामं गत्वा श्यामसुन्दरपुरोहितकौटिल्येन पर्यचाययत्तं द्रविडमहोदयः।

वेदशास्त्रिपरीक्षायै निरुक्तशतपथप्रश्नपत्रं निर्माय पुस्तकद्वयमौकान्तिके परावर्तितम्। संस्कृतविद्यामन्दिरपाठ्यक्रमसमितिरद्य वर्तत इति श्रुतं शास्त्रि-

वर्येण । द्वितीयेऽस्मिन्नहन्यपि साऽजायत । हीरालालशास्त्री तदीयसहायकश्च द्वावपि स्वदेशवस्त्रावलम्बिनौ चिराय सम्भाष्य नीतिं धर्मं च समायातौ विसृष्टौ ।

रामप्रकाशनाट्यशालायामभिनीयमानं संस्कृतपाठशालाद्विजैर्द्रष्टुं नाटक-माह्वानपत्रमधिगतम् । धिग् धिक् प्रेषकम् । शास्त्रिणो धिक्कारस्यायमाशयो यन्नाट्यशास्त्रीयान्तिमाध्यायेषु देवानुकरणकरणाद्देवैः शापः प्रत्तो यद् युष्माभि-रनुकरणं कृतमतो ब्राह्मण्याच्च्युतिरिति । लोकेऽप्युत्तमानामनुकरणं गर्ह्यते ।

शिक्षाविभागाध्यक्षः संस्कृतविद्यामन्दिरसंशोधनसमितिं घटितवान् । तत्र समितौ शास्त्रिवर्योऽपि सदस्यत्वेन निर्वाचितः । मध्याह्ने विभागाध्यक्षमुद्रा-ङ्कितं सदस्यतापत्रमलभत शास्त्री ।

समितिघटनविचारे रुद्धे सति नवम्बरमासस्य (१०।११।१९३२) दशम-तारिकायां घटितसंशोधनसमितिसदस्यतापत्रमवाप्तम् । समितेरस्याः प्रधानः सर नाइट इत्यादिपदवीविभूषितो भूतपूर्वजयपुरराज्यगृहमन्त्री श्रीगोपीनाथ-पुरोहितः । द्वौ च सदस्यौ विद्वच्छ्रीवीरेश्वरमधुसूदनौ । वीरेश्वरशास्त्रिविषये श्रीगिरिधरशर्मात्मकथायां निर्दिशति राज्यमन्त्रिणां श्रद्धाभाजनं श्रीवीरेश्वर-शास्त्री समितिसदस्य आसीदिति । मन्त्री महाराजकालेजप्राचार्यो महाराष्ट्रिय आङ्ग्लदर्शन (फिलासफी) पारगः श्री आर.के. ओकमहाभागः तृतीयः । सदस्यः खाचरियावाससामन्त उच्चन्यायालयन्यायाधीशः कल्याणसिंहवर्मा । समिति-मन्त्रिणा श्वः सायं संस्कृतपाठशालोन्नतिसमितेः प्रथमाधिवेशनं भविष्यति तत्र भवतोपस्थातव्यमिति प्रेषितमामन्त्रणपत्रमाप्तम् ।

समितेः सायन्तनाधिवेशनसूचनां मन्त्रिपत्रेण विज्ञायायं मम स्नानादिकालः सायन्तन्तनसन्ध्योपासनभगवदाराधनायेति सर्वदा ध्यातव्यमिति लिखित्वा मन्त्रि-समीपे पत्रं प्राहिणोत् । पाठनवेलायामुपस्थितजगतीप्रसादद्वारा ज्ञातं यन्नियमानां हिन्दीभाषायामनुवादप्रस्तावः तत्स्वीकृतिरपि जातेति शास्त्रिणः ।

संस्कृतपरीक्षायां वेदपरीक्षायाः कृते वैदिकानां चन्द्रशेखरशास्त्रिणं नामानि पृष्टानि । तदुत्तरे चन्द्रशेखरशास्त्रिणा नामस्थाननिर्देशपुरस्सरं पत्रं लिखित्वा प्रेषितम् । तच्च जगतीप्रसादभार्गवाभ्यर्णं प्रहितम् ।

जयपुरराजकीयपरीक्षायाः प्रश्नपत्रनिर्माणाय परीक्षाध्यक्षपत्रं लब्धम् । ज्योतिषाचार्यगिरिजाप्रसादकथनं निशम्य तदीययाथार्थ्यज्ञानार्थंकान्तिकमुपगम्य मधुसूदनकृत्यं प्रष्टुं विदित्वा च प्रत्यागतो गृहम् । मासस्यामुष्य पञ्चदशतारिकायां प्रथमाधिवेशनं सम्पन्नम् ।

गुप्तसम्भाषणाय रजन्यामागतो जगतीप्रसादः पुनश्च तत्प्रतिबन्धाय संलाप श्रोकेन सार्धमभवत् । मधुसूदनोपद्रवशमनवृत्तज्ञानमविद्यत ।

सम्राट्प्रतिनिधेरागमनसूचनोपलम्भान्नगरे करिष्यमाणप्रबन्धपूर्वाभ्यासाय सर्वराजयानादिचिह्नानां शिक्षणम् । आगामिनि दिवसे समागमिष्यतः सम्राट्प्रतिनिधेः स्वागताय करिष्यमाणा चाराणां गुप्तकेष्टिरद्यापि वर्तते ।

जयपुरमहाराजश्रीमानसिंहनिमन्त्रणेन जयपुरे सम्राजः प्रतिनिधेरागमनेन विभिन्नस्थानेषु तदागमनजन्यहर्षोल्लासप्रकाशाय नानाविधोत्सवाः ।

काशीहिन्दुविश्वविद्यालयीयपरीक्षाध्यक्षप्रेषितपरीक्षाप्रश्नपत्रसूचकराजकीयपत्रस्य श्रीद्रविडशास्त्रिणा ग्रहणं कृतम् । स्वीकृत्य च प्रश्नपत्रनिर्माणं विधाय प्रहितम् । ठक्कुरेण समं संवादमाधाय त्यागपत्रप्रतिरूपकं प्राप्तवान् । संशोधनसमितेर्मन्त्रिणीकमहोदयेन संशोधनसमितेरधिवेशनं चतुर्दश्यां रविवारे भविष्यतीति सूचनापत्रं प्राप शास्त्री । श्याममधुसूदनोपव्यापमालोक्य द्रविडशास्त्रिणा संशोधनसमितेस्त्यागपत्रप्रदाननिश्चयः कृतः । स्वकीयत्यागपत्रनिर्णयमागामिनि दिवसे विट्ठलीकपण्डिताभ्यां कथयिष्यामि । त्यागपत्रप्रतिरूपकमवाप्य ब्रह्मभट्टसूर्यनारायणाय दत्तं तत् । टङ्कणकार्ये पत्रयोर्द्वयोरेकादश दिनानि व्यतीतानीति शीघ्रं प्रेषयितुन्न प्राभवदयं महाभागः । गोपीनाथपुरोहिताप्तश्रीवेदान्तसाहित्याचार्यस्य हस्तेन त्यागपत्रं प्रधानसविधे प्रहितम् । त्यागपत्रस्यापरा प्रतिर्विद्याविभागाध्यक्षाभ्यर्णं प्रेषिताऽनेन महाभागेन । रविवारे मध्याह्नात् परतः समितिस्थानमुपगम्य तत्र पण्डितश्रीमधुसूदनमहोदयस्य हृदयोद्गारश्रवणमध्यक्षस्य गोपीनाथपुरोहितस्यागमने समितिकार्यारम्भो रूपरेखानिश्चयः । समितिकार्यावसाने रहस्येव श्रीमदध्यक्षमहोदयस्त्यागपत्रप्रतिरोधानुरोधं कृतवान् । तदीयोऽनुरोधः शास्त्रिणा स्वीकृतः ।

तस्यामेव यामिन्यां पितापुत्रौ दाधिमथाचार्यौ समागत्य सम्भाषणं विधायागमताम्। खाचरियावासहामन्तो न्यायाधीशपदस्योच्चन्यायालयस्य त्यागमकरोदिति शास्त्रिवर्यमब्रवीत् परं दोषो न प्रदर्शितस्तेन। शास्त्रिवर्यस्य शिष्य इति विषण्णोऽयमभवत्। पदस्य त्यागकारणमन्यस्मिन् दिवसेऽश्रृणोत् द्रविडमहोदयो यन्मद्योत्पादनविक्रये राजनियमातिक्रमणमेव मूलमिति। राजनियमोल्लङ्घनं कृतवानिति शास्त्री विस्मितो जातः। मलसीसरठक्कुरो भूरसिंहः कफाक्रमणेनातिपीडितो रामपदार्थशुक्लाभिधं पण्डितं जन्मपत्रं दर्शयितुं प्रैषयत्। जन्मपत्रमवेक्ष्य जीवनकाठिन्यमनुसन्धाय केनापि पण्डितेन लिखितानुष्ठानप्रकारमेवानुमान्य प्रेषितवान्।

जयपुरराजकीयसंस्कृतपरीक्षाध्यक्षाय भार्गवाय निर्मितप्रश्नपत्राणां पुटकस्य प्रदानं समय एव कृतवान् शास्त्रिमहोदयः।

झिलायठक्कुरः शास्त्रिनिवासान्तिकाद् गच्छन् चोथमलेन सह दृष्टस्तदीयश्वेतोष्णीषमालोक्य शास्त्रिवर्यो भूरिसिंहमृतिमनुमेने। व्यवहारनैपुण्येन द्रविडमहाभागस्तन्निर्वाहाय मलसीसरप्रासादमुपस्थाय तदपत्यश्रीशिवनाथसिंहस्य पितृवियोगजन्यदुःखपरिमार्जनाय तदीयगुणानुवादादिना सान्त्वयामास। प्राभातिके पर्यटनेऽन्वहं क्रियमाणे गङ्गोपाध्यायभवने कृतगमनः संस्कृतपाठालयशोधसमिति विषये सम्भाषणं व्यधात्। ततः प्रत्यावृत्तः पुरोहितश्यामसुन्दरशर्मणा सार्धमालप्य कल्याणगीताङ्कं प्रदाय च तस्मै गोपीनाथकविराजतात्पर्यमवगन्तुं वाराणसेयपरीक्षकत्वनियोगपत्रमङ्गीकृत्य स्वभवनमायातः शास्त्री। पञ्चपाधिवेशनानन्तरं समितेर्गयाश्राद्धार्थं पितॄणां गन्तुकामो गयागमनात् पूर्वमेव समितिनिर्णयं लेखयित्वा सदस्यहस्ताक्षराङ्कितमधिकारिभ्यः प्रददे। निर्णयश्च समित्या पाठशालास्थायितया समुन्नतिविधानार्थं प्रत्तोऽस्याः।

एवमध्यापनादिनातिक्रामति काले पर्वतीयो गोपालदत्तशास्त्री किञ्चित्कालात् पूर्वं जयपुरराज्यमन्त्रिणो गोपीनाथपुरोधोमहाभागस्यारामध्यस्थचतुर्द्वारभवने कृतावासो द्रविडशास्त्रिवैदुष्यविश्रुतिं समाकर्ण्य वसुसिद्धिनिधीन्दुमित 1988 वैक्रमाब्दस्य फाल्गुनशुक्लत्रयोदश्यां दर्शनार्थमेतस्य समायासीत्। तदासीन्मार्चमासस्य विंशतितारिका नेत्राग्निनवानन्तामितैशवीयहायनस्य

(20-3-1932)। शास्त्रिवर्येण सत्रानुष्ठितशास्त्रीयविषयचर्चया सन्तुष्टान्तरङ्गः "ज्ञानफलनाटकं" दर्शयित्वा कदाचनान्यदागत्य भासकृतिमाचष्ट।

भासनाटकचक्रेऽद्यावधि गवेषकैस्त्रयोदश नाटकान्येवाङ्गीकृतानीत्यनुमीयते ऽनेनैव पर्वतीयमहाभागेन निर्माय प्रसिद्धिकामनया एतस्मिन् भासनामोल्लेखः कृतः परमन्वेषणपरायणैर्नाद्यावधि भासनाटकचक्रातिरिक्तनाटकं समुपलब्धम्। शास्त्रिवर्यवैदुष्यप्रभावितः पर्वतीयपण्डितः प्रायशः स्वकीयगवेषणाकार्यमन्यद्वा यत्किमप्यलिखत् तद् द्रविडमहोदयानदर्शयत्। पूर्वपाणिनीयं प्रकाशितवान् पर्वतीयः शास्त्रिसम्मत्या। एतदनन्तरं चेदानीन्तनवर्तमानजयपुरमहाराजमानसिंहवर्णनात्मकं चन्द्रालोकशैलीसमन्वितं लक्ष्यलक्षणात्मकं मानोदयकाव्यं विरच्य शास्त्रिमहाभागायोपदीचकार दर्शनाय सम्मतये च। तथा च शास्त्रिमहाभागो दैनन्दिन्यां लिखति — "आलङ्कारिककाव्यस्य पण्डितगोपालदत्तशास्त्रिकृतस्य जयपुरराजवंशमुद्दिश्य पूर्वभागोऽद्य श्रुतः।" मार्चमासस्य विंशतितमे दिनाङ्के दैनन्दिन्यां लिखति—'पण्डितवरगोपालशास्त्रिणः सनागतस्यालंकारानुसारं राजवंशवर्णनकाव्यस्य श्रवणम्। काव्यशक्तिमानयं विद्वान्। अस्यामेवाग्रे त्रयोदशदिनाङ्के निशि मानोदयकाव्यस्य गितः श्लोकानां श्रवणं जगदीशस्य मुखेन।' एतत् सर्वं दृष्ट्वा श्रुत्वा च शास्त्रिवर्येण सम्मतिरियं प्रदत्ता—

शास्त्री गोपालदत्तः कविमणिरिह यो राजते काव्यबन्धे,
भावालङ्काररागन्नयगुणसुषमं काव्यमादित्यवंशम्।
कृत्वा मानोदयाख्यं सदसि सुमनसां मानमापत्तती वै,
प्रीतो वीरेश्वरः सन् कविवरपदवीभाजनं मन्यते तम्॥"

अष्टादशतारिकायां लिखति द्राविडः, पण्डितगोपालदत्तशास्त्रिणानीतप्रश्नपत्रविचारः। भौमे प्रभातागमनाय संमननम्। भौमे प्रभात एव पण्डितशास्त्रिणा सह परीक्षाध्यक्षसमीपे गत्वा पत्रदापनसम्भाषणसत्कारादि च।

इत्थं कतिचन कृतीः कृत्वा धूम्रवर्तिबहूपयोगादयं पर्वतीयः पण्डितः पुराणवसतिवर्तमानरघुनाथसहायाभिभावकस्य सदन एव वसन् देवसायुज्यमाप। द्रविडमहोदयः स्वकीयोत्तराधिकारिणमनवेक्ष्यात्मपूर्वपुरुषानुयातगारोडाग्रामस्यभूखण्डविक्रयादुपनतं पञ्चदशशतद्रव्यराशिं प्रचलतो वर्षस्यैकोनचत्वारिंशवीयस्य जूनमासस्य षट्तारिकायां पाठशालार्थं क्रीतस्य सदन ऋणापकरणाय प्रवर्तमानख्रिष्टाब्दस्य प्रचलति जूनमासे पञ्चविंशतितारिकायां दत्तवान्।

जयपुरराज्यशिक्षामन्त्रिमहोदयो यौवनपुरसामन्तः श्रीनरेन्द्रसिंहोऽस्यैव मासस्य पट्तारिकायां संस्कृतशिक्षापरामर्शार्थं समाययौ।

नन्दाक्षिनिधिवसुधामितेशवीयाब्दप्रारम्भत एव शास्त्रिवर्यः स्वकीयनेत्र-ज्योतिषः क्रमशो जायमानमन्दिम्ना दैनिकवृत्तजातमन्येनैवालेखयदिति ज्ञायते स्थाने स्थानेऽद्य लेखको नायात इति लेखेन।

क्षीयमाणेऽपि ज्योतिषि शास्त्राग्निनन्दोर्वीमित - ख्रिष्टाब्दे (1936ई.) दैनन्दिन्यां दैनिकवृत्तजातलेखनाय समासतोऽनुष्टुब्वृत्तस्यैवोपयोगं विदधत् प्रेरयति लेखकम्।

श्राङ्ग्लसम्वत्सरारम्भमुद्दिश्य सम्राजो दीर्घायुष्यकामनया कृतोत्सवविषये लिखति—

राजाज्ञया सैन्यमध्ये नलिकानिनदाः शतम्।
सार्वभौमस्य दीर्घायुश्चिन्तनाय प्रकाशिताः॥

संक्रान्तिकाले दानं ब्राह्मणेभ्यो धर्मशास्त्रसम्मतमिति लिखति—

प्राचीनगणित प्राप्तसंक्रान्तिदिवसे जनान्।
सन्तोषयितुकामोऽहं वस्त्राणि तु व्यतारिषम्॥
वर्जरं मुद्गसंश्लिष्टं तिललड्डुकमेव च।
ब्राह्मणेभ्यो दक्षिणया प्रादायागतांस्ततः॥

स्वकीयपञ्चाङ्गानुसारि सङ्क्रान्तावपि शुद्धपञ्चाङ्गानुसारेण मकर-संक्रान्तिवासरः—

अद्यैवेति स्नानदानपूजोत्सवसमागमाः।
अन्यरथेभ्यः श्वस्तनो च संक्रान्तिरिति वान्यकम्॥
तिलमोदकमुद्गादि क्रयोऽभूदद्य सर्वतः।
मकरार्कोत्सवेनात्र महान् कोलाहलः पुरे॥
मोहनेन सम्भाष्य शीतप्रावरणं ततः।
रूपकाणि समासाद्य पञ्चौकेन सहागतम्॥
सीतारामायावरणं प्रातापाय व रूप्यके।
प्रादां तयोरपेक्षात ओकस्य च सुसंविदः॥

भट्टविट्ठलयोर्गेहे जनवरीमासे लिखति शास्त्री—

भाष्यशेखरमुक्तावल्याः पाठाः समये स्वके ।
आपूदेवीं समारोप्य विट्ठलस्यन्दने सह ॥
कनिष्ठया रामपुरं प्रैषिषं भगिनी गृहे ।
अजमेरोर्वैदिकेति - नामयन्त्रालयाधिपः ॥
चतुःपेरुफलैर्द्रष्टुं रामेण वणिजा सह ।
महन्तोऽपि स्वसुहृदा कन्योद्वाहमुहूर्त्तकम् ॥
जिज्ञासितुं ततः सर्वे प्रहिताः सत्कृताश्च ते ।
प्रदोषे सूर्यगोविन्दशास्त्रिगोविन्दश्रीधराः ॥
दिवा युगलवैद्येन सह मूर्तिविवेचकः ॥
लल्लीलालः पण्डितोऽपि कश्मीरकपुरोहितः ।
दृष्टाः प्रश्नस्योत्तराणि प्रतिभातानि चोक्तवान् ॥
विट्ठलस्य भार्गवस्य विलोकनसुभाषणे ।
सार्ध-भार्यार्थिभैषज्यस्यानुपाननिवेदनम् ।
व्रजः स्पष्टतयैवोक्तो नाहं त्वां पाठयामि यत् ।
तत्कारणं मदुक्तस्य त्यागो धर्मे कृतस्त्वया ।
पाठः पूर्वाह्णसमये गङ्गाधरमुकुन्दयोः ।

अपराह्णेऽद्वैतसिद्धिपाठारम्भो ह्यभूत्तदा । (गोपीनाथस्य)

मार्चमासचतुर्थतारिकायां लिखति—

जगदीशस्यागमोऽद्य फलान्यादाय भक्तितः ।
पाठो भाष्यस्य शब्देन्दु-शेखरस्यापि व्याकृतौ ॥
वेदान्तेऽद्वैतसिद्धेश्च नान्यो छात्रानुपस्थितेः ।
तदा मदनगुप्तेन विविधानि फलानि मे ।
उपहारेण दत्तानि चिरेण स्वीकृतिः कृता ॥
अद्वैतसिद्धेर्मिथ्यात्व-मिथ्यात्वस्योपपादनम् ।
श्वः प्रभृति पद्मपादपञ्चपादिकपाठनम् ॥
महाभाष्य-सांख्यतत्व-कौमुदीशेखरास्तथा ।
पञ्चपादिकाद्यास्तु पाठिता नेतरे मया ॥

प्रजस्य रोगाधिक्यस्य श्रवणं पित्रोर्वाक्याद् यत् ।
पुरोहितः श्यामशर्मा दृष्टः सम्भाष्य सत्कृतः ॥
श्रीसत्संप्रदायानुसारी श्रीदुर्गाप्रसादशर्मा द्विवेदः ।
महामहोपाध्यायपदवीमारूढः प्रातरेवायासीत् ॥
महामहोपाध्यायेनोपायनीकृतवस्तुनोः ।
स्वीकारः कुसुमानाञ्च फलानां चैव धूर्जटेः ॥
चातुर्मास्यनिबन्धदर्शने 20 पृष्ठानां दर्शनम् ।
चातुर्मास्यप्रयोगनिबन्धदर्शनसमाप्तिः ॥
काशीविश्वविद्यालयपरीक्षाध्यक्ष – सविधे
उत्तरपत्रप्रेषणम् । सोमे चेदागन्तुं शक्नोमि
भौमः परीक्षादिवसो विनिश्चेय इति ।

'–4–1936 द्वितीयनिबन्धदर्शनारम्भः ।

-4 द्वितीय निबन्धदर्शनसमापनम् ।
मीमांसानिबन्धदर्शनमद्य प्राप्तपुटके स्थितस्य ।
काशीविश्वविद्यालयात् सांख्ययोगनिबन्धागमः ।
विद्याधरशास्त्रिवराणां सविधे पत्रोत्तरप्रेषणम् ।
परीक्षाध्यक्षसविधे उत्तरं प्रेषितुं लेखोऽद्य ।
मसीलेखं विना तूलेन लिखितनिबन्धस्य दर्शने महत्कष्टमभूत् ।
प्रथमदृष्टानां निबन्धानां योग्यताङ्कसहितपत्रप्रेषणं राजनिवेदितं कृत्वा
दिवा गोपीनाथो वैद्यराजः फलान्युपदीकृत्य निशि नन्दकिशोरो वैद्य एत्य
भाविनि दशम्यां पुत्रोपनयनं द्रष्टुं निमन्त्रणं कृत्वा गतः ।

30–4 मासान्तदेयस्य दानं भृतिमूल्यादेः । नन्दकिशोरवैद्यस्य मदनमोहन-
चट्टोपाध्यायस्य च निमन्त्रणपत्रे प्राप्ते । श्लोकास्त्वशुद्धा वैद्यस्य पत्रे ।
दिव दृष्टो जगत्स्वामी साहित्याचार्य एत्य यः ।
सर्वमेवाचकथत् दौरात्म्यं पूरणस्य मे ।
निशि पूर्णमते स्थित्वा जगदीशस्य कार्यकृत् ।
चट्टोपाभिधनृहरिर्भर्त्सितोऽपकारकृत् ॥

20–5 वैदिकसूर्यपुत्रोऽष्टम एवाब्द उपनीतः युक्त एव वैदिकानाम् ।

27–5 दुर्गगङ्गाधरगोपीनाथजगदीशानां पाठाः ।
सूर्यस्तूपनीतपुत्रं प्रणमयितुमागतः ॥
भिक्षायां रूप्यकं पञ्च उपहारस्य प्राददे ॥

17–6 श्रेष्ठिदशादर्शनेन लाभादेर्न निर्णयः । तत्सविधे जगदीशेन प्रेषितः ।

20–6 जगदीशाचार्यदत्तं भुवनेश्वरवर्षपत्रं दातुं तस्य श्रीधरशर्मणो द्वारा ।

21–6 द्वौ पाठौ गौडयोर्द्वौ जगदीशस्य । जगदीशस्य पत्नीं पितृगृहादानेतुं गमनम् ।

22–5 राधामोहनवर्मप्रेषितानां षण्णामाम्राणां स्वीकारः ।

23–6 वैद्यराजश्रीगोपीनाथदत्तानामष्टानां पटोलाम्रफलानां स्वीकारः ।

4–7 प्रभाते श्रीधरसूर्यमनुदुर्गागङ्गाधरव्रजकिशोरगोविन्दवासुदेवजगदीशानां मध्याह्ने भ्रातृजामातृमित्रसहितस्य शिवप्रसादस्य गुरुपूजननिमित्ते-नागमनं पूजनं देवस्य मह्यं कौषेयोष्णीषसमर्पणं च ।

16–7 कनिष्ठायाः षण्णां शतानां रूप्यकाणां हस्तेन त्रिवेदपुरोहितगोविन्दनारा-यणशर्मणः समीपे स्थापनाय जगदीशं सहायाय प्रेष्य पुरोहितपण्डित-श्यामद्वारा स्थापनं प्रतिशतं चतुराणककुसीदलाभं पुरस्कृत्य पत्रं पश्चादागन्ता ।

18–7 श्यामेन चिरं संवादो रूपकप्राप्तिपत्रलाभाय कथनं च ।

26–7 जगतीप्रसादस्य सानुजस्यागमनं परीक्षाविषयकथनम् ।

30–7 श्यामशर्मणागत्य कनिष्ठापत्रदानं त्रिवेदगोविन्दनारायणार्पणात् ।

8–8 मोहनारामगतागतं सप्तशत्यनुवादपरिशोधे । श्रोकसकाशाद्रूपकाणामा-नयनं पञ्चत्रिंशतो महन्तहस्तेन ।

11–8 सप्तशत्यनुवादेऽष्टमान्तस्य शुद्धिः स्वयं गत्या गतागतं मोहनारामे ।

12–8 स्वयं गत्या मोहनगमनं सप्तशत्यनुवादे दशमान्तशुद्धिश्च ।

14–8 पुष्पाणामानयनं सप्तशत्यनुवादसमाप्तिः ।

17–8 दर्शनेऽन्तःकरणे आनन्दकल्लोला अवश्यं भवन्ति इति निश्चित्य श्वः कर्तव्यमिति निश्चितम् ।

24–8 समागतगिरिजाप्रसादविष्णुशास्त्रिणां संभाषा । चतुर्थयामे जन्मदिन-पूजादिकार्यम् । महन्तदामोदरदासप्रतापादीनामुपस्थितिस्तृतीययामे ।

दामोदरदासोपायनीकृतानां स्थूलसूक्ष्मद्राक्षाणां स्वीकारो जन्मदिने फललाभात् सुखसूचनम् ।

27–8 काण्वशाखा शतपथप्रथमो भाग ईप्सितो महामहोपाध्यायद्विवेदस्य सविधेऽद्य मे गङ्गाधरस्य हस्तेन प्रेषितस्तस्य लेखनम् ।

28–8 गोपीनाथशास्त्रिप्रश्नानामुत्तरणं सद्यो निशि ।

1–9 नृसिंहगुप्तात् फलपूरितपात्रागमः फलस्वीकारः पात्रपरावर्तनञ्च ।

2–9 श्रेष्ठिसकाशात् फलानामुपायनम् । प्रतिवादिभयङ्करानन्ताचार्याणां वैकुण्ठवासेनात्रापि शोकसभा वैद्यमन्दिरे ।

5–9 वर्धापनब्राह्मणभोजनं सर्वेषां पाठश्च ।

9–9 म. म. माधवशास्त्रिवर्यस्य प्राघुणिकस्यागमनं गोपीनाथगृहे ।

11–9 वैश्यश्यामभार्यायाः सोपायनहस्ताया आगमनम् ।

12–9 मध्याह्नात् परतो माधवशास्त्रिभण्डारिणा चिरं वार्तालापः ।

18–9 पत्रप्राप्तिः श्रीशिवसिंहस्य तस्य जगदीशहस्ते दानम् ।

28–9 सातूबाबूनामकस्य स्वपुत्रीसहितस्यागमनं जन्मपत्रविचाराय पत्नीदीक्षार्थं च ।

30–9 सभ्रातृकगङ्गाधरशर्मद्विवेदस्यागमनं संगवे । निशामुखे भार्गवस्य गुप्तविषयविचारायोपस्थितिः ।

3–10 गुप्तः कौशेयास्तरणं हरितप्रधानमनेकवर्णचित्रितं प्रदत्तवान् ।

8–10 गिरिजाप्रसादलेखश्रवणम् । गोविन्दहस्तेन पूर्वगृहीतानां रूप्यकाणां पञ्चत्रिंशतः प्रेषणम् । शिवनाथसिंहमन्त्रिणानेकसंवादश्च ।

10–10 स्थानशुद्धिरपि गोविन्दजगदीशसहायेन ।

11–10 चतुर्वेदस्य रहस्यग्रहणाय धर्मप्रश्नव्याजेन उपस्थानम् ।

14–10 प्रभाते ताम्हनकरगृहं गत्वा तत्र ओकविषयस्य वरिष्ठविरोधश्रवणेन चिन्तोद्भवः ।

15–10 प्रभाते ओको दृष्टो वरिष्ठस्य हस्तक्षेपमसहमानस्य वरिष्ठविरोधप्रवृत्तिर्यद्यपि साहजिकी तथापि देशकालविरुद्धेयम् ।

16–20 ग्रहलाघवरीत्या नवरात्रारम्भः कटलास्थानाधिपश्रेष्ठिप्रार्थनयागमनं श्रीदुर्गादेवीकृपार्थं जपप्रकारोपदेशश्च ।

17–10 जगदीशस्य दुर्गस्य विष्णोश्च पाठाः। गङ्गाधरस्य तु नवरात्रेण पाठाभावः परं पृष्ठस्य बोधनं स्वंल्पसूत्रशेखरे।

19–10 जगदीशेन विद्याधिकारिणः संभाषा, खेलडीविद्यालयकृते प्रार्थनापत्रस्य गृहीत्वा प्रेषणप्रतिज्ञा। निशि शब्दरत्नमात्रस्य पाठः।

20–10 सायं कृष्णानन्दब्रह्मचारिणा समागतेन परिचयः। मोरीजाठाकुरविषये प्रत्याख्यानम्।

21–10 श्यामपण्डिस्याग्रवनादागतस्य पाठशालापरीक्षाविषये पृष्टस्य कथनम्।

22–10 विट्ठलपण्डितादीकप्रतिज्ञाभङ्गेनाधिकारिणा विरोध इति ज्ञातम्।

31–10 शिवस्य लेखकोऽपि जगदीशविषयं प्रष्टुं समायातः। जगदीशस्तु प्रत्यहमिवागतः।

3–11 पाठालयक्रीडनके कलहेन केचनाध्यापका हता इति श्रुतम्। पण्डितगिरिजाप्रसादाचार्यस्य समागमः।

8–11 गिरिजाप्रसादशर्मण उपगमनम्।

11–11 धर्माधिकारिगिरिजाप्रसादकेदारनाथबद्रीनाथनानगरामाणां सूर्यस्य च धर्मशास्त्रविषयविचारायागमः।

13–11 श्लोकविषये विपरीतश्रवणेन तत्र गमनम् तस्य ज्येष्ठभ्रातुरागतस्य परिचयश्च।

18–11 काश्या आगतेन शिवरामशर्मणा धर्माधिकारिप्रदत्तचिपिटपुटकस्य दत्तस्य स्वीकारः।

19–11 पितामहेन सह गङ्गाधरस्तद्भ्राता च देशं गतौ। ताननुगतयोराशकटस्थानं गिरिजाप्रसादः।

23–11 आङ्ग्लवैद्यवरस्य(डा. दलजङ्गसिंहः)विष्णुसहस्रनाम्नि नामार्थप्रश्नाः।

24–11 पत्रप्राप्तिः श्रीकाशीराजकीयपाठशालापरीक्षायाः।

25–11 जगदीशपाठसमापनं देशान्तरं जिगमिषोः। आङ्ग्लवैद्यराजस्य विष्णुसहस्रनामसमापनं जातमिति अनुभूतेरारम्भः। लघुमणे रुद्राक्षलाभोऽस्मात्।

26–11 काशीविद्यालयपरीक्षाध्यक्षेऽर्द्धेन भागेन प्रश्नपत्रप्रेषः।

3–12 अश्वक्रीडायामधःपातो महाराजस्य तेन अंसभेद इति मूर्च्छा १५ घटिकातश्चैतन्यागमः ।

4–12 ओकस्थानमेत्य तस्य महाविद्यालयाध्यक्षपदात् च्युतिसूचकं पत्रं श्रुत्वा खिन्नः स्वस्थानमुपागतः ।

5–12 श्रीमहाराजस्य पूर्ववदेव स्थितिरिति समागतयोधपुरमहाराजस्य सभ्रातृदम्पतेरपि भावो वैद्यैर्निर्णीतः ।

6–12 श्रीमहाराजस्य कृते पण्डितकविसमुदायस्य गोविन्दमन्दिरे रक्षार्थं प्रार्थनाटोपः ।

7–12 ज्योतिर्वित्केदारनाथस्योपस्थानं लेखस्य विचाराय स्थापनं यमद्वितीयालेखं सुविचार्य परावर्तनं सूर्यहस्तेन । भार्गवस्योपस्थित्या सर्वविषयज्ञानं संस्कृतविद्यालयसम्बन्धेन ।

10–12 ज्योतिर्विषये धर्मशास्त्राभिज्ञानामज्ञानप्रकाशशालिप्रकारेण गिरिधरस्योद्धरणप्रकाशनमधिकारिणेति श्रुतिः ।

13–12 विट्ठलेन संभाषायामोकस्य प्रतिज्ञात्यागो दोषो मतः ।
श्रान्तस्यापि ओकस्य दैवप्रातिकूल्यमेव मन्ये ।
कविरत्नहरेर्विलम्बेनागतस्य संभाषणमात्रेण परावृत्तिः ।
ज्योतिर्विदा केदारनाथेन चिरं सम्भाषा ।

14–12 पत्रं जगदीशस्य प्राप्य तुष्टः । सूर्यात् पाठालयवृत्तश्रवणम् ।
अङ्गुलोपायां वेश्यासक्तस्य राज्यादवतारस्तस्य कनिष्ठभ्रातू राज्यारोहणसमारम्भः । सम्मानाय बृहन्नलिकानादोऽत्रापि ।

16–12 पत्रमद्य काशीतश्चित्रस्वामिशास्त्रिणे गुरौ प्रभाते आगन्ता सपट्टाभिरामशिष्य इति निश्युक्तस्तत्र विष्णुशास्त्री ।

17–12 प्रभाते शास्त्रिवरस्य सच्छात्रस्यागमनं विष्णुशास्त्रिणमनुगतस्य शास्त्रिवरयोर्भोजनादि गोपीनाथगृहे । गणपतिपरिचयायोदयपुरं प्रति पत्रदानम् । तयोरग्रे गमनं मह्यं ताण्ड्यब्राह्मणपुस्तकं दत्वा विक्रयार्थैकपुस्तकं स्थापयित्वा च ।

18-12 पुण्यपत्तनऋग्वेदसंहिताशोधनमण्डलादुत्सवनिमन्त्रणप्राप्तिः ।
द्राविडविश्वनाथशास्त्रितैलङ्गसदाशिवाभ्यां रचिते……………
महाधिकारेऽभिनन्दनपत्रे प्रेषिते श्रोकमहाशयहस्तात् ।

20-12 मोहनवाटिकागमनं पत्रशाकानयनं च । वैद्यराजागमनं भार्यायाः स्वप्निकमपनिवृत्युपायपृच्छार्थम् ।

21-12 मोहनवाटिकागमनमादशमाध्यायं संशोधनं च ।
वैद्यराजसमीपे घृतप्रेषणं गोपीनाथप्रेषितदाडिमलाभो दुहितृहस्तेन ।

22-12 मोहनवाटिकागतागतं सप्तशतीसमाप्तिपर्यन्तं संशोधनं च ।
श्यामेन पुरोहितेन समागतेन चिरं सम्भाषा ।

विद्वांस एतदीयप्रभावसमाकृष्टाः स्वकर्मसाधनाय पत्रव्यवहारं संस्कृतमाध्यमेनैवारीरचंस्तत्र वाराणसेयविद्वद्वरिष्ठः श्रीनारायणशास्त्रिखिस्ते साहित्याचार्योऽनन्तश्रुतिनववसुधामितख्रिष्टवर्षे (1940) पत्रं प्राहिणोत् । एवमेवास्मिन् वर्षे महामहोपाध्यायपदमण्डितश्रीचिन्हस्वामिमहोदयो मीमांसामांसलस्वान्तः पत्रं प्रजिघाय तिरुपतितः संस्कृतभाषामयमेव । राज्यमन्त्रिश्रद्धाभाजनतया द्रविडशास्त्रिणः स्वभागिनेयकार्यसंसिद्धिः (20-9-1940) ।

एतेनेदमभिज्ञायते यत् संस्कृतज्ञैः शास्त्रिणा सार्द्धं पत्रव्यवहारः संस्कृतमाध्यमेनैवाक्रियत । हन्त भारतस्वातन्त्र्यप्राप्तिसमनन्तरं संस्कृतज्ञैर्विद्वद्भिरपि प्रायशः संस्कृतपरित्यागपूर्वकं हिन्दीभाषैव पत्रव्यवहारेऽङ्गीकृता । किमन्यत् संस्कृतप्रचारप्रसारार्थंसंघटितसंस्थानैरपि पत्रव्यवहारः कार्यविवरणञ्च तदीयं हिन्दीभाषामाध्यमेनैव बहुधानुष्ठीयते ।

कदाचनैतदीयः शिष्यः क्षणदायामेकं पुरुषमादाय समायात आयुर्वेदविभागाध्यक्षो भिषगाचार्यो राजवैद्यः श्रीनन्दकिशोरशर्मा लेटितस्य (शयितस्य) पादयोः प्राणमत् । आचरणस्यास्य धर्मशास्त्रविरुद्धतयाऽतीव कुपितीभूय कोऽयं मूर्ख इति प्रोच्य ततो विससर्ज । धर्मशास्त्रविरुद्धं स्वल्पमपि न सोढुमशकदाचरणं कस्यापि कदाचन ।

आगच्छन्तं परामर्शार्थमधिकारिवर्गं मन्त्रिगणमाकर्ण्य विदुषां केषाञ्चनापरोऽयं चाणक्य इति धारणा दृढबद्धमूला ।

अचरोलनरेशस्य जयपुरराज्यगृहमन्त्रिणो मेदपाटमहाराणाभोपालसिंह-प्रदत्तराजाधिराजपदवीमण्डितस्य श्रीहरिसिंहवर्मणः कनीयान् सहोदरः कर्नल-श्रीशार्दूलसिंहवर्मा सपत्नीकः शिष्यत्वमङ्गीचकार द्रविडशास्त्रिमहाभागस्य। भक्त्यापन्नः प्रत्यहं फलादि प्रजिघाय। स्वल्पीयःसमयानन्तरं शास्त्रिवर्यः स्वपुस्तकालयस्थायितायाश्चर्चामकरोत् तस्मिन्नेव प्रसङ्गे श्रीशार्दूलसिंहवर्मणा स्वतन्त्रसदनक्रयः प्रतिश्रुतः। तस्मिन्नेव सद्मनि पुस्तकालयः शास्त्रिवरावासोऽपि स एव निलयः स्यादिति प्रार्थयाञ्चक्रे। प्रार्थनायामेतस्यामङ्गीकृतायां शास्त्रिणा स्वविश्वासपात्रेण सुखदेवपुरोहितेन सह बहूनि गृहाणि क्रयार्थमवलोकितानि दर्शितानि च शास्त्रिविश्वासपात्रेभ्यः। भवनमेकं तन्मनोऽभिलाषानुसारं क्रीत्वा-भ्यर्थयत यदत्रभवान् तत्र निवसतु पुनश्च भवदिच्छानुसारं परिवर्तनं परिवर्धनञ्च कारयिष्यामि। परं विश्वासपात्रजनान्यथाकथनेन निर्बन्ध एतदीयोऽनङ्गीकृतः।

विषण्णः श्रीशार्दूलसिंहो मह्यं पत्रमेकं लिखित्वानुरोधाय प्रेषयामास स्वानुरोधपत्रं च शास्त्रिणः कृते तत्रैव पुटके न्यस्तवान्। तदीयलेखानुसारं शास्त्रिसान्निध्यमधिगम्य पत्रद्वयं श्रावितम्। श्रवणसमकालमेव द्वाभ्यामकुप्यद-वाच्यमवोचच्च तदपि प्रतिदिनं फलप्रापणादिकं यथावत् प्राचलत्। कतिपय-दिनानन्तरं प्रसादमापन्ने गुरुवरे तदीयादेशानुसारं गृहक्रयाय द्वादशसाहस्री रजतमुद्राणां समर्पिता श्रीशार्दूलसिंहमहाशयेन। सा च द्रविडशास्त्रिणात्म-विश्वासभाजनान्तेवासिश्रेष्ठिवर्यश्रीशिवप्रसादखेतानात्मजश्रीगुलाबरायखेतानन्नि-षदयायां निक्षिप्ता।

द्वादशसहस्रराशिलाभानन्तरं शास्त्रिवरकृतत्वरामभिलक्ष्य नगरपालिकया गुणगौरीराजमार्गविद्यमानसाम्प्रतिकविष्णुमार्गकोणे वर्तमानभूखण्डं क्रीत्वा तत्र पुस्तकालयनिर्माणकार्यमारम्भितवान् खेतानमहोदयः किञ्चिदतिरिक्तरिक्थं सङ्गृह्य कैश्चिद् वणिग्वृत्तिपरायणैर्वैश्यैः। द्रविडशास्त्रिणो जीवनदशायामेव सम्पन्नप्राये भवननिर्माणकार्ये नवनिर्मितसदने कृतमतिरपि शास्त्रिवरो वस्तुं प्रवेशमुहूर्तासिस्वान्न शशाक। लोचनज्योतिर्द्रविडमहाभागस्य मौक्तिक - बिन्दु-प्रभावेण मन्दं मन्दं मन्दतामितमवलोक्य तदीयशल्यचिकित्सार्थं भक्तिप्रवणचेताः श्रीशार्दूलसिंहवर्माऽविगणय्य व्ययभारं शास्त्रिवर्येण सममेतदीयां सेविकामदसीय-भ्रातुष्पुत्रीं पतिसहितामिमं जनं सुखदेवप्रसादपुरोहितञ्चात्मव्ययेन निन्ये

मेदपाटराजधानीम् । भवदीयोदयपुरागमनोदन्तमाकर्ण्य जयपुरमहाराजकालेजाधीतचरोऽदसीयान्तेवासी मेदपाटराजधान्यामुदयपुरे सत्रन्यायालय न्यायाधीशो जमनालालजशोरामहोदयो विनयाननत: प्रतिदिनं समागम्य शुश्रूषार्थं न्यवेदयदतीव श्रद्धालुतया सभक्ति । तत्र सर्वेषामेवैतेषां भोजनावासादिव्यवस्थां समीचीनतया व्यधात् विपुलधनराशिं व्ययीकृत्य जयपुरपरावर्तनपर्यन्तम् ।

शल्यचिकित्सापाकृतावरणचक्षुर्ज्योति:समुद्गमेऽध्ययनादिस्वरयाप्तं ज्योति: सहसा विलयमयात् । पुनरपि शास्त्रिमहाभागोऽनवरताभ्यासवशात् पाकादिनित्यकर्मजातं पूर्ववदेव प्रतिवासरन्निरवहन् न किमपि सङ्कोचमालस्यं वा व्यतनोत् । नागाब्धिनिधिवसुमतीमितेशवीयहायने प्रथममासस्य तृतीयतारिकायां (3-1-1948)जयपुरमहाराजश्रीमानसिंहमहाभागस्य रजतजयन्तीमहोत्सवमभिशास्त्रिवर्यो विद्यासागरपदव्या सम्मानितो भूखण्डग्रहणायानुरुद्धोऽपि नाङ्गीकृतवान् भूखण्डम् ।

चिरात्राय भारतीयै: स्वदेशस्वातन्त्र्यावाप्तिविधीयमाने प्रयासे फलवति शास्त्रिवर्यान्तेवासिनि श्रीहीरालालशास्त्रिणि राजस्थानमुख्यमन्त्रिपदमध्यासीने सेवानिवृत्ता: प्राणन्तोऽखिला अपि गुरवो मासिकसेवानिवृत्तिसमनन्तरं जीवननिर्वाहप्राप्यमाणद्रविणराशिद्विगुणतामवापु: । मुख्यमन्त्रिपदभारोद्वहनानन्तरं जीवतामजीवतां सकलानां गुरूणां गृहं गत्वाशिषमवाप्तुकाम: सभाजयामास तानुत्तराधिकारिणश्चापरेषाम् । शास्त्रिमहाशयानामेषाऽपूर्वा भक्तिर्व्यवहाराचरणाभ्यां निदर्शनमुपस्थापयति साम्प्रतिके कल्मषप्रधाने काले । वनस्थलीं विलोकयितुकामो मुख्यमन्त्री श्रीहीरालालशास्त्री श्रद्धासंभृतचेता असाध्यरुक्प्रतिक्रियावामयाक्रान्तकलेवरौ श्रीवीरेश्वरशास्त्रिसूर्यनारायणाचार्यगुरुवर्यौ रोगिवाहनद्वयेन महताग्रहेणानयत् सशिष्यानुचरौ ।

समग्रगुरुचरणारविन्दाशीसमुपलब्धशुभाशीर्भिर्वृंहद्राजस्थानमुख्यमन्त्रित्वधुरमवहत् । ग्रहवेदनिधिमहीमितख्रिष्टाब्दतृतीयमासान्तिमतारिकायाम् (31-3-1949) लब्धगुरुचरणानुकम्पोत्कृष्टासन: शास्त्री पुनरपि दर्शनेनास्मान् कृतकृत्यं मन्यमान उपदीचकार ।

अस्यैव प्रवर्तमानवत्सरस्य चतुर्थमासस्यादिमदिवसात्सेवानिवृत्तिकाल-जीवननिर्वाहार्थंदीयमानद्रविणराशिः सप्ततिमुद्रामासिकवृत्त्या सम्भूय षट्चत्वारिंशदधिकशतमितोऽजायत ।

इदमीयपदार्पणानुग्रहपूतां वनस्थलीमात्मानञ्च धन्यं मन्वानो होराचतुष्टयानन्तरं सभाजयित्वा रोगिवाहनद्वयेन विसृष्टयाञ्जनञ्चामुं द्रविडशास्त्रिण आदेशमवाप्यात्रैवारुणत् । मुख्यमन्त्रित्वकार्यव्यस्तोऽपि शास्त्री समये समये द्रविडशास्त्रिणो मनोऽभिलाषमधिजिगमिषुस्तदनुकूलमाचरितुञ्चाचेष्टत ।

अङ्काभ्रानन्तदस्रमितविक्रमवत्सरे बाहुलेयमासासितदलीयाष्टम्यां पाञ्चभौतिकं विग्रहं विहाय विश्वनाथसायुज्यमधिजगाम। सन्तानाभावाद् बान्धवविरहाच्चात्रैवौर्ध्वदैहिकी क्रिया महाभागस्यास्दीयज्येष्ठस्वसृप्रपौत्रराजगुरुश्रीगोपीनाथशास्त्रिणा सम्पादिता। शवयात्रायां द्रविडशास्त्रिणः प्रतिष्ठिता जनाः शिष्यप्रशिष्याश्च सम्मिलिता अविद्यन्त। राजस्थानस्य तात्कालिकमुख्यमन्त्री श्रीहीरालालशास्त्रिमहाशयः स्वान्तेवासित्वनिर्वाहाय सभक्ति समगंस्त। तृतीयाह्क्रियां निर्वर्त्यविशिष्टक्रियासम्पादनाय भागिनेयो महन्तश्रीगोपीनाथो वाराणसीं प्रतस्थे। तत्र द्रविडसम्प्रदायानुसारं सर्वाः क्रियाः समपीपदत् । जयपुरेऽपि द्वादशाह्निमित्तभोजनादिभिर्ब्राह्मणा व्यवहारिणश्च समतोष्यन्त ।

नवनिर्मितविष्णुमार्गकोणावस्थितपुस्तकालयभवनं प्रविविक्षुरपि द्रविडशास्त्रिमहाभागो नवीननिकेतनप्रवेशमुहूर्तासद्भावान्नाभिलाषं पूरयितुमशकत् परमात्मजीवितावस्थायामाज्ञापालनपराय विवेकिने स्वशिष्याय पुस्तकालयीयसुरक्षाव्यवस्थाप्रकारं प्रोवाच । गुरुवचनं श्रद्धालुतया परिपालयन्नैतत्पुस्तकालयीयं संविधानमभिभाषकपरामर्शेन निर्माय पुस्तकालयसंस्थानमेकं (ट्रस्ट) संघटितवान्निम्नप्रकारेणैकादशव्यक्तीनाम् —

1. श्रीराधामोहनलालमाथुरः सभापतिः, सेवानिवृत्तोच्चन्यायालयन्यायाधीशः
2. श्रीगुलाबरायखेतानः कोषाध्यक्षः
3. श्रीश्यामसुन्दरशर्मा पुरोहितः सदस्यः
4. श्रीहिम्मतलालदवेमहोदयः ,,

5. श्रीदामोदरदासः ,,
6. श्रीयुगलकिशोरशर्मा ,,
7. श्रीगोपाललालपुरोहितः ,,
8. श्रीलल्लीलालः ,,
9. श्रीगोपीनाथो राजगुरुः ,, साहित्याचार्यः, एम. ए., एल. एल. बी.
10. राजकीयः प्रतिनिधिः
11. श्रीजगदीशशर्मा सचिवः
12. श्रीकालूरामः सहवृतः सदस्यः

सदस्यैरमुष्य पुस्तकातिरिक्तानि यानि वस्तून्यासन् द्रविडशास्त्रिणस्तानि सर्वाणि तदीयादेशानुसारं गणपतिशास्त्रिसुतायै राजगुरुश्रीगोपीनाथशास्त्रिणे शिष्येभ्यश्च वितीर्णानि । दैनन्दिन्यादीनि चात्रैव सुरक्षितानि ।

संस्थानप्रथमाधिवेशने सदस्यैर्निर्णीतं यद् भवननिर्माणकार्ये संचितराशेर-धिको द्रविणराशिर्व्ययित उत्तमर्णादादाय । पञ्चसहस्रमितो द्रविणराशिरपाकृत ऋणादुपरितनभागं भवनस्य वितीर्य भाटकेन कस्मैचनावश्यकत्वसम्पन्नाय । काले समतिक्रामति कालमहिम्नासक्तेषु केषुचित्ततो विमुखतापन्नेषु विधानस्थ-नियममभिलक्ष्य रिक्तस्थानपूर्तिः सर्वैः सदस्यैरेकमत्येन विहिता । द्वित्रान् विहायाधिकतया समाविष्टेषु नवसदस्येषु नवीबभूव संस्थानमिदम् ।

स्वार्थपरतामुदीक्ष्य साम्प्रतिकपुरुषाणामर्थप्रधानयुगेऽस्मिन्नखिलानां सदस्यानामेकप्रकृतित्वासम्भवात् कदाचन लोभायत्तचेतसः स्वप्रभावेण संस्थानस्य नष्टप्रायतां विदध्युरिति कतिचनसदस्यानां परामर्शेन चिरात्राय स्थैर्यायास्य हस्तान्तरणाय बहवो राजकीयाराजकीयसंस्थाधिकारिणो निवेदिताः परं प्रायशः सर्व एवाधिकारिणः खण्डशश्छिन्नभिन्नरूपेणादातुं सन्नह्यन्ति स्म केचिन्न तु यथावस्थितरूपेण । इत्थंकारं मन्दीकृतोत्साहोऽपि "किं दूरं व्यवसायिनां"-मित्युक्तिं चिन्तयन्निरन्तराध्यवसायशीलतया लक्ष्यसिद्धौ साफल्यमलभतायञ्जनः।

विधिविधानज्ञो राजस्थानराज्यसर्वकारः संस्कृतसङ्गमं ( संस्कृत अकादमी) पृथगवास्थापयत् संस्कृतोन्नयनाय प्रचाराय चास्य । डा. मण्डनमिश्र-श्चास्याः प्रथमाध्यक्षपदमध्यासितः । सभवनपुस्तकालयहस्तान्तरविधित्सामुप-

अस्य कार्यालयीयसचिवेन सङ्गमस्य डा. महोदयस्याभिलाप एतद्ग्रहणाय प्रकटितः । ससमयमविलम्बितमूरीकृतमेतदीयादानं सदस्यसमीहां संसाध्य ससम्मदमध्यक्षेण। पुस्तकालयस्य परिवर्तनपरिवर्धनशास्त्रिस्मारकस्थापनादिभिः सन्तोषिताः सदस्या अपूर्वसमुन्नतिमाधाय ।

११/३० घासीटोला

बनारस सिटी

१७-३-४०

श्रीमत्सु श्रद्धास्पदेषु पूज्यवरश्रीवीरेश्वरशास्त्रिश्रीपादेषु सविनयं त्रिसन्ध्यं साष्टाङ्गं प्रणम्य निवेदयते। श्रीमतां शुभाशीर्वादपत्रं लब्धम् । पूर्वपत्रे श्रीपादैर्यथा वा समादिष्टमासीत् तथैव मम वामकरे स्थिता पीडा नाद्यापि समूलं विनष्टा। तैलमर्दनादिरुपचारोऽपि समयाभावादालस्यदोषाच्च न यथावत् कर्तुं पारितः। इत्थमपि श्रीपादीयशुभानुध्यानमहिम्ना दैनन्दिनव्यवहारे न किमपि प्रतिबन्धकं भवति। पाठशालागृहसंस्कारार्थं श्रीमद्भिर्यद् द्रव्यं प्रेषितं तद्विषये श्रीयुत पं० चन्द्रशेखरशास्त्रिणः पाठशालीयः कारुवरश्च पृथक् पृथक् दृष्टौ पृष्टौ च भवनमपि पुनर्निध्यातम्। निष्कृष्टार्थस्त्वयम् — श्रीचन्द्रशेखरशास्त्रिभिः पूर्वं कारुवरे विश्वासं निधाय संस्कारोपकरणक्रयणादौ तत्कथनानुसारेणैव द्रव्यं दत्तमासीत्, इदानीं पुनरनुसन्धाने कारुवरस्य कश्चिदसत्यव्यवहारः प्रमाणितः स च तेनाप्यगत्या स्वीकृतः, इत्थं २५/ रूप्यकाण्यवशिष्टानि इतः परं श्रीमतामागमनानन्तरमेवावशिष्टं कार्यं भविष्यतीति निश्चितम्। पुस्तकानि तु श्रीमद्भिरात्मना सहैवात्रानेतव्यानीति मे मतं तत्र वयोऽधिको भवेदिति निश्चितमेव।

अचिरादेवात्रत्या परीक्षा समाप्ता। इदानीं परीक्षणकार्यं प्रचलति। एप्रिलमासतोऽस्माकं पूर्वप्रतिबद्धा वेतनवृद्धिर्भविष्यतीति श्रूयते। श्रीमतां V.N. Mehta I C S महोदयानामाकस्मिकनिधनवृत्तं तु श्रीमद्भिः श्रुतमेव स्यात्। गतनवंबर - दिसंबरमासयोस्ते काश्यामेवासन्, तदानीं बहुवारं तैः सह समागम आसीत्। पञ्चदशीमध्येतुकामास्ते मया पाठारम्भं कृत्वा चिरायुष्मतः श्रीवटुकनाथस्य हस्ते विन्यस्ताः, स च तान् एकमासपर्यन्तं प्रत्यहं प्रातर्गत्वा पाठयति स्म। तस्य विषयेऽपि तेषां महती श्रद्धा सञ्जाताऽऽसीत्। मम विषये तेषां स्नेहस्तु

प्राचीन एवासीत्। आगामिजूनमासे मद्विषये तः किमपि सविशेषं चिकीर्षित-मासीत्, परन्त्विदानीं तेषामाकस्मिकनिधनेन ममात्मनो विषये, चिरञ्जीविनो बटुकनाथस्यापि विषये भविष्यत्कालिकी आशा नष्टप्रायैव। इत्थमपि महर्षि-कल्पानां श्रीमतां शुभानुध्यानमहिमा सकुटुम्बस्य मे शिरसि जागर्तीति यथासमयं सर्वे मनोरथाः सम्पत्स्यन्त इति बाढं विश्वसिमि। पुनरप्येकवारं यदि श्रीमन्तः स्वाप्निकप्रत्ययं परीक्षेरंस्तर्हि वरम्। श्रीमतां राजगुरूणां गोपीनाथशास्त्रि-द्राविडानां राजकुमारगुरुपदे नियोगं श्रुत्वा सत्यमेव नितरां प्रीतोऽस्मि।

तदर्थं ते नूनं सभाजनीयाः। इदानीमपि तैर्यद्यात्मनो राजगुरुत्वं स्मरद्भिः श्रीमतामादर्शं पुरो निधाय वर्तिष्यते तर्हि तेषां, ब्राह्मणपण्डितानां, राजकुलस्य, हिन्दुत्वस्य चोपकारो भवेत्।

कदा वा श्रीमतामत्रागमनं भवेदिति प्रत्यहं प्रतीक्षमाणोऽस्मि।

श्रीमतां वशंवदोऽनुग्रहकाङ्क्षी

नारायणशास्त्री खिस्ते

वाराणसेयाः श्रीनारायणशास्त्रिखिस्ते सहोदयाः एतेष्वतीव श्रद्धालवः सर्वमपि कार्यजातमेतत्प्रदर्शितदिशैवारीरचन्। स्वकीयायुष्मतो बटुकनाथशास्त्रिणो वृत्तिविषये स्वाप्निकं वृत्तं जिज्ञासुभिः पत्रमिदं संस्कृतमाध्यमेनैव लिखितम्। दविष्ठैरपि शास्त्रिभिः प्रार्थिता इमे स्वकीयतनूजन्मनो भविष्यत्कालिकीमभि-वृद्धिं कामयमानैराशीर्वचांसि प्रदातुम्। अग्रेतनं पत्रं श्रीचिन्नस्वामिशास्त्रिणः स्वभागिनेयाभिनियोगाय प्रत्तं तदप्यविकलमुद्ध्रियतेऽनेन सहैव।

Vedavisarada Mimamsakesari
Panditsarvabhauma
Principal, A. Chinnaswami Sastri
S. V. Sanskrit College

Tirupati
(South India)
Dated 19-9-1940

श्रीमतां पूज्यचरणानां चरणयोः सहस्रशः प्रणिपत्य विज्ञापयति अहमद्य स्थानमिदं परित्यज्य पुनः काशीमेवाचिरात् गन्तास्मि। मन्ये आगामिनि ग्रीष्मे श्रीचरणानां दर्शनसुखमवश्यमनुभविष्यामीति।

अनेन पत्रेण प्रेषितेषु पत्रेषु निर्दिष्टः श्री एम. एस. कृष्णमूर्तिशास्त्री मम भागिनेयः। अयं मद्रनगरस्थाधिकरणे वावदूकः (Advocate of Madras High

Court), सप्तवर्षाण्ययं स्वकार्यं साधु निर्वहति। अस्य योग्यताविषये सहप्रेषितानि पत्राण्येव प्रमाणम्। अतीव गुणी वृद्धसेवी वाग्मी कार्यदक्षः शान्तस्वभावः कुलीनः प्रतिभावान् राजकार्यनिपुणश्च। अयं तत्र Secretary of Public Service Cammission स्थानार्थं प्रार्थी। गुणैर्विद्यया च सर्वथायं तत् स्थानमर्हति। श्रीमद्भिरत्र किञ्चिदपि वाक् प्रचाल्येत अवश्यमयं स्थानं प्राप्स्यति। अहमपि महदुपकृतो भवेयमित्यस्ति न संशयलेशोऽपि। अतः श्रीचरणान् सनिर्बन्धमभ्यर्थये—यदयं मम भागिनेयः स्थानं तत् यथा प्राप्नुयात् तथाऽनुग्रहः कार्य इति। क्षन्तव्योऽहं महापराधीयत् - स्वार्थवशात् श्रीमतां श्रमं दातुमुद्युक्तः। अनेन पत्रिकाप्रकाशनानुसारं (according to the advertisement) प्रार्थनापत्रं To the Chairman Public Service Commission, Jaipur State प्रेषितम्। यस्य प्रतिलिपिः पत्रेणानेन सह प्रेषिता। प्रतिपत्रेणानुग्राह्योऽहमित्यभ्यर्थये। प्रतिपत्र-प्रेषणस्थानम—

Pandit A. Chinnaswami Sastri
Care of M.S. Krishnamurti Sastri B.A.B.L,
Advocate, 45 Lug church Road, Mylapore, Madras

इति सर्वदा श्रीचरणकृपैकशरणः

विनीततमः अ. चिन्नस्वामिशास्त्री

# श्रीवीरेश्वरजी शास्त्री

□ पं. गिरिधर शर्मा
'नवरत्न'

काञ्चीमण्डलमण्डनः श्रुतधरोऽभूत् सोमयाजी महा-
नापस्तम्बिवरेण्य - वात्स्यतरणिः संस्तैत्तिरीयो द्विजः ।
तद्वंशे खलु पञ्चविंशतितमः संख्यावतामग्रणी-
रासीद्वेदनिधिर्विचारनिपुणो यज्ञेश्वरो दीक्षितः ॥ १ ॥

सुब्रह्मण्यबटुः कुशाग्रधिषणो वैशिष्ट्यमाप्तुं विदां
चित्तूरीयवलत्तुरान्तरगतात् कालाभिधाद् ग्रामतः ।
काञ्चीमण्डलतो जगाम बटुभिर्विद्याभिकामैः समं
शास्त्राज्ञानपरो विशेषविषयज्ञानोत्सुकः काशिकाम् ॥ २ ॥

सुब्रह्मण्यबुधेन तत्र विबुधानाराध्य विद्यार्जिता-
भून्नैयायिकभास्करः स भगवान् साहित्यपारङ्गतः ।
यं लक्ष्मीः शुचिबज्जटङ्कविबुधश्रीकृष्णकन्या वरं
धन्या प्राप्य बभूव वेदविबुधो कौण्डिन्यगोत्रोद्भवा ॥ ३ ॥

सुब्रह्मण्यबुधादभूत् शिवपुरीमध्ये महाऽऽनन्दिनी
लक्ष्म्यां सत्कनकाभिषिक्तकुलजायां काशिकायां सुता ।
आषाढे वसुपूर्णनन्दमहिके कृष्णे दले पावने
गङ्गा मानवपावनी गुणवती पूज्या गुरुर्भूधवैः ॥ ४ ॥

अस्या वत्सलतास्पदं शुचितरो भ्राताऽभवत् स्नेहभूः
शास्त्रेन्द्वङ्कमहीमिते शरदि सद्भाद्रे च पक्षे सिते ।
सप्तम्यामनुराधया विलसिते काश्यां रात्रौ शनौ शोभनै
जातो लक्ष्म्युदराद् बृहस्पतिमतिर्वीरेश्वरो वाङ्निधिः ॥ ५ ॥

सुब्रह्मण्यपितुः प्रणम्य चरणौ यः प्राप्तवान् पात्रतां
श्रीयागेश्वरपादपद्ममधुपो यः पीतवान् वाक्सुधाम् ।
श्रीगङ्गाधरनिर्मलोत्तममतिः शिष्यान् वितृष्णान् व्यधात्
स श्रीवाङ्मयमूर्तिरेष भगवान् वीरेश्वरः पण्डितः ॥ ६ ॥
दिव्या हैमवती बुधेन रचिता यागेश्वराख्येन या
श्रीमत्पाणिनितन्त्रतत्वभरिता गूढार्थविद्योतिनी ।
प्राकाश्यं गुरुभक्तिभावभरितो नेतुं य उद्युक्तवान्
सोऽयं शेखरतत्त्वदीपनमणिर्वीरेश्वरो वाक्पतिः ॥ ७ ॥
श्रीयागेश्वरपण्डितादधिगतं तत्पाणिनीयं परम्
श्रीगङ्गाधरशास्त्रितश्च सकलं साहित्यतत्वं वरं ।
सुब्रह्मण्यपितुश्च येन निखिलं वेदोपवेदादिकम्
लक्ष्मीसूनुरयं स राजतितरां वीरेश्वरः पण्डितः ॥ ८ ॥
सुब्रह्मण्यसुतेन येन हृदये शब्दोऽपरोक्षीकृतो
गङ्गासोदरतां गतेन विमला कीर्तिः सुसम्पादिता ।
येन स्वीयसहस्रशिष्यनिवहेऽहं स्वीकृतः प्रेमतो
लक्ष्मीसूनुरयं विभाति विबुधाधीशः स वीरेश्वरः ॥ ९ ॥
यः पापाशास्त्रिवर्यादतुलगुणनिधेर्मातुलास्वादनं यत्
वात्सल्यं प्राप्य विद्यां बहुबहुलविधां लब्धवान् सद्गुरुभ्यः ।
यस्मिन् श्रीकान्तिचन्द्रोऽप्यतुलजयपुरामात्यवर्योऽपि रक्तः
स श्रीवीरेश्वरोऽसौ जयति गुरुवरः सर्वतन्त्रस्वतन्त्रः ॥ १० ॥
काशीशेषतया प्रसिद्धिमगमद् यः काशिनाथो गुरुः
श्रीयागेश्वरपण्डितः समभवत्तस्यैव शिष्यो महान् ।
राजारामबुधः स यस्य सगुरुः शिष्यो यदीयोऽभवत्
शब्दार्थाधिपबालशास्त्रिविबुधो गङ्गाधरादेर्गुरुः ॥ ११ ॥

श्रीगङ्गाधरशास्त्रिणः शिवकुमारा रामकृष्णा द्विजाः
श्रीदामोदरदाक्षिणात्यविबुधा अन्येऽप्यनेके विदः ।
विद्वान्सोऽखिलशब्दशास्त्रपटवो नानाकलादर्शना
यच्छिष्याः भुवि भान्ति तत्त्वनिपुणा तम्यः स बालो गुरुः ॥ १२॥

ये केचिद् भुवि सन्ति शाब्दिकवरा विद्वत्प्रिया दर्शन-
प्रेमाणो रसतत्त्ववेदनिपुणाः शृण्वन्तु ते मद्गिरम् ।
ब्रह्मर्षि भगवन्तमार्यचरितं वीरेश्वरं सद्गुरुं
सर्वज्ञाननिधिं निवेश्य मनसि स्वीये तनुध्वं यशः ॥ १३ ॥

वाग्मी विश्वविलक्षणो विमलहृद्विद्वेषिवैश्वानरो
विद्वान् वैभववान् विशालहृदयो विद्यावतां वल्लभः ।
वेत्ता वैदिकवाङ्मयस्य विदितो वैदुष्यवारान्निधि-
र्विश्वे विश्वविवेकवान् विजयते वीरेश्वरो वाग्वरः ॥ १४ ॥

झालरापाटनवास्तव्याः राजगुरुपदालङ्कृताः श्रीगिरिधरशर्मनवरत्न-महोदया जयपुरमधितिष्ठन्तः शास्त्रिवर्येभ्यः कृताध्ययनाः सविशेषं श्रद्दधति स्म । यद्यपीमे किञ्चित्कालानन्तरं वाराणसीं गत्वा शास्त्रिसतीर्थ्येभ्यो गुरुभ्यो गङ्गाधर-शास्त्रिभ्यो विशेषाध्ययनं कृतवन्तोऽपि गङ्गाधरशास्त्रिवर्ये न तादृशीं श्रद्धां विदधुर्यादृशी वीरेश्वरशास्त्रिमहोदये श्लोकचतुर्दशीदर्शनेन तथा यत्र तत्र स्व-रचितग्रन्थेषु मङ्गलादिभिः प्रतीयते ।

इत्थङ्कारमेव भट्टश्रीमथुरानाथशास्त्रिमहाभागैर्जयपुरवैभवसुधीचत्वरे श्लाघिताः शास्त्रिवर्याः पद्यद्वयेन ।

# मुख्यशिष्याणां संक्षिप्तः संस्तवः

□प्यारेमोहन शर्मा

श्रीवीरेश्वरशास्त्रिणां शिष्येषु प्रमुखस्य श्रीजगदीशशर्मणो जन्म साहित्य-वेदान्ताचार्याणां दाधीचवंशावतंसानां श्रीबिहारिलालशर्मणां गेहे १९६७ मिते वैक्रमाब्दे श्रीमत्यां पार्वत्यां जयपुरमण्डलस्य फागीतहसीलान्तर्गतसमेल्याख्यग्रामे जातम्। महाभागस्यास्याग्रजो वासुदेवेति नाम्ना विद्यते।

महोदयस्यास्य प्रारम्भिकी शिक्षा समेल्या - ग्रामेऽभवत्। ततश्चाग्रेतनीं शिक्षामधिगन्तुं पित्राऽसौ महाराजसंस्कृतकालेजे जयपुरे प्रवेशितः। तत्र स्वप्रतिभाबलात् सतीर्थ्यान् पृष्ठतः कुर्वन्नसौ प्राक्तनजन्मसंचितां विद्यां त्वरितया गत्या गृहीतवान्। १९२६ मिते ख्रिष्टाब्दे षोडशवर्षदेशीयेनानेन साहित्योपाध्यायपरीक्षा प्रथमश्रेण्यां समुत्तीर्णा।

चतुर्दशवर्षदेशीयस्यैवास्य विवाहो जयपुरमण्डलान्तर्गत निवाईग्रामसमीपे डांगरथलग्रामवासिनां मिश्रश्रीरामनारायणमहाभागानां कन्यया राधिकया सह सञ्जातः। १९२८ मिते ख्रिष्टाब्दे श्रेष्ठैरङ्कैः साहित्यशास्त्रिपरीक्षामुदतरत्। ततश्च साहित्याचार्यश्रेण्यां प्रवेशं लब्ध्वा पितृपादेभ्यः साहित्यविभागाध्यक्षेभ्य एव लाक्षणिकग्रन्थान् सरहस्यमध्यगीष्ट। एकविंशतिवर्षकल्पे वयसि लब्ध-साहित्याचार्यपदवीकोऽयं सर्वाचार्यपरीक्षायां सर्वप्राथम्यात् उदयपुराधीश्वर-महाराणाफतेहसिंहप्रदत्तस्वर्णपदकेन सम्मानितः।

साहित्यशास्त्रिकक्षायामध्ययनं कुर्वतानेन मुखं व्याकरणं स्मृतमित्युक्तिमनुसृत्य व्याकरणाध्ययनमपि समीहितम्। स्वेप्सितपूर्त्यै तात्कालिका वैयाकरणाः संप्रार्थिताः परन्तु सर्वैरेव केनाप्यपदेशेनाध्यापनासमर्थता प्रकटिता। किन्तु व्याकरणाध्ययनस्य प्रबलेच्छया प्रार्थिताः पितृचरणाः प्रत्यबोधयन् यत् श्रीवरेश्वरशास्त्रिणोऽन्तिकं गच्छ। पितुरादेशमवाप्य परेद्युरेवासौ ग्रीष्मे मध्याह्ने श्रीवीरेश्वरशास्त्रिणः सेवायां समुपस्थितोऽभवत्। दत्तपरिचयः श्रीवीरेश्वरशास्त्रिणागमनप्रयोजनं पृष्टम्। विनम्रेणानेन सर्वं वृत्तं निवेदितम्। सर्वं श्रुत्वा तत्क्षणं न किमप्युत्तरितम् परन्तु मौनं स्वीकृतिलक्षणं मन्यमानोऽसौ प्रत्यहं मध्याह्ने शास्त्रिणो दर्शनार्थं जगाम। अपगतेषु केषुचिद्दिनेषु शास्त्रिणोक्तं यत् प्रत्यहं नियतसमये मध्याह्ने द्वादशवादने समागन्तव्यम् पठितपाठस्य च प्रत्यहं स्मरणमावश्यकम् अन्यथा वयं नैव पाठयिष्यामः। ततश्च प्रतिदिनं मध्याह्ने ग्रीष्मकाले द्वादशवादने नियतसमयेऽध्ययनाय गुरोरन्तिकं गच्छति स्म। नियतसमयसमागमपरीक्षायां सफलोऽसौ गुरोः प्रियतमः शिष्यः समभवत्। साहित्याध्ययनेन साकं श्रीवीरेश्वरशास्त्रिणः सकाशात् सिद्धान्तकौमुदीमधीत्य वाराणसेयव्याकरणमध्यमापरीक्षामुदतरत्। ततश्च व्याकरणस्य मनोरमाशब्दरत्नलघुमंजूषापरिभाषेन्दुशेखरादीनधीतवान्। श्रीशास्त्रिणां गृहेऽन्येऽपि छात्रा विभिन्नान् विषयान् पठितुमायान्ति स्म। तैः सह गुरोराज्ञया तेषां तेषां विषयाणां पाठोऽप्यनेन श्रुतः। यथा यथा गुरुणास्याध्ययने रुचिर्दृष्टा तथा तथा तेन ज्ञातं यदन्येषां शास्त्राणामप्यध्ययनमनेन कर्तुं शक्यते। अतः मीमांसादर्शनवेदान्तपरिभाषाव्युत्पत्तिवादशक्तिवादसांख्यदर्शन - सांख्यकारिकापातञ्जलदर्शनान्यध्यापितानि। इत्थं गुरोः कृपया महानुभावोऽसौ संस्कृतवाङ्मयस्य नानाशास्त्रेषु नैपुण्यमाधिजगौ।

शिष्यस्य विश्वसनीयतां सम्यक् परीक्ष्य श्रीशास्त्रिवर्यः गोपनीयकार्येषु अपि महानुभावमेनं न्ययुनक्। श्रीशास्त्रिणा सम्पूर्णानिपुराणानि महाभारतं चानेन श्रुतानि ततश्च स्वकीयान्तरङ्गकार्येष्वप्यसौ नियोजितवान्। वार्धके यदा गुरुरन्धः संजातस्तदा तस्य चिकित्सार्थं अन्यैः परिकरवर्गैः सह महानुभावोऽयमभ्युदयपुरमगच्छत्। प्राप्तनेत्रज्योतिः शास्त्री पुनरध्ययने शीघ्रमेव संलग्नः फलतो नेत्रज्योतिरस्तंगतम्। परमन्धस्य गुरोः गृहं गत्वाऽसौ प्रत्यहं तस्य सेवामकरोत्। अन्तिमे वयसि गुरोरिच्छानुसारं तच्छिष्येण श्रीशार्दूलसिंहवर्मणा प्रदत्ते गणगौरी-

मार्गस्थभवने श्रीवीरेश्वरपुस्तकालयं संस्थाप्य पञ्चत्रिंशद्वर्षाणि यावदसौ पुस्तकालयमन्त्रिपदे कार्यं कृत्वा भविष्यति सुरक्षादृष्ट्या पुस्तकालयं संस्कृतकालेजाय प्रायच्छत् ।

अस्मिन्नेवान्तराले दैवदुर्विपाकात् पितृचरणा रुग्णाः सञ्जाताः । तेषां रुग्णावस्थायां १९३३ मिते ख्रिष्टाब्दे मासद्वयं यावन्महाभागेनानेन महाराजसंस्कृतकालेजे शास्त्र्याचार्यकक्षयोरधीयानाश्छात्रा अध्यापिताः । पक्षाघातरोगेण पितृपादेषु दिवंगतेषु तात्कालिकैः जयपुरमहाराजसंस्कृतकालेजाध्यक्षैः महामहोपाध्यायपण्डितश्रीगिरिधरशर्मचतुर्वेदैरनुरुद्धैरेतैरवैतनिकतया प्राध्यापकान्तरनियुक्ति यावत् - अध्यापिताः शास्त्र्याचार्यकक्षाच्छात्रा अतितरामतुष्यन् । तदनन्तरं महानुभावोऽयं फतेहपुरनगरे शेखावाटीसंस्कृतमहाविद्यालये प्राचार्यपदे कार्यं प्रारब्धवान् । तत्रभवता व्याकरणशास्त्रं साफल्येनाध्यापितम् । वर्षद्वयं यावत् तत्र कार्यं कृत्वा खेतड़ीसंस्कृमहाविद्यालये प्राचार्य पदेकार्यमकरोत् । १९३७ मिते ख्रिष्टाब्दे महाराजसंस्कृतकालेजे कार्यं प्रारब्धवान् । तत्र विद्यालयविभागे कार्यं कुर्वतानेनाध्यक्षस्याज्ञयाचार्यशास्त्रिकक्षायामधीयानाश्छात्राः साफल्येनाध्यापिताः ।

१९४४ मिते ख्रिष्टाब्दे सामान्यसंस्कृप्राध्यापकपदे पदोन्नतिं लब्ध्वा न्यायव्याकरणादिविषयानध्यापिपत् । किञ्चित्कालानन्तरं लोकसेवायोगतश्चयनितस्तत्रैव साहित्यविभागाध्यक्षपदमवाप । संस्कृतवाङ्मयस्य साहित्यव्याकरणन्यायदर्शनज्योतिषादिषु सर्वासु शाखासु श्रीमतामसाधारणोऽधिकारः ।

१९६७ मिते ख्रिष्टाब्दे राजस्थानराज्यपालमहोदयैः सर्वोत्तमशिक्षकत्वेन सम्मानितः । अस्मिन्नेव वर्षे राजस्थानमुख्यमन्त्रिणा माध्यमिकशिक्षामण्डलतत्त्वावधाने ग्रन्थोपहारैरभ्यर्चितः ।

१९८३ मिते ख्रिष्टाब्दे भारतसर्वकारेण प्रौढपाण्डित्यक्रमे राष्ट्रपतिपुरस्कारेण सम्मानितः । समये समये चान्याभिर्नानासंस्थाभिः स्ववैदुष्यायायं सभाजितः ।

ससम्मानं स्वाभिमानपुरःसरं राज्यसेवां परिसमाप्य सेवानिवृत्तोऽसौ राजस्थानस्य भूतपूर्वमुख्यमन्त्रिभिः श्रीहीरालालशास्त्रिभिः सञ्चालिते

एशियामहाद्वीपे स्त्रीशिक्षार्थं प्रसिद्धे वनस्थलीविद्यापीठे बहूनि वर्षाणि वेदमहाविद्यालयस्य प्राचार्यपदे मानद - आचार्यपदे च कार्यं कृत्वा सम्प्रति दशमीं गतोऽपि गेहे समागतानां शोधार्थिनां मार्गदर्शनं करोति ।

भारतीसंस्कृतमासपत्रिकायाः प्रमुखोऽयं सम्पादकः । बिहारिस्मारिका, आनन्दनन्दनम्, बीरेश्वरप्रत्यभिज्ञानम्, शिवप्रत्यभिज्ञानम् मुक्तकरचनादयोऽनेन लिखिताः सम्पादिताश्च ।

श्रीरेश्वरशास्त्रिणां शिष्येषु प्राचीनपरम्परायाः प्रौढो विद्वानसावेक एवेति शङ्काशून्यं वचः । राजस्थानसंस्कृतसाहित्यसम्मेलनेषु नैकशः साहित्यपरिषदोऽध्यक्षपदमलङ्कृतमनेन । महाभागादस्मात् राधादेव्यां त्रयः सूनवः समुत्पन्नाः । तेषु सम्प्रति ज्येष्ठः श्रीसत्यनारायण एव विराजते ।

अन्ते च राष्ट्रपतिसम्मानिताः श्रीनवलकिशोरकाङ्करमहाभागाः श्रीमतां सर्वाङ्गीणं व्यक्तित्वं परिचाययन्तो लिखन्ति—

शास्त्रे व्याकरणे प्रवीणधिषणाः साहित्यपारङ्गमाः
साङ्गे वेदचतुष्टये धृतधियो लब्धास्पदा ज्योतिषे ।
न्याये सांख्यनयेऽथ धर्मविषयेष्वप्युच्छलद्वैभवाः
सन्त्येते जगदीशशर्मसुहृदो विद्यावदग्रेसराः ।।

□

# शिष्यसंस्तवः

## पं० श्रीगिरिधर शर्मा नवरत्नः–

कामवनात्प्रस्थाय श्रीबलदेवभट्टो जयपुरत उदयपुरं प्रति यातस्तत्र किञ्चित्कालाधिवासानन्तरं सन्धित्सुरुदयपुराधीश्वर इदमीयनीतिनैपुणीप्रभावितः कोटाधीशाभ्यासमेनं प्रजिघाय । व्यवहारविद्वत्तावशगो भालावाडनरेशो गुरुपदेन सम्मानितवान् ।

कोटाधिपतिपरतन्त्रतोन्मुक्तः प्राप्तस्वराज्यस्वातन्त्र्यो भालरापत्तनपरिवृढो गुरुवद् गुरुपुत्रेषु वर्तितव्यमिति मन्वान आत्मना समं गणेशभट्टमपि नीत्वा स्वराज्ये स्वगुरुमकल्पयदनन्तरं व्रजेश्वरभट्टमपि तदास्पदमध्यासितवान् ।

व्रजेश्वरभट्टात्पन्नीदेव्यां वसुरामनिधिभू ( १९३८ ) मिते वैक्रमाब्दे शुक्रशुक्लपक्षाष्टमीतिथौ जनुपालञ्चकार झालरापत्तनभुवमेकादशवादनवेलायामह्नि। दिनाङ्कश्च जूनमासस्य षष्ठश्चन्द्राष्टगजेन्दुमितख्रिष्टवर्षे। तृतीयस्यास्य शिशोर्जन्मनानन्दममन्दमविन्दतां पितरौ। धर्मशास्त्रानुसारमेतस्य दशमेऽह्नि गिरिधरनामधेयं कृतवाञ्जनको व्रजेश्वरः आत्मा वै पुत्रनामासीति ध्यायन्। शैशवोचितक्रीडाकूर्दनादिभिः शैशवमतिवाह्याक्षराभ्यासेन समं विद्याग्रहणोन्मुखः पितृपादादेव प्रारम्भिकशिक्षया सार्धं साहित्य-दर्शनशास्त्रे अधिजगे गिरिधरलालः।

नोरतीजननिश्च धर्मशास्त्रवचनमनुपालयता श्रीव्रजेश्वरभट्टमनुरुन्धता पाणिरग्राह्यतात्मदुहितुर्गिरिधरम्। यवनसाम्राज्यकालिकप्रभावस्यानपगमात्तत्कालप्रचलितयवनानीमपि जग्राहासावाङ्ग्लभाषामपि च।

सम्पन्नोपयमनसंस्कारोऽयं पितृचरणानां कार्यभ्यस्ततया जयपुरमेव स्वकीयाध्ययनकेन्द्रमचीक्लृपत्। तत्र नागरजातिसमुद्भवकान्हजीप्रशनवरतो विद्याध्ययनं प्रारभत। तस्मिन्नेवानेहसि निखिलनिगमागमनिष्णातेभ्यः श्रीवीरेश्वरशास्त्रिचरणेभ्यः शब्दानुशासनमशिक्षत।

सप्तदशवर्षवयस्कं श्रीगिरिधरनवरत्नं षोडशतापिकी धर्मपत्नी नोरतीनामधेया विहाय परलोकप्राघुणिकतामशिश्रियत्।

जयपुरनगरस्य "म० म० शिवदत्तदाधिमथेन" वाराणसीदेशीयता प्रतिपादिता "वाराणसीयत सदा जयपत्तनं मे विद्वद्विलासिभिरिदं सुमनीषिवर्यैः" इत्यादिना। पुनरपि पत्नीविरहव्याकुलतापन्नखिन्नमनस्कतामपनेतुं "एका क्रिया द्व्यर्थकरी प्रसिद्धे"त्याभाणकमन्वर्थयितुं वाराणसीं प्रययौ। काशीवासविश्वनाथदर्शनापगमितशोकः महामनाः प्रभूतविविधज्ञानसम्पत्तिसंचयाय "विद्याकामस्तु गिरिशम् 'ज्ञानं सदाशिवादिच्छेत्, वाक्यद्वयस्यार्थमनुसरन् साक्षाद् गङ्गाधरावतारमगाधज्ञानात्मानं गङ्गाधरं गुरुमुपासाञ्चकारात्ममनोऽभिलषितसम्पादनाय निरन्तरम्। गुरुगङ्गाधराभ्यासवासाय समीहा दर्शिता "भज सदैव शुचिविश्वगुरु-गङ्गाधरपदधाम।" (भवानीसिंहसद्वृत्तपुष्पगुच्छे-पृ० ११)। यत्र तत्र स्व-निर्मितकृतिषु गुरूणां वन्दना विहिता—

"वन्दे श्रीगङ्गाधरवीरेश्वरगुरुपदौ भक्त्या ।
वन्दे प्रश्नवरेन्दुं विठ्ठलसुतकाह्नजीव्यासम् ।।
( गि० स० श० 134 )

गुरुश्रीवीरेश्वरश्रद्धातिशयेनैदमीयगुरवोऽपि परगुरुतया सश्रद्धं वन्दितास्तदीयसहचरत्वेन लक्ष्मीनाथद्राविडोऽपि वन्दनीयकोटौ समावेशितः—

गङ्गाधरदामोदरशिवकुमारमिश्ररामकृष्णमुखाः ।
लक्ष्मीनाथद्रविडा भाष्यतत्त्ववेदिनो वन्द्याः ।।

एतावन्त एव नान्येऽपि द्राविड़शास्त्रिणां ये गुरवः काशीनाथराजारामयागेश्वरबालशास्त्रिप्रभृतयस्तेऽपि वन्दनयापचिताः । परगुरूणां गुरोरतिशयितत्वात् । ( गि० स० श० ११ । १२ ) सर्वापेक्षया द्रविडश्रीवीरेश्वरशास्त्रिपादा नितरामर्चनीयाः शब्दशास्त्रप्रणेतृतुल्यकक्षत्वात् – तथाहि–

वेदशास्त्रतत्त्वज्ञो वैयाकरणेषु पाणिनिः साक्षात् ।
पतञ्जलेर्नवावतारोऽर्च्यः श्रीवीरेश्वरद्रविडः ।।
( गि० स० शती २११ )

अमरवचनपीयूषस्वर्गनदी वहति यन्मुखाद्विमला ।
तं ज्ञानैकनिधानं वन्दे वीरेश्वरं स्वगुरुम् ।।
( नवरत्न नीतिः 5. 6. 7. )

श्रीवीरेश्वरगुरुवरपदाब्जसुमनोरजोरसाविष्टः ।
किमपि किमपि मृदु गुञ्जन् गिरिधरशर्मा मधुव्रतो जयते ।।
( 178 ) ( नागरतंत्र )

एवं भक्त्याऽतृप्यन्नन्तेवासिमुख्यो गिरिधरः "वीरेश्वरशास्त्री" शीर्षके गुरुगाथां बहुशो गीतवान्विविधविधाभिः ।

शास्त्रिवर्यस्यापि स्नेहः सर्वातिशायी विलोक्यतेऽत्रेति दैनन्दिनीलेखेभ्योऽनुमीयते ।

यथैव कवितल्लजस्य नवरत्नस्य दृढा भक्तिरपूर्वा श्रद्धा च गुरौ वीरेश्वरे तथैव गुरोरपि स्नेहातिशयो नवरत्ने तत्तदब्ददैनन्दिनीलेखैरवगम्यते स्फुटमेतत् । द्वितीयविवाहविषये शास्त्रिवर्यस्य पूर्णः प्रयासः सहयोगश्चेदानीं पितृदेशीयतया । वेदाभ्रनवभूमितख्रिष्टाब्दस्य मार्चमासस्य नवमतारिकायामुल्लेखः "गिरिधरलालस्य विवाहनिश्चयो वाग्दानेन" दशमतारिकायां लिखति "गिरिधरवाग्दाननिमित्त-शर्कराफलानि प्राप्तानि" इत्यादिना ।

वाराणसीवाससमये शिक्षाग्रहणायोनविंशतिवर्षवयःकल्पेन गिरिधरेण "भवानीसिंहकारकरत्नम्" विरच्य काशीस्थविपश्चिन्मण्डली 'विस्मया' ब्धौ निमज्जिता । तादृशप्रतिभावैलक्षण्यमवेक्ष्य सहसैव विद्वद्भिरेकस्वरेण त्वं नवरत्नोऽसी, ति प्रोच्य नवरत्नोपाधिना मण्डितोऽयम् ।

प्रयागस्थाखिलभारतीयहिन्दीसाहित्यसम्मेलनेनापि "साहित्यवाचस्पति," रितिपदप्रदानेन समलङ्कृतोऽसौ । कोटानागरिकभक्तजनाराध्यभगवन्मथुरेशमन्दिरवासिशुद्धाद्वैतसम्प्रदायसुधीभिः शुद्धाद्वैतशार्दूलः, इत्युपाधिनाश्लेषितः ।

प्राच्यविद्यामहार्णवकाव्यालङ्कारसाहित्यशिरोमणिव्याख्यानभास्कराभिनवभवभूतिप्रमुखोपाधिपञ्चकेनापि भूषितो भूतिनेव भवभूतिरेषः ।

साहित्यमयजीवनः साहित्यसुधां प्रवाहयितुं झालरापत्तनै स्वकीयावासस्थाने कविरयं हिन्दीसाहित्यसमितेर्झालावाडपुस्तकालयस्य स्थापनायामदभ्रयोगदानं व्यधात् ।

पाणिगृहीत्यामपरस्यां विन्दमानायामेव नवरत्नस्य प्रकाशः प्रसरीसरीति स्मेति पितृसव्यवहार्यनाम्नः परिणतिरभूद्रत्नज्योत्स्नाभिधायाम् ।

चतुर्भाषावाराङ्गनासु समविहरणशीलोऽपि कविः स्वप्रियायामेव संस्कृतभाषायां स्वारस्यं तनुतेऽन्याभ्यो विलक्षणम् । स्वायुषः सप्तपञ्चाशद्वर्षपर्यन्तं संसेव्य तिस्रोऽङ्गनाः दैवहृतलोचनज्योतिरपि संस्कृतभाषायां प्रमदायामरंरमीदनवरतं प्रेम्णा जीवनं यथापूर्वम् ।

संस्कृतहिन्दीगुजरातीभाषासु काव्यरचना, गिरिधरकविकृता उपलभ्यन्ते ।

कविनवरत्नमहोदयेन सर्वभाषाप्रसूत्वाज्जननीव समादृत्य संस्कृतभाषामे-

तदुपासनासमासक्तेन विपुलं साहित्यं प्राणिन्ये परमनेकविषमपरिस्थितिहेतोर्न समग्रं साहित्यं लोकसमक्षमाहर्तुमशक्यत प्रकाशोपयोगिसाधनाभावात्। लोकरञ्जनसमर्थाः कतिचन कृतयः प्रकाशिता एताः— श्रीबालकृष्णाष्टकम्, देशोन्नतिः, श्रीभवानीसिंहकारकरत्नम्, श्रीभवानीसिंहसद्वृत्तपुष्पगुच्छः, भ्रमरसूक्तिसुधाकरः, ईश्वरप्रार्थना, योगी, नवरत्ननीतिः (आर्योपदेशरत्नमाला), गीतिः, प्रेमपयोधिः, गिरिधरसप्तशती, अभेदरसः, रत्नज्योत्स्नाष्टकम्, समस्यापूर्तयः, स्फुटपद्यानि, सौरमण्डलम्, नीतिमुकुरः।

अन्या अपि संस्कृतकृतय आसन्नषट्त्रिंशद्वर्तन्ते प्रकाशिताः। यासु "वीरेश्वरशास्त्री," शीर्षकदर्शिता त्रयोदशी विद्यते।

सम्भूय सकला नवरत्नरचना एकादशोत्तरं शतम्। पञ्चाशत्संस्कृतरचनासु केवलं चतुर्दशैव सुलभाः अन्यावशिष्टानाममुद्रितत्वादलोचनविषयीभूतास्ताः। सर्वविषसाहित्यगुम्फनं सामान्यविशिष्टव्यक्तीनां प्रयोजकतामुपगतं कवि समाजसम्मुखमेवोपस्थापयति चिररात्राय।

## बाबल्यावटङ्को बदरीनाथशास्त्री

गौडब्राह्मणकुलोत्पन्नोऽयं महानुभावो जयपुरलब्धजन्मा कनीयान्सहोदरो विश्वेश्वरस्य महाराजसंस्कृतकालेजे समधीत्य लब्धनव्यन्यायशास्त्रिपदवीक आङ्ग्लभाषाध्ययनकृतप्रवृत्तिरध्यापनकार्यमाचरन्नाङ्ग्लविद्यालये संस्कृतस्याङ्ग्लविद्यालयीयपरीक्षास्वपि क्रमशः साफल्यभाजनतामभजत्।

चन्द्रधरगुलेरिमहोदयस्य सहाध्यायितामाप्नुवन्नपि स्नातकपरीक्षायां ( B. A. ) तत्प्रतिकूलतामेवावजगाहे। सर्वप्रथमतया गुलेरिमहोदयस्याभिनन्दनं विरुद्धधर्मानुयायिभिरपि समोदमकारि। गुरुः श्रीवीरेश्वरशास्त्री स्वान्तेवासिनस्तथाविधसत्कृतिमवेक्ष्य परमप्रसादमापत्।

एतदग्रिमसत्रे बदरीनाथशर्मणा साफल्यमासाद्य स्नातकोत्तरकक्षाप्रवेशमाधाय क्रमशस्तत्परीक्षा समोदमुदतीर्यत।

किञ्चित्कालानन्तरं लक्ष्मणपुरस्थाङ्ग्लमहाविद्यालये प्राध्यापकपदमधि-

तिष्ठन्ननेकाँश्छात्रानध्यापिपत्। जयनगरादन्यत्रापि स्वकीयं यशो विस्तार्य सेवा-निवृत्तिनिश्चितकालमवसाद्य सेवानिवृत्तोऽभवत्।

वपुषा नातिदीर्घो नातिह्रस्वः सरलस्वभावोऽभिमानशून्य उष्णीषधृङ् मधुरभाषी गुरुशुश्रूषणप्रवणचेताः स्वकीयजन्मभूमिमलङ्कुर्वन्निःसङ्कोचं पितृ-पितामहकुलपरम्पराप्राप्तानुष्ठानादिकर्मव्यापृतोऽभूत्। अनुष्ठानादिकर्म-संलग्नोऽपि गुरुदर्शनार्थमहरहः समागम्याशिषं लब्ध्वाऽस्मत्सदनमभिप्रपेदे।

## श्यामसुन्दर शर्मा पुरोहितः

पुरोधोवर्यश्रीगोपीनाथतनूजन्मा सिरसीग्रामाभिजनः श्यामसुन्दरशर्मा द्रविडशास्त्रिमहोदयाधिगतपाठ्यक्रमातिरिक्तस्वसम्प्रदायग्रन्थाध्ययनरतः स्नातकोत्तरपरीक्षां समुत्तीर्य संस्कृतविषयसम्बद्धां डा० ह्वे निससान्निध्यमाससाद वाराणस्यां विशिष्टज्ञानसम्पत्तये। ज्ञातव्यमभिज्ञाय हिन्दूविश्वविद्यालये मदनमोहनमालवीयसंस्थापिते परीक्षासञ्चालनकार्यधुरमुदवहत्। काश्चित्समास्तत्रत्यकार्यजातं सम्पाद्य मनोयोगेनार्गलपुरस्थविश्वविद्यालये तदेवकार्यं कुर्वन् जयपुरराज्यशिक्षाविभागेऽधिकारिपदमध्यासितः समाहूय ततः शिक्षाविभाग-सञ्चालकपदमधितिष्ठन्नयं महाशयः

"प्राप्य चलानधिकारान् शत्रुषु मित्रेषु बन्धुवर्गेषु।<br>नापकृतं नोपकृतं न सत्कृतं जगति किं कृतं तेन॥"

इतिनीतिसरणिमनुसरन्नपकारोपकारान्समाचरत्। शिक्षाविभागायत्त-विद्यालयमहाविद्यालयेषु तत्तन्नामनिर्देशेन सह पदानि प्रतिष्ठाप्य वार्षिकवृद्धि-समवेतवेतनशृङ्खलया सह वेतनवृद्धिं विधाय शिक्षकसमुदयमानन्दाप्लावितं व्यधात्। स्वसुहृत्समुदायसमुदयविधित्सया गिरिधरभट्टमथुरानाथमाधवशास्त्रि-प्रमुखविदुषां भूषणं तत्तत्पदनियोगेन मानसं हर्षोल्लासनिर्भरमतानीत्। बहूनि पदानि विद्यालयमहाविद्यालयेषु यान्यावश्यकानि संस्थाप्य विनियुक्ताः योग्य-तया वैदिका विद्वांसः शिक्षकाश्च शिक्षका एवमुन्नतिमनयन् शिक्षाविभागं राजकीयसेवां परित्यज्यार्गलपुरविश्वविद्यालये पुनः प्राक्तनं पदमेवाशिश्रियत्।

चिरकालं सञ्चालयन्सेवायुः सीमां पूरयित्वा सेवानिवृत्तो जयपुरं प्रत्या-

वर्तत । स्वपूर्वजाङ्गीकृतरामानुजसम्प्रदायग्रन्थानात्मगुरुश्रीवीरेश्वरशास्त्रिसकाशादधिजगे । भागवतमहापुराणस्य चावशिष्टसमये सुबोधिनीसहितस्य चिन्तनं कृत्वा सायं संस्कृतानभिज्ञानां तदभिज्ञानाञ्च समक्षं प्रवचनमकार्षीत् सन्तुष्टान्तरङ्गाश्च प्रत्यहं नियतसमये समये प्रवचनानन्दमनुभवन्तः स्वजीवनं भगवद्भक्तिपरायणतया सफलमन्वभवत् ।

स्वतन्त्रभारतैकदेशराजस्थानमुख्यमन्त्रिपदमध्यासीनैः श्रीहीरालालशास्त्रिभिर्मुख्यनिजसचिवपदं ग्राहितस्तदन्तरङ्गाणि सम्यगनुकूलतया निरवहत् ।

अन्ते च भगवद्भक्तिप्रवणतयोष्णपेयमौषध्यादिकमपि भगवदर्पणपूर्वकं गृहीतवान् । रात्रिन्दिवं च श्रीमद्भागवतचिन्तनेन प्रवचनादिना च स्वकीयावशिष्टजीवनं यापयन् हृद्रोगेण परलोकपथिकतामाससाद । स्वोपार्जितं द्रविणजातं परोपकाराय समर्पितवान्स्वजातिसंस्थानाय कस्मैचित् ।

## श्रीसूर्यनारायणो ब्रह्मभट्टः

सूर्यनारायणो रामलालब्रह्मभट्टचन्द्रपौलिशालाध्यापकस्य ज्यायांस्तनूजः । उच्चविद्यालयपरीक्षां (दशमकक्षां) समुत्तीर्य पितृपादानुगामितामग्रहीत् । पिपठिषाकुतूहलाक्रान्तचेतास्ततो न विरक्तिमभजत् । व्यक्तिगतरूपेणाग्रेतनशिक्षाभ्यासक्तमानसः परिश्रमेण महाविद्यालयीयप्रवेशपरीक्षां समुदतरत् । स्नातकपरीक्षापाठ्यनियतान्ग्रन्थान्सम्यगभ्यस्य तत्रापि साफल्यमश्नुत ।

अध्ययनजन्यापूर्वमानन्दमनुभवन्नतृप्त इवातिशयोत्सुकितः शास्त्रिपर्यातिरिक्तमपश्यन्नध्यापयितारं कञ्चन शरणं द्रविडशास्त्रिणः समासाद्य प्रार्थयामास । स्नातकोत्तरपरीक्षापाठ्यग्रन्थान्नियमेन नियतवेलायामुररीकृतप्रार्थनस्य तस्याभ्यर्णमागत्य प्रणिधानेनाध्यगीष्ट ।

अधिगतयोग्यताप्राप्तोत्तरोत्तरोच्चपदोन्तौ सहायकनिदेशकपदात्सेवा-निवृत्तोऽध्ययनादिनैव शेषं समयमयापयन्नवतिवर्षवयोमितम् ।

हिन्दुत्वभावनाभृतचित्ततया यवनेभ्योऽतिजुगुप्सते स्म । अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति । स्वयंसेवकसङ्घसेवितासावुर्वरस्याः बलवत्पाल-

यिताऽत्मज्येष्ठतनयं सिद्धार्थाभिधानं वैश्यजातिसमुत्पन्नया क्रान्तिनामिकयाऽच-रितप्रेमविवाहं गृहालिःसार्य कदाचनापि स्वसुताविवाहादिविविधकार्येषु प्रश्रयं नादात्प्रत्युत सर्वथाऽजीवनं सम्बन्धं विच्छेदाभ्यर्थयतोऽपि तस्य ।

## श्रीगोपीनाथ-धर्माधिकारी

अर्गलपुरप्रान्तस्थबटेश्वरावसथलब्धजन्माऽयं स्वपितृचरणस्वर्गारोहणा-नन्तरं मातृसहितो जयपुरमागत्य ब्रह्मपुर्यां कालेमहोदयस्य महाराष्ट्रब्राह्मणस्य गृहे न्यवसत् । वेदाष्टवसुचन्द्रमित (१८८४) ख्रिष्टाब्दस्यैकादशमासस्य सप्तदश-तारिकायां राजारामशास्त्रिधर्मपत्न्यां समुत्पन्नः । श्रीशिवराजकालेमहोदयस्यान-पत्यतयैतदीयभ्राता दत्तकत्वेनात्रावसत् । दिवंगते श्रीकालेमहोदयेऽयमेवोत्त-राधिकारमापेदे । महाराजसंस्कृतकालेजे जयपुर एवासौ शिक्षामलभत । श्रीवीरेश्वरशास्त्रिमहाभागाद् व्याकरणमधीत्य व्याकरणाचार्यपरीक्षामुदतरत् । गुणनेत्रनिधीन्दुख्रिष्टवर्षस्या ( १९२३ ) दिमासस्याष्टमतारिकायामध्ययनशा-लायाः प्रवेशिकाविभागेऽध्यापकत्वेन नियुक्तो व्याकरणाध्यापनं कुर्वन्व्याख्यातृ-पदात्सेवानिवृत्तस्त्र्यब्धिनन्दोर्वीजवीयेऽब्दे ( १९४३ ) विंशतिवर्षानन्तरे सेवानिवृत्तेः शिवसायुज्यमापत् ।

## श्री गोपीनाथ शास्त्री द्राविडः

विश्वनाथपुर्यां श्रीकृष्णशास्त्रिविदुषो गुणेषुनिधिभू ( १८०३ ) मिते वैक्रम-वत्सरे ज्येष्ठशुक्लचतुर्दश्यां गृहीतजन्मा प्रारम्भिकीं शिक्षां तत्रैवोपगम्य युग्मेन्दु-नवावनि ( १९१२ ) ख्रिष्टहायने जयपुरराजगुरोः कामनाथस्यानपत्यतया दत्तकसूनुतामापन्नोऽत्रैवाग्रेतनीं शिक्षामादातुं महाराजाकालेजे प्रवेशमाप । स्ना-तकपरीक्षा ( B A ) मुत्तीर्य काशीतः साहित्याचार्यपरीक्षायामात्तसाफल्यः प्रयागं प्राप्य संस्कृतविषयकस्नातकोत्तरपरीक्षया सार्धं विधिपरीक्षाया(**L.L.B.**)-मपि साफल्यभागभूत् । श्रीशास्त्रिमहोदयान्महाराजकालेजातिरिक्तसमयेऽपि विषयान्तराध्ययनसौविध्यमभजदेकत्रवासात् । राजगुरुपदमधितिष्ठन्नुदारचेताः सरलस्वभावो लेखकवितादिष्वप्रतिमः सततःध्ययनशीलो विद्वानासीत् ।

## श्रीगिरिजाप्रसादो द्विवेदः

महाराजरामसिंहप्रदत्तसम्मानः सरयूपारीणब्राह्मकुलोद्भूतः श्रीसरयूप्रसादो विद्वांस्तपस्वी चासीज्जयपुरे । मूलनिवासोऽस्य महाभागस्य पिलखावाग्रामान्तिकस्थपण्डितपुरी विद्यते । अयं काश्यपगोत्रोत्पन्नो यजुर्वेदस्य माध्यन्दिनशाखाध्यायी द्विवेदोपाह्वयस्तापसः । आत्मा वै पुत्रनामासीतिवचनानुकूलतयैतादृश एवात्मजः समजनि नाम्ना दुर्गाप्रसादः प्रसिद्धो यो जयपुरमहाराजसंस्कृतकालेजे ज्योतिषप्राध्यापकः सन् कालेजस्य प्राचार्यपदमधिष्ठितः ।

अश्वाब्धिनन्देन्दुमिते वैक्रमेऽब्दे नवम्बरमासस्यैकविंशतितारिकायामेतस्माज्जनिं लेभे श्रीगिरिजाप्रसादद्विवेदः । पितृपादाज्ज्यौतिषविद्यां संस्कृतकालेजे प्रवेशमवाप्य नियमितछात्ररूपेणाधीयान आचार्योपाधिं प्रथमश्रेण्यां लब्धवान् । पित्रा प्रचोदितो व्याकरणाध्ययनाय पितृपरममित्रस्य श्रीवीरेश्वरशास्त्रिणः सान्निध्यमभजत् । द्रविडशास्त्रिणः सकाशात्सिद्धान्तकौमुदीमहाभाष्यादिदुरूहव्याकरणग्रन्थानधीत्य कवितालेखादिकार्येऽनल्पां प्रौढिमाससाद । श्रीशास्त्रिणो दैनन्दिन्यामनुदिनं गिरिजाप्रसादस्याद्य महाभाष्यपाठारम्भोऽद्य महाभाष्यस्यैयानंशः पाठितः गिरिजाप्रसादोऽस्मिन्दिनेऽवकाशसत्वान्न पाठितः एवमुल्लेखाः वर्तन्ते ।

## श्रीगंगाधरद्विवेदः

पं० श्रीगिरिजाप्रसादशर्मणः कनीयानयमात्मजः स्वपूर्वजानां वसतौ पण्डितपुर्यां भूनेत्रनन्देन्दुमितेशवीयवर्षस्यान्तिममासस्याष्टमतारिकायां जनुरग्रहीत् । भवदीयपितामहा जयपुरराज्याश्रिताविद्वत्तल्लजाः प्रणेतारो ग्रन्थानां लेखकाः समभूवन् । कुलक्रमायातां वैदुषीं प्राप्तकामोऽसौ गङ्गाधरः पितामहाच्छिक्षां समासाद्य महाराजसंस्कृतकालेजे व्याकरणोपाध्यायपरीक्षामुत्तीर्य नियमितछात्ररूपेणाधीयानोऽग्रेतनीं शिक्षां वैयाकरणकेसरिणः श्रीवीरेश्वरशास्त्रिणो जग्राह । तत्र व्याकरणस्य दुरूहग्रन्थान्महाभाष्यशेखरमञ्जूषाप्रभृतीनवगत्य यथाविधिगुणाङ्कभूमिते ख्रिष्टाब्दे व्याकरणतीर्थपरीक्षायां लब्धसाफल्यो लक्ष्मणपुरविश्वविद्यालयतः साहित्याचार्यपरीक्षामुत्तीर्णवान् ।

नवाब्धिनिधिचन्द्रमितेशवीयेऽब्दे संस्कृतकालेजे सामान्यसंस्कृतव्याख्यातृपदमधिष्ठाय साहित्यप्राध्यापकपदमलङ्कृतवान्। अन्तरा चालवरसंस्कृतकालेजे आचार्यपदमध्यास्त। पुनश्च जयपुरसंस्कृतकालेजे प्राध्यापकपदमलङ्कृत्यान्ते प्राचार्यपदादस्य महाविद्यालयस्य सेवानिवृत्तः। लेखनसम्पादनप्रकाशनपरम्पराऽक्षुण्णा भवता विहिता।

अमुष्य पितृपितामहप्रपितामहा यथा ख्यातवैदुष्याः समस्ते भारते लब्धप्रतिष्ठा आसन् तथैव महाभागोऽयं संस्कृतवाङ्मयस्य प्रौढो विद्वानिति कृत्वा भारतसर्वकारेण १९९२ मिते खिष्टाब्दे राष्ट्रपतिपुरस्कारेण सम्मानितः।

## श्रीमदनलालप्रश्नवरः

गुर्जरदेशात्समायातेष्वौदीच्यपरिवारेष्वन्यतमः परिवारोऽयम्। राजगुरुश्रीमन्वाजीमहाराजानामायव्ययजातकार्यकर्तारो भवदीयास्तातपादाः। भवता नियमितछात्ररूपेण महाराजसंस्कृतकालेजेऽधीत्य पर्यायेणोपाध्यायशास्त्र्याचार्यपरीक्षामुत्तीर्य संस्कृतकालेजे व्याख्याताभवत्। भवतो जन्म जयपुर एव मुनिसप्ताङ्कन्दुमितखिष्टाब्दाश्वमासस्यैकत्रिंशत्तारिकायामभवद्दामोदरप्रश्नवरात्।

दामोदरमहाशयस्य परिचितः श्रीद्रविडशास्त्री राजगुरोः पत्नीभ्रातृत्वात्तत्रैवावासाच्चातोऽन्तराले मदनमहोदय एतदीयतनयः शास्त्रिसकाशादपि व्याकरणग्रन्थानध्यैष्ट। प्रतिदिनं शास्त्रिवर्यसन्निधौ गत्वाध्ययनमकरोत्। संस्कृतविद्यालयनिरीक्षकपदादसौ धर्मशास्त्रप्राध्यापकतामङ्गीकृत्य सेवानिवृत्तोऽवर्तत ततः।

## श्रीसूर्यनारायणशर्मा वैदिकः

अभ्राङ्कनन्दभूमिमितविक्रमवत्सराग्रहायणिकमासे सितदले राज्यज्योतिषिकस्य गोपीनाथशर्मणो भार्यादक्षिणकुक्षेर्जातो जयपुरे सूर्यनारायणाभिधानोऽयं वैदिकः। जयपुरमहाराजसंस्कृतकालेज एव नियमितछात्ररूपेणाधीत्य प्रवेशिकातः शास्त्रिपर्यन्तं शास्त्र्युपाधिं प्राप्तवान्। वेदाचार्यपरीक्षायामपि साफल्यमाप्तवान्। अस्मिन्नेवान्तराले श्रीवीरेश्वरशास्त्रिचरणोपासनासक्तो व्याकरणं निरुक्तं

साहित्यज्ञानञ्चापादि । यावज्जीवं च शास्त्रिचरणान्तिपवे तत्तद्विषयज्ञानार्जनाय कर्मकाण्डोपस्थितसंदेहनिराकरणाय च ।

## श्रीविजयचन्द्रचतुर्वेदः

कर्मकाण्डनिष्णात—गौडविप्रावतंसचतुर्वेदकुलप्रतिष्ठित श्रीवच्चूलालचतुर्वेदमहाभागादात्तजन्मा खशरनवेन्दुविक्रमाब्दभाद्रपदशुक्लपूर्णिमायां विजयचन्द्रचतुर्वेदः ।

शैशवादेव परम्परागतकर्मकाण्डनैपुणीमिच्छन्यजुर्वेदाध्ययनाय महाराजसंस्कृतकालेजे प्रविष्टवान् । क्रमशश्चात्र नियमितछात्ररूपेणाध्ययनं विदधानः प्रवेशिकोपाध्यायपरीक्षाप्तसाफल्यो वेदसप्तनिधीन्दुमित ( १९७४ ) विक्रमवर्षे शास्त्रिपरीक्षामुत्तीर्यशेतनकक्षायामध्यनाय प्राविशत् । वसुमुनिनवभूमितविक्रमाब्दे वेदाचार्योपाधिं प्रथमश्रेण्याधिगतवान् भवनो। गुरुर्मांगीलालसंहितापाठिदाधीचमहोदय आसीदेव, परं द्रविडशास्त्रिमहोदयादपि निरुक्तादिकमधीतवानिति द्रविडशास्त्री गुरुकोटावस्य समाविष्ट एव ।

वेदाचार्योपाधिलाभानन्तरमेष महाराजसंस्कृतकालेजे वेदाध्यापक आसीत् । श्रीशिवप्रतापशर्मा वेदाचार्यो भवतोऽधी तवान्यजुर्वेदम् ।

पुनश्चायं वाराणस्यां "गवर्नमेन्टसंस्कृतकालेजे" वेदाध्यापकोऽभवत् । श्रीशास्त्रिसंचालितकृष्णयजुर्वेदपाठशाला—सञ्चालकसंस्थान ( ट्रस्ट ) सदस्यतामङ्गीचकार शास्त्रिवर्यादेशेनाशातिक्रमणजन्यापराधभीतः । किञ्चित्कालानन्तरं कार्यरत एवाकाले विश्वनाथसायुज्यमाप । शास्त्रिवर्या अतीव विषण्णा अभूवन् ।

## जमनालालदशोरामहोदयः

उदयपुरवास्तव्योऽसावौदीच्यब्राह्मणवंशजन्मोच्चतराध्ययनाय महाराजकालेजे प्रवेशमवाप्य स्नातकपरीक्षामुत्तीर्य द्रविडशास्त्रिषु भूरिश्रद्धावानभूदध्ययनावसानानन्तरमपि ।

स्नातकपरीक्षासाफल्यावाप्तिलब्धप्रतिष्ठः उदयपुरे क्रमशो राज्यसेवाया-मुन्नतिमाप्नुवानः सत्रन्यायाधीशपदात्सेवानिवृत्त एकलिङ्गसंस्थान (ट्रस्ट) सद-स्यतामुररीचकार महाराणाग्रहेण किञ्चित्कालानन्तरं स्वप्रकृतिविपरीतमनैतिकं क्रियाकलापमसहमानस्तामपि व्यजहात्।

द्रविडशास्त्रिषु स्वशिष्यश्रीशार्दूलसिंहवर्मणोनुरोधातिशयेन लोचनशल्य-चिकित्सार्थमुदयपुरं प्रयातेषु श्रुतशास्त्रिप्राप्तिरनुदिनमेव तदीयसेवायामुपातिष्ठ-तोदयपुरस्थितिं यावच्छ्रद्धातिशयेन।

## गणेशलालसोमाणीमहोदयः

वैश्यकुलोत्पन्नोऽयं संस्कृताध्ययनरुचिशीलः प्रारम्भत एव संस्कृतमधीयानः आर्यसमाजानुयायी स्नातकपरीक्षामुत्तीर्य अर्बुदपर्वतस्थ-जयपुरराज्याभिभाषको-ऽभवत्। श्रद्धातिशयाच्छास्त्रिमहोदये ततः कार्यार्थमागतो दर्शनार्थमवश्यमेवाग-च्छत्। राज्यसेवानिवृत्तो जयपुराद्बहिर्विशालं भवनं निर्मापितवान्। अस्यैका कन्यैवासीत्सापि संस्कृतज्ञा।

## रूडमलशर्मा दाधिमथः

अयमपि द्राविडशास्त्रिमहाभागानामन्यतमोऽन्तेवासी दाधीचद्विजाति-सम्भावितकुलोत्पन्नः पितृपितामहादिपरम्परायातरुचिशीलः प्रारम्भत एव संस्कृ-तमधीयानः स्नातककक्षामैच्छिकसंस्कृतविषयेण सहोत्तीर्य योधपुरनगरेऽध्यापक-पदमध्यतिष्ठत्। कतिसमानन्तरं जयपुरनगरेऽध्यापकतामवजगाहे। नैसर्गिक-मतिमत्तया विविधपदेषु कार्यमाचरन्नधिकारिवर्गस्य प्रत्ययपात्रतां प्राप। क्रमेणोच्चोच्चोत्तराध्यापकपदमाददान उच्चविद्यालयप्रधानपदमलभत। कति-पयहायनपर्यन्तं तत्पदकार्येषु साफल्यमाप्नुवानो निरीक्षकपदमध्यतिष्ठत्। ततश्च निदेशकमहोदयस्य निजसहायकनिदेशकपदमध्यासीनोऽनन्तरं शिक्षावि-भागीयपरीक्षासञ्चालकपदाद्राजकीयसेवाकालावधिं समाप्य सेवानिवृत्तः। सामाजिककार्येषु तत्पश्चाद्विशेषतया भागं गृह्णन्नैकानि सामाजिककार्याणि समाचरत्।

6